श्री॰
भा॰ ४॰
टी॰
१

ॐ श्रीगणेशाय नमः ॐ अथैकत्रिंशताध्यायैर्विसर्गस्तु प्रवर्ण्यते विसर्गस्त्री स्वराधीनैर्बलमन्वादि
भिः कृतः तत्र तु प्रथमे ध्याये मनुकन्यान्वयो पृथक् वर्ण्यते यत्र यज्ञादिमूर्तिभिः प्रभवो हरेः मनुकन्यान्व
यं विस्तरेणा वक्तुमाह मनोस्त्विति त्रिकारार्हो उवाच तु शाब्दादित्यतो पि पुत्रनामः सूचितः तद्दर्शयितुमाह
हु पुत्रिकाधर्ममाश्रित्येति अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां अस्यां यो जायते पुत्रः स मे पुत्रो भवेदि।

मैत्रेय उवाच मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुता
१ आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः पुत्रिकाधर्म
माश्रित्य शतरूपानुमोदितः २ प्रजापतिः स भगवान्रुचिस्त
स्यामजीजनन्मिथुनं ब्रह्म वर्चस्वी परमेन समाधिना ३
यस्तयोः पुरुषः साक्षाद्विष्णु र्यज्ञस्वरूपधृक् या स्त्री सा द
क्षिणा भूतेरंशभूतानपायिनी ४ आनिन्ये स्वगृहं पुत्र्याः पुत्रं वि
ततरोचिषं स्वायंभुवो मुदा। युक्तो रुचिर्जग्राह दक्षिणां ५
तां कामयानां भगवानुवाह यजुषांपतिः तुष्टायां तोषमा
मापन्नोजनयद्द्वादशात्मजान् ६ तोषः प्रतोषः संतोषो भद्रः शान्तिरिडस्पतिः इध्मः कविर्विभुः
स्वह्नः सुदेवो रोचनो द्विषट् ७

तिमात्राभावेपि येन कन्यादानं पुत्रिकाधर्मः स च भ्रातृकायां प्रयासार्थि एव प्रसिद्धः तथापि पुत्रकामः तयाकृत
वानित्याह भ्रातृमतीमपीति २ मिथुनं पुरुषं स्त्रियं च समाधिना ईश्वरस्य ध्यानेन ३ भूतेर्लक्ष्म्या अंशेन भूतास्त
त्रतयोर्वियोगेन पतिरूपहरतीति भावः पुत्र्याः आकूतेः पुत्रं यज्ञं ४ ५ ६ यजुषां यज्ञानां मे सर्वाणां वा पतिर्विभुः
द्विषट् द्वादश ७ ॥

प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह तुषिता इति द्वाभ्यां मन्वंतरं मनुर्देवाः मनुपुत्राः सुरेश्वराः ऋषयों शावतारा हरेः षड्विधमुच्यते इति वक्ष्यति तत्र स्वायंभुवो मनुः तुषिता देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञ हरेरवतारः स एव सुरगणेश्वर इंद्रः ८ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ न देवं यज्ञस्य हौत्रेणावहि-तं तयोः पुत्रपौत्रनप्तॄणां वंशैरनुवृत्तं व्याप्तं पालितं तन्मन्वंतरं ९ श्रुतप्रायं बाहुल्येन श्रुतं तत्कर्म वंशानां

तुषिता नाम ते देवा आसन्स्वायंभुवांतरे मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ८ प्रियव्रतोत्तान-
पादौ मनुपुत्रौ महौजसौ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदंतरं ९ देवहूतिमदात्तात कर्दमायात्मजां
मनुः तत्संबंधि श्रुतप्रायं भवता गदतो मम १० दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः प्रायच्छ-
द्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ११ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः तासां प्रसूति-
प्रसवं प्रोच्यमानं निबोध मे १२ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा कश्यपं पूर्णिमानं च ययोरा-
पूरितं जगत् १३ पूर्णिमासूत विरजं विश्वगं च परंतप देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः
१४ अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान् दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् १५ श्री
विदुर उवाच अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतहेतवः किंचिच्चि-
कीर्षवो जाता एतदाख्याहि मे गुरो १६ ॥

श्रुतवान् प्रायच्छत् दत्तवान् १० प्रसूतिप्रसवं पुत्रपौत्रादिभिर्विस्तारैः ११ ययोर्वंशेनापूरितं १२ कश्यपस्य वंशः षष्ठे वक्ष्यति द्वितीयस्य वंशमाह पूर्णिमेति देवकुल्यां नाम कन्यां च हरेः पादक्षालनजलेन आत एव या दिवः सरिद्गङ्गा अभूत् तां १४ आत्मेशब्रह्मसंभवान् विष्णुरुद्रब्रह्मणामंशैः संभूतान् १५ किंचित्किंचित् १६ रामकृष्णाभ्यां नमः ॥

श्रीः
भा॰ ४॰
टी॰
२

ऋक्षं नाम कुलाद्रिं तपसि स्थितः सन् १७ तस्मिन्नृक्षाद्रौ प्रसूनानां स्तबका येषु पलाशाशोकेषु तेषां कानने निर्विंध्या
नाम नदी तस्याः स्रवद्भिः वार्भिरुद्घुष्टे नादिते १८ २० प्राणायाम एवैधः संदीपको यस्य तेन मुनेर्मूर्ध्नो निर्गतेनाग्निना
तप्यमानं समीक्ष्य तदाश्रमपदं ययुरित्यन्वयः २१ अप्सरः प्रभृतिभिर्वितायमानं विस्तार्यमाणं यशो येषां ते २२ तेषां

मैत्रेय उवाच ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः १७
तस्मिन्प्रसूनस्तबकपलाशाशोककानने वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः १८ प्राणायामे-
न संयम्य मनो वर्षशतं मुनिः अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः १९ शरणं तं प्रपद्येऽहं य एव जग-
दीश्वरः प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् २० तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना निर्गते-
न मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः २१ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः वितायमानयशसस्त-
दाश्रमपदं ययुः २२ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभा- शो
न् २३ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणांजलिः वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्च चिह्नितान् २४ कृपावलोकेन हसद्वदनेनोपलंभितान्
तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः श्लक्ष्णया सू-
क्तया वाचा सर्वलोकगरीयसः २६

प्रादुर्भावः प्राकट्यं तत्संयोगः सन्निधिः तेन विद्योतितं मनो यस्य उत्कर्षेण तिष्ठन् २३ अर्हणं पुष्पादिकमंजलौ यस्य उप-
तस्थे भजयामास वृषादयो वाहनानि स्वैः स्वैश्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः २४ कृपयावलोको यस्मिन् हसद्वद-
नं च तेन उपलंभितान् प्रसन्नत्वज्ञापितान् तेषां रोचिषा दीप्त्या २५
श्लक्ष्णया मधुरया सूक्तया गंभीरार्थया २६ ॥

अनुयुगं कल्पे कल्पे विभज्य गृहीतो देहो यैः ते असिन्ना ब्रह्मविष्णुगिरिशाख्यास्त्रयः ईश्वराः तेभ्यः सकाशा
देकमेवमे मयाउपहृतः आत्मानं प्रपद्यइत्येकस्यैव निर्दिष्टत्वात् स च युष्माभिरेव कथ्यतामित्यर्थः
२७ अस्याप्रर्पणवत्कइति विविधैः प्रधानैरूपचारैर्विभुं प्रधानइतिवापाठः प्रजननायपुत्रोत्पत्त्यैविज्ञीकृतः विनैनै
केनीतः मनसोपिदूरादगोचरात् सतः कथं नवयोपिआगताः २८ तेनयाथयाकृतः सेकल्पस्तेनतथैव भावेना

अत्रिरुवाच विष्णोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ते ब्रह्मविष्णुगिरि
शाः श्रुतोस्म्यहं वः तेभ्यः कएव भवतां मइहोपहूतः २७ एकोमयेहभगवान्विविधप्रधानैश्चित्तीकृ
तः प्रजननायकथंनयूयं अत्रागतास्तनुभृतां मनसोपिदूराद्ब्रूत प्रसीदत महानिह विस्मयो मे २८ मैत्रे
य उवाच इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो २९
देवा ऊचुः यथाकृतस्ते संकल्पो भाव्यं तेनैव नान्यथा सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयम् ३०
अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः भवितारोङ्ग भद्रं ते विस्रप्स्यन्ति च ते यशः ३१ एवं कामवरं
दत्वा प्रतिजग्मुः सुरेश्वराः सभाजितास्तयोः सम्यक्दंपत्योर्मिषतोस्ततः ३२ सोमोभूद्ब्रह्मणोंशेन द
त्तात्रेयो योगवित् दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ३३ ॥ ३३

यथा यतः सत्संकल्पस्य ते संकल्पः तर्हि कथमेकस्मिन् ध्यायमाने त्रयः प्रतीताः स्यत आहुः यदेकं जगदीश्वरा
त्व्यतत्वं भवान्ध्यायति तदेव वयं त्रयोपि न देवैकं न त्वं नास्माकं भेदोस्तीत्यर्थः ३० विस्रप्स्यन्ति विस्तारयिष्यन्ति अत
भूत ‒ विश्रयस्त्रयं ३१ ताभ्यां सम्यक् सभाजिताः पूजिताः सन्तः ततः
स्थानात्प्रतिजग्मुः ३२ निबोध
बुध्यस्व ३३ ॥

श्री·
भा·च·
टी·
६

नाऽकन्यानिर्दिशति सिनीवालीति· ३४ ३५ पुलस्त्यस्तु हविर्भुवि पत्न्यामित्यन्वयः सोऽगस्त्यः दह्राग्निः जाठरः विश्रवाश्च पु
लस्त्यस्य सुत इति शेषः ३६ तस्य विश्रवस इडविडायां जातः सुतः कुबेरः अन्यस्यां भार्यायां केशिन्यां रावणादयः त्रय :
सुताः ३७ ज्वलतः प्रकाशमानान् ३९ चित्रकेतुप्रमुखा जज्ञिरे सप्त ब्रह्मर्षयो जाताः ४० तानेवाह चित्रकेतुरिति वसि

श्रद्धात्वांगिरसः पत्नी चतस्रोऽसूत कन्यकाः सिनीवाली कुहू राका चतुर्थ्यनुमतिः तथा ३४ तत्पुत्रावपरा।
वास्तां ख्यातौ स्वारोचिषेंतरे उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ३५ पुलस्त्योऽजनयत्पत्न्यामग-
स्त्यं च हविर्भुवि सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ३६ तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासु
तः रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः ३७ पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् कर्मश्रेष्ठं वरी
यांसं सहिष्णुं च महामते ३८ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ऋषीन्षष्टिसहस्राणि ज्वलतो
ब्रह्मतेजसा ३९ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ४०
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च उल्बणो वसुभृद्यानो द्युमान्शक्त्यादयोऽपरे ४१ चित्तिस्त्वथर्व।
णः पत्नी लेभे पुत्रं धृतव्रतं दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे ४२ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रा
नजीजनत् धातारं च विधातारं श्रियं च भगवत्परां ४३ आयतिं नियतिं चैव सुते मेरुस्तयोरदात् ताभ्यां
तयोरभवतां मृकंडः प्राण एव च ४४ मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः कविश्च भार्गवो यस्य
भगवानुशना सुतः ४५ सर्वे ते मुनयः क्षत्तर्लोकान्सर्गैरभावयन् एष कर्दमदौहित्रसंतानः कथितस्तव
शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ४६

भृद्यानो नामैकः शक्त्यादयो वसिष्ठस्य अन्यस्याः पुत्राः ४१ ४२ ख्यात्यां पत्न्यां पुत्रान् उभौ पुत्रौ विना नेवाह धातारमिति ४३
तयोर्धातृविधात्रोः ४४ कविश्च भार्गवः भृगोः पुत्रः ४५ ब्रह्माद्यैः एतैः सर्वैः लोकान् भावयन् ४६ ॐ नमो भग
वते वासुदेवाय

प्रजात्मनः ब्रह्मपुत्रः ४७ युक्तेभ्यः संपन्नेभ्यः मिलितेभ्यो वा ४८ ५१ सर्वेषां गुणानां संपत्तिर्यस्याः सा ५२ ५३ उपतस्थुर्भेजुः ५४ निजया मायया यस्मिन्नात्मनि विगगने रूपभेदं गंधर्वनगरमिव देहे विश्वं विरचितं तस्यात्मनः प्रतिचक्षणाय प्रकाशनाय आत्मानं योग्यं प्रादुश्चकार प्रकटितवान् तस्मै पुरुषाय नमः किंरूपेण प्रादुश्चकार ऋषेर्मूर्ति

प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः तस्यां ससर्ज दुहितॄः षोडशामललोचनः ४७ त्रयोदशादाद्धर्मायतथैकामग्नये विभुः पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ४८ श्रद्धा मैत्री दया शान्तिः तुष्टिः पुष्टिः क्रियोन्नतिः बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ४९ श्रद्धासूत शुभं मैत्री प्रसादमभयं दया शान्तिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ५० योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतं ५१ मूर्तिः सर्वगुणोत्पत्तिः नरनारायणावृषी ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतं ५२ मनांसि ककुभो वाताः प्रसेदुः सरितोद्रयः दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ५३ मुनयस्तुष्टुवुः तुष्टा जगुर्गंधर्वकिन्नराः नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलं ५४ देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ५४ यो मायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ५५ सोयं स्थितिव्यतिकरोपशमाय सृष्टान्सत्वेन नः सुरगणाननुमेयतत्वः दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदम् ५६ ॥

साकारो यस्मिन्नेतेन केशवेन गणाः ५५ सोयं नोस्मान् सुरगणान् अनल्पकरुणायुक्तेन विलोकनेन विशिष्टेन नेत्रेण दृश्यात् पश्यतु कथंभूतेन यच्छ्रीनिकेतममलमरविंदं तत् क्षिपता तिरस्कुर्वता कथंभूतः अनुमेयं शास्त्रतो विचार्यं तत्वं स्वरूपं यस्य पगोत्तेन ज्ञेयस्य कथंभूतान् अस्मान् स्थितेर्जगन्मर्यादाया व्यतिकरो न्यथा त्वं तस्योपशमाय सत्वेन गुणेन सृष्टान् ५६ ॥
रामकृष्णाभ्यां नमः

श्रीः
भा॰ वे
टी॰
८

लब्धोवलोकोयैः स्वरगणैस्तैरभिष्टुतावर्चितौ च संतौ श्रयतः ५७ भुवोभारस्यव्ययायनाशायचकारणभूतावागतावित्यर्थः
नीवसोप्रतिमिहायनाविन्यर्थः तदुक्तं तंत्रे अर्जुनेनरावेशः कृष्णोनारायणः स्वयमितिचहृदयहृः श्रीकृष्णः कुरुद्वहो
र्जुनः उभावपि कृष्णः कुरुद्वहोऽर्जुनः उभावपि कृष्णनामानौ ५८ अग्न्यभिमानिनोदेवात् स्वाहानामतस्यभार्याहुतभोजन
नमितित्रयाणां षणां ५९ पितरस्त्रयः पितामहत्रयकः तैः साकं सह ६० वैतानिके वैदिके कर्मणि यज्ञे येषांना

एवं स्वरगणेभ्यस्तानभगवंतावभिष्टुतौ लब्धावलोकैर्ययतुरर्चितौ गंधमादनं ५७ ताविमौ वै भगवतो हरेरंशा
विहागतौ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ५८ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् पाव
कं पावमानं च शुचिं च हुतभोजनं ५९ तेभ्योऽग्नयः समभवंश्चत्वारिंशच्च पंच च तएवैकोनपंचाशत्साकं पितृपि
तामहैः ६० वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः आग्नेय्यइष्टयो यज्ञे निरूप्यंतेऽग्नयस्तु ते ६१ अग्निष्वात्ता
बर्हिषदः सौम्याः पितरआज्यपाः साग्नयोनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ६२ तेभ्यो दधार कन्ये द्वे व
युनां धारिणीं स्वधा उभेते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ६३ भवस्य पत्नी तु सती भवं देवमनुव्रता आत्मा
नः सदृशं पुत्रं न लेभे गुणशीलतः ६४ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा अप्रौढैवात्मनात्मानमजहा
द्योगसंयुता ६५ ॥ इतिभागवतेचतुस्कंधेयज्ञायणोनामप्रथमः १

ॐ नमो नमो गजेंद्राय

मभिरग्निदेवताकाइष्टयोनिरूप्यंते तएतेग्नयोनालौकिकाः अतोब्रह्मणोनवैपुत्राइतिभावः ६१ सौम्याः सोमपाः येषा
मग्नौ करणमग्निर्नसाग्नयः तद्रहितास्त्वनग्नयः ६२ तयोस्तु संततिर्नाभवत् जीवन्मुक्तत्वादित्याह उभेतेइति ६३ गु
णशीलतः आत्मनः सदृशो देवमनुव्रतापि सती पुत्रं न लेभे ६४ तत्रहेतुः स्वपितरिदक्षेअप्रतिरूपेअहंकृशेइतिहेतोः सती
स्वयं आत्मनः स्वयमेवात्मानंदेहमजहात् त्यक्तवती योगसंयुता योगमाश्रितेत्यर्थः ६५ इतिभावार्थेचतुर्थेप्रथमः

द्वितीयेप्रथमाध्यायोपात्तमभवदनयोः विद्वेषोवर्ण्यतेहेतोर्विश्वसृग्यज्ञसंभवः १ सतींसतीनाम्नीं १ नचासौक
स्यचिद्वेष्टाद्वेष्टस्त्वाह कइति चराचरगुरुंकंजनोदैवतंचनकोद्वेष्टि कथंचनिर्वैरंद्वेष्टि निर्वैरत्वेहेतुः भवकः शांतेशांतवि
वविग्रहोयस्यऊनंआत्मन्येवारामोरतिर्यस्यतं यद्वाकःप्रजापतिर्दक्षःकथंद्वेष्टि एवंभूतेपस्मिन्द्वेषोऽयुक्तोऽशक्य
श्चेत्यर्थः २ यतोहेतोर्विद्वेषः यतोविद्वेषात्प्राणांस्तत्याज एतदाख्याहि ३ तदेवमाख्यातमितिहासंप्रस्तौति

विदुरउवाच भवेशीलवतांश्रेष्ठेदक्षोदुहितृवत्सलः विद्वेषमकरोत्कस्मादनादृत्यात्मजांसतीं १ कस्तंच
राचरगुरुंनिर्वैरंशांतविग्रहं आत्मारामंकथंद्वेष्टिजगतोदैवतंमहत् २ एतदाख्याहिमेब्रह्मन्जामातुः
श्वशुरस्यच विद्वेषस्तुयतःप्राणांस्तत्यजेदुस्त्यजान्सती ३ मैत्रेयउवाच पुराविश्वसृजांसत्रेसमेताः
परमर्षयः तथामरगणाःसर्वेसानुगामुनयोऽग्नयः ४ तत्रप्रविष्टमृषयोदृष्ट्वार्कमिवरोचिषा भ्राज
मानंवितिमिरंकुर्वंतंतन्महत्सदः ५ उदतिष्ठन्सदस्यास्तेस्वधिष्ण्येभ्यःसहाग्नयः ऋतेविरिंचंशर्वंचतद्भा
साक्षिप्तचेतसः ६ सदसस्पतिभिर्दक्षोभगवान्साधुसत्कृतः अजंलोकगुरुंनत्वानिषसादतदाज्ञया
७ प्राङ्निषण्णंमृडंदृष्ट्वानामृष्यत्तदनादृतः उवाचवामंचक्षुर्भ्यामभिवीक्ष्यदहन्निव ८ श्रूयतांब्रह्मर्षयोमे
सहदेवाःसहाग्नयः साधूनांब्रुवतोवृत्तंनाज्ञानान्नचमत्सरात् ९ अयंतुलोकपालानांयशोघ्नो
निरपत्रपः सद्भिराचरितःपंथायेनस्तब्धेनदूषितः १० एषमेशिष्यतांप्राप्तोयन्मेदुहितुरग्रहीत् पा
णिंविप्राग्निमुखतःसावित्र्याइवसाधुवत् ॥

इति समेताआसन् ४ प्रविष्टंदक्षमितिशेषः सदामदःमहतीसभा ५ स्वधिष्ण्येभ्यःस्वीयासनेभ्यः ६ ७ प्राक्पूर्वो
पवेशनात्पूर्वमेवनिषण्णमुपविष्टंमृडंशिवं मृडेनानादृतःतेनाभ्युत्थानादिभिरकृतादरःनामृष्यत्नासहत वामंवक्रंयथा
भवतितथाभिवीक्ष्य ८ मेवचनेश्रूयतां अज्ञानान्मत्सराद्वाब्रुवतः ९ स्तब्धेनउचितक्रियाशून्येनधृष्टेनेतिपा
ठेधृष्टेन १० तदेवाह एषइतिपद्यद्वयात् विप्राग्निसमक्षंसावित्रीतस्यायामेदुहितुःपाणिमग्रहीत् ॥ ॥

श्रीः भा॰ ४ टी॰ ५

मृगशावस्येव ईक्षणे यस्यास्तस्याः पाणिं मर्कटस्येव लोचने यस्य प्रत्युत्थानाभिवादार्हे मयि उचितं सम्मानं वाचापि नाकरोत् १२ अनर्हा
य कन्या दत्तेत्यनुतप्यमान आह लुप्तक्रियायेति सार्धैः चतुर्भिः चतुर्भिः उशतीं वेदलक्षणां गिरं १३ प्रेतावासेषु श्मशा
नेषु व्युप्ता विकीर्णाः केशा यस्य १४ चिताभस्मना कृतं स्नानं येन प्रेतानां स्रजो माल्यानि यस्य स प्रेतस्रक् नृणा
मस्थीनि भूषणानि यस्य शिव इत्यपदेशो नाममात्रं यस्य तमोमात्रात्मकः केवलं तमोरूप आत्मा स्वभावो येषां १५ उन्मा
दा भूतविशेषाः तेषां नाथाय दुर्हृदे दुष्टहृदयाय बतेति खेदे वा त्वमवत्वर्थः लुप्तक्रियायस्मिन् प्रमादिनि मे सर्वभिन्नसे
तव इति वादेदः तस्य परमेष्ठस्य मदीया मानुषी कन्या कथं योग्या स्यादिति लज्जादिना दातुमनिच्छन्नपि तत्संबंधलोभेन

गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः । प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितं १२ लुप्तक्रियाया
शुचये मानिने भिन्नसेतवे । अनिच्छन्नपि दां बालां शूद्रायेवोशतीं गिरं १३ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः ।
अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन् रुदन् १४ चिताभस्मकृतस्नानः प्रेतस्रङ्नस्थिभूषणः । शिवापदे-
शो ह्यशिवो मत्तो मत्तजनप्रियः १५ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनां । तस्मा उन्मादनाथाय नष्ट-
शौचाय दुर्हृदे १६ दत्ता बत मया साध्वी चोदिते परमेष्ठिना १६

दत्तवान् शूद्रायेत्यनर्हत्वमाह दृष्टान्तेन हीनत्वे पूर्वापरपरस्परवचनविरोधापत्तेः एतदुक्तं भवति यथा कश्चित् शूद्राय
वेदमर्थलोभेन दद्यात् तद्वदिति प्रेतावासेष्वित्यादि सर्वं विडंबनमात्रमिति स्वयमेवाह उन्मत्तवदिति अन्यथा उन्मत्त इत्ये
वावक्ष्यत् अपि च नाशिवो शिवो यस्मात् प्रमत्तो मत्तजनप्रिय इति छेदः पतिः प्रमथभूतानामिति भक्तवात्सल्यमाह
तामसानपि दोषमपनीय पातीति नष्टानामपि शौचं शुद्धिर्यस्मात् दुर्हृदे यस्ते मयापि कृते हृदि यस्य मदुर्हृदे
तस्मै बतेति हर्षे ब्रह्मणो वाक्यात् लज्जाभयादिकं परित्यज्य दत्तेत्यर्थः १६ ॥ ॐ नमो
भगवते वासुदेवाय ॥

अप्रतीपं अप्रतिकूलं अप्रथाभवन्तमेवमवस्थितमपि विनिंद्य १७ देवानां यजनसमये देवैः सह भागं न लभतां किंतु तेभ्यः पृथगेव लभतां अग्रभोजित्वात् यद्वा तेषु भक्तवत्सल लभतां सर्वपोषकत्वात् अत एव ततः देवगणाधमो यस्मात्सः १८ सदस्यैः तस्मात्स्थानाद्विनिःक्रम्य जगाम हे कौरव्य १९ गिरिशस्यानुगानामग्रणीर्मुख्यः रोष एव कषायः तेन दूषितः आरक्तनेत्र इत्यर्थः तस्य गिरिशस्यावाच्यतां वचनानर्हतां निंद्यतामित्यर्थः तेभ्योऽपि शापं विससर्ज

मैत्रेय उवाच विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे १७
अयं तु देवयजन इंद्रोपेंद्रादिभिर्भवः सह भागं न लभतां देवैर्देवगणाधमः १८ निषिध्यमानः स सद
स्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापं तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतं १९
विज्ञाय शापं गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः दक्षाय शापं विससर्ज दारुणं ये चा
न्वमोदंस्तदवाच्यतां द्विजाः २० य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि द्रुह्यत्यज्ञः पृथग्दृष्टिः तत्त्वतो वि
मुखो भवेत् २१ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया कर्मतंत्रं वितनुते वेदवादविपन्नधीः २२
बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् २३

२० दक्षे शापतिमार्थैस्त्रिभिः एतन्मर्त्यं देहं शरीरं उद्दिश्य अहंममतास्पदं अप्रतिद्रुहि प्रतिद्रोहमकुर्वति पृथग्दृष्टिः भेद
दर्शी तत्त्वतः परमार्थात् विमुखो भवेत् भवत्वित्येकः शापः २१ अज्ञत्वमेवाह गृहेष्विति कर्मतंत्रं कर्मप्रविकरं वेदे ये वेदा
अर्थवादास्तद्रूपेणैव वादेनैव मोक्षप्राप्तिः स्वर्गः तं भवतीत्याह य एते विपन्ना विनष्टा धीर्यस्य २२ पशोर्देहादिः तमेवा
त्मत्वेनाभिध्यायिन्याऽतिशीले यस्मात्तया बुद्ध्या विस्मृता आत्मनो गतिः तत्त्वं येन अतः पशुतुल्यः अतितरां स्त्रीकामोऽस्त्व
ति द्वितीयः शापः बस्तस्य मुखमिव मुखं यस्येति तृतीयः शाप २३ ॥

श्री:
भा-व-
टी-
६

अपेवश्रणयोस्यावुद्गपदपेत्याह विद्याबुद्धिः इयमेव नत्वविद्येतिबुद्धिर्यस्य अतोसौजडएवविद्वान्भवतिसमस्तंवित्तिसा
धोस्यांशार्वमन्यतइति तथानेअसुंदरत्वंयेवान्तवर्तनेतेसंसरंतजन्ममरणायतद्भवंवित्येकः शापः २४ श्रुतायोवेदरू
पायाःउाष्विएयाः पुष्पास्त्वेवार्थवादाः मनः क्षोभकत्वात् अर्थवादबहुनावाउन्यथैः मधुगंधतत्वेन अरोचनेन
मथ्नामनःक्षोभकेनउन्माथितआत्मामनोयेषांतेसंसक्तेषुकर्मस्वासक्ताभवंतितिद्वितीयः २५ सर्वभक्ष्याःभक्ष्याभक्ष्य
विचारशून्याः इत्थंदेहादिपोषणाय धृतानिविद्यातपोव्रतानियैः वित्तादिषुचयुराराचमोरतिर्येषांतेयाचकाः सं

विद्याबुद्धिरविद्यायांकर्ममय्यामसौजडः संसरंत्विहयेवाममनुशर्वावमानिनं २४ गिरःश्रुतायाःपु
ष्पिण्यामधुगंधेन भूरिणा मथ्नाचोन्मथितात्मानःसंसक्तंतद्धरद्विषः २५ सर्वभक्ष्याद्विजावृत्त्यैधृतवि
द्यातपोव्रताः वित्तदेहेंद्रियारामायाचकाविचरंतिह २६ तस्यैवंवदतःशापंश्रुत्वाद्विजकुलायधृतविद्या
कुलायवै भृगुःप्रत्यसृजच्छापंब्रह्मदंडंदुरत्ययं २७ भवव्रतधरायेचयेचतान्समनुव्रताः पाखंडिनस्तेभ
वंतुसच्छास्त्रपरिपंथिनः २८ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः विशंतुशिवदीक्षायांयत्रदैवं
सुरासवं २९ ब्रह्मचब्राह्मणांश्चैवयद्यूयंपरिनिंदथ सेतुंविधारणंपुंसामतःपाखंडमाश्रिताः ३० एषएव
हिलोकानांशिवःपंथाःसनातनः येपूर्वेचानुसंतस्थुर्यत्प्रमाणंजनार्दनः ३१ तद्ब्रह्मपरमंशुद्धंसतांवर्त्म
सनातनं विगर्ह्ययातपाखंडंदैवंवोयत्रभूतराट् ३२

तोविवरंत्विनिचशापचतुष्टयं २६ प्रत्यसृजत्प्रत्यदात् शापरूपंब्रह्मदंडं २७ सच्छास्त्रस्यपरिपंथिनः शत्रिकुलाः
२८ सुरागौडीपैष्टीमाध्वीचआसवस्तालादिसंभवंमद्यंदेहैकाद्यवचनेन तद्यत्रदैवंपूज्यदेवतावदादरणीयमित्यर्थः २९
ब्रह्मवेदंकथंभूतंसेतुमर्यादारूपंतदेवाह पुंसांवर्णाश्रमाचारवतांविधारणंधारकं ३० सेतुत्वंप्रपंचयति द्वाभ्यांएषवे
दलक्षणएवशिवःपंथाःयंपूर्वेमहर्षयः अनुसंतस्थुःआश्रितवंतः यत्रयस्मिन्जनार्दनःप्रमाणंमूलं ३१
भूतराट्भूतानांनाममस्तानांपतिः ३२ ॥

६

श्रेयोऽन्यथा पापेनोभयोः नाशात् विमना इवेति तथापि भगवदनुग्रहीतानां नाशो न स्यादिति भावः ३३ ऋषभः सर्व
श्रेष्ठो हरिः यत्रेष्टः पूज्यः ३४ तत्र सत्रे समाप्ते विधाय हे महेष्वास विदुर यत्र प्रयागे गंगा यमुनान्विता तत्रावभृथस्नानेन हता
तनः स्थाना ययुः ३५ इति श्रीभावार्थदीपिकायां चतुर्थस्कंधे द्वितीयोऽध्यायः २ तृतीये तु सतीतातयज्ञोत्स
वदिदृक्षया गमिष्यंती महेशेन वारितानीति हेतुभिः ध्रियमाणयोः श्वशुरजामात्रोर्वैरस्य तस्मात् १ रुद्रविहीनोऽय
तो नास्त्येव तथापि दक्षयज्ञस्वरूपस्य विघ्नो गोहेषाङ्गनाज्ञानतदैवेहेतरुक्तेः गर्वहेतुमाह यदेति प्रजापतीनामा
धिपत्येऽभिषिक्तः सदा तस्य स्मयो गर्वोऽभवत् २ गर्वादेव ब्रह्मनिष्ठानवज्ञानभिभूय तिरस्कृत्य वाजपेयेनेष्ट्वा बृह

मैत्रेय उवाच तस्यैवं वदतः शापं भृगोः स भगवान्भवः निश्चक्राम ततः किंचिद्विमना इव सानुगः ३३ ते
ऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ३४ आप्लुत्यावभृथं यत्र गं ॥
गा यमुनयान्विता विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ३५ इति श्रीभागवते चतुर्थस्कंधे द्वितीयोऽध्या च
यः २ मैत्रेय उवाच सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः जामातुः श्वशुरस्यापि सुमहानतिचक्र
मे १ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् २ इष्ट्वा स वाज
पेयेन ब्रह्मिष्ठानभिभूय च बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ३ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेव
ताः आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ४ तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम् सती दाक्षा ॥
यणी देवी पितुर्यज्ञमहोत्सवं ५ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः विमानयानाः सप्रेष्ठा निष्ककंठीः सुवा च

स्पतिसवेन यजेतेति श्रुतेर्वाजपेयेनेष्ट्वा समारेभे ३ कृतस्वस्त्ययनाः कृतमंगलाः सभर्तृकाः इति दक्षिणादिभिः अथ
समर्हिताना मपि पत्न्यः सहैतागुणवर्ह्णा मुक्तं ४ तत्र दा खेचराणां प्रजल्पतां सतो पितुर्यज्ञमहोत्सवं श्रुत्वा ५ तत्र व्रजंतीरु
पदेवानां गंधर्वादीनां वराः स्त्रियः सस्वस्त्ययनस्याभ्याशे इह मे प्रेष्ठ शुद्धांतस्त्र न्यायानि मध्यभाषते ति त्रयाणामन्वयः कथं
भूताः स्त्रियो दृष्टः विमानानि यानानि याः ग्रामीणाः प्रेष्ठैः सहिताः निष्कानि च दृष्कानि कंठेषु यासां शोभनानि वासांसि या

श्री॰
भा॰ च॰
टी॰ ७

लोलानि चंचलान्यक्षीणि यासां मृष्टानि मृष्टान्युज्ज्वलानि यासां ताः ७ निर्यापितः प्रवर्तितः हे वाम शिव ते यद्यर्थिता इच्छा तर्हि वयं च तत्राभिसराम गच्छाम ननु याया यियासो निर्धूतः यतो अमी विबुधा व्रजंति ८ औत्सुक्यं प्रकटयन्नाह तस्मिन्निति सुहृद्भिः पि तृभ्यामुपनीतं दत्तं परिबर्हं मंडनालंकारादिद्रव्यं भवता सह अर्हितुं स्वीकर्तुं कामये अर्हितुं स्वीकर्तुं कामये अर्हितमिति पाठे सत्कृ तं परिबर्हं ग्रहीतुं इच्छामीति ९ स्वसृर्भगिनीः भर्तृभिः संमताः सहिताः क्लिन्नधियं स्नेहार्द्रचित्तां चिरम् उत्कंठमुत्सुकं मनो यस्याः सा हं द्रक्ष्यामि हे मृड उन्नीयमानं प्रवर्त्यमानं अध्वरेषु ध्वजमिव दृश्यं श्रेष्ठमध्वरं यद्वा उन्नीयमानाः प्रयज्ञे केतुरूपं वा १० अहो किं तवा

दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः पतीन्भूतपतिं देवमौत्सुक्यादभ्यभाषत ७ सत्युवाच प्रजाप तेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल वयं च तत्राभिसराम वाम ते यद्यर्थितामी विबुधा व्रजं ति हि ८ तस्मिन्भगिन्यो मम भर्तृभिः स्वकैः ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः अहं च तस्मिन्भवताभिकामये सहो पनीतं परिबर्हमर्हितुं ९ तत्र स्वसृर्मे ननु भर्तृसंमता मातृस्वसृः क्लिन्नधियं च मातरं द्रक्ष्ये चिरोत्कंठमना मह र्षिभिरुन्नीयमानं च मृडाध्वरध्वजं १० त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकं तथा प्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिं ११ पश्य प्रयांतीरभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुभिः १२ ॥

आश्चर्यं येन न तवैतदौत्सुक्यमिति चेदत आह त्वयीति हे अज एतद्विश्वमाश्चर्यं रूपं तव ध्येव आत्ममायया रचितं विभाति अतो यद्यपि न तव नवमाश्चर्यबुद्धिः तथाप्यहं योषित् अतत्त्वज्ञस्वभावा न वेत्तत्त्वं न जानामि अतो दीना कृपणा सती हे भव मे भवक्षितिं ज न्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ११ दिदृक्षामेव व्यनक्ति पश्येति द्वाभ्यां हे अभव इति संहृदय योगः त्वत्तो अन्या तात स्यादितमितिभावः अन्या योषितः संबंधरहिता अपि प्रयांतीः पश्य कांतसखाः भर्तृसहिता वरूथशः संघशः कथंभूताः यासां विमानैर्नभो मंडितं ताः हे शितिकंठ नीलकंठ निःपरानुग्रहाय त्वया विषमपि भक्षितमिति सूचयति १२

हे स्वर्घ्य पितृगेहे स्वोत्सवं निशाम्य त्वं न यासि देहे कथं तेनैं गतेत्यहं न प्रचितं तथानाहूताः सन्तः कथं गच्छामः तत्राह सौ
हृदं स्वहृदः केतनं गृहं तथा भर्तृगुर्वादीनां च गृहे अनाहूता अप्यभियन्ति सन्तः हृत्समार्थं १३ हे अमर्त्य तत्तस्मात्प्रसीद
तदिदमेव वाञ्छितं कर्तुं भवानर्हति कारुणिकं त्वमेवाह अदभ्रचक्षुषा अनन्यज्ञानेन निरूपिता यात्मनो देहस्यार्धेऽहं निरूपि
ता अनुमतायाचनो यत्नो वा नाद्य अनुगृह्णाति त्वानोसि अतो मामनुगृहाण याचितः सन् १४ अभिभाषितो प्रियया चितः कृद्ध हासः याना
ह मर्मभिदं नियेनाकुवाग्ये मूर्तरूकुवाणान् संस्मारितः सन् १५ अनाहूता अपीति तथा यत्त्वदितं मुकं तत्तच्छोभन

कथं सतीयाः पितृगेहकौतुकं निशाम्य देहं सुरवर्य नेङ्गते अनाहूता अप्यभियन्ति सौहृदं भर्तुर्गुरोर्दे
हकृतश्च केतनं १३ तन्मे प्रसीदेदममर्त्य वाञ्छितं कर्तुं भवान्कारुणिको बतार्हति त्वयात्मनोर्धेहम
दभ्रचक्षुषा निरूपिता मानुगृहाण याचितः १४ ऋषिरुवाच एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्य
धत्त प्रहसन्सुहृत्प्रियः संस्मारितो मर्मभिदः कुवागिषून्यानाह को विश्वसृजां समक्षतः १५ श्री
भगवानुवाच त्वयोदितं शोभनमेव शोभने अनाहूता अप्यभियन्ति बन्धुषु ते यद्यनुत्पादितदोष
दृष्टयो बलीयसानात्म्यमदेन मन्युना १६ विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः
स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यन्ति हि धाम भूयसां १७ ॥

मेव किंतु अनात्म्ये देहादावहंकारः तत्कृतेन मदेन मन्युना च ते ते यदि अनुत्पादितदोषदृष्टयो भवेति तर्हि न
उत्पादिते अगमिते सो दृष्टिर्येषां ते १६ ननु विद्यादिगुणयुक्तेषु तः बाहृशेषु महत्स्व कथं दोषदृष्टिर्भवेत्तत्राह विद्या
दिभिरेवं संस्मृतौ हतायां विवेकज्ञानेन दृष्टमतिर्भूयसां महतां मानो यामतेनोन पश्यन्ति हि मनुगुणैः कथं विवेकना
शः तत्राह सतां गुणैर्विवेकहेतव अपि असत्तमानामितरैः दोषभूतैः अतएव तैर्भृतः धृतः पुष्टो वा अहंविद्या
नाम स्वन्यादिमनो मानदुः तेन दुर्लक्ष्या दृष्टिर्येषां ते १७ ॥

श्री: भा॰ वे॰ टी॰ ८

स्वजनव्यपेतयावंधुदृष्ट्याशङ्कागशनीयात्तनावलोकयेत् अनवस्थितचित्तत्वमेवाह येवक्रियाकुटिलयाबुद्ध्यास्पर्शेपतिया
रोपितासुतंभिनाभूर्यैषुजात्यारोपितभूणितेरारोपिताभूरितिवा १८ ननुस्वजनानांगृहेस्वहृद्भिर्गतव्यंतेषोचेष्टितेवसोढ
व्यंनतस्पर्दः महत्त्वादित्याह नतथेतिअरिभिः शिलीमुखैः वाणैः अर्दितांगः खेडितगात्रापितथानव्यथ्यते यतःशेतेस्वपि
तिस्वानांदुरुक्तिभिर्मर्मस्थनाडितोयथाहृयनाह्वदादिवानिशंतप्यति १९ मयितत्वगतायांनेयशंकेतिचेत्तत्राह व्यक्तं

वैनाहृष्टानांस्वजनव्यपेतयाग्रहाप्रतीयादनवस्थितात्मनो येभ्यागतानवक्रधियाभिवन्तेआरोपितभ्रू
भिरमर्षितात्तिभिः १८ तथारिभिर्नव्यथतेशिलीमुखैःशेतेर्दितांगोहृदयेनहूयता स्वानांयथावक्र
धियोदुरुक्तिभिर्दिवानिशंतप्यतिमर्मताडितः १९ व्यक्तंवमुत्कृष्टगतेःप्रजापतेःप्रियात्मजानामसिस्त
भ्रुसंमता अथापिमानंनपितुःप्रपत्स्यसेमदाश्रयात्कःपरितप्यतेयतः २० पापच्यमानेनहृदातुरेन्द्रियः
समृद्धिभिःपूरुषबुद्धिसाक्षिणां अकल्प
एषामधिरोढुमंजसापरंपदंद्वेष्टि
यथासुराहरिम् २१ ॥

निश्चितंउत्कृष्टकृतिः स्थितिर्यस्यतस्यात्मजानांकन्यानांमध्येत्वंप्रियेतिमेसंमतासि पितुःसकाशात्मानंनलप्स्यसेम
दाश्रयात्ममसंबंधात् २० ननुभगवंस्त्वयाकिमितिदक्षःतिरस्कृतोयतोसौत्वांद्वेष्टिअतआह पापच्यमानेनात्यंतदह्य
मानेनहृदातुरेन्द्रियः कामिभिःपुरुषोजीवःतस्यबुद्धिःचित्तंतत्साक्षिणांनिर
हंकाराणामित्यर्थः समृद्धिभिःपुण्यकीर्त्यादिभिः एषांप
दंस्थानंयेष्वर्येणाधिगमकल्पः अशक्तःसन्परंपदंद्वेष्टिअ
सुरायथाहरिं केवलंद्वेष्टीति २१

ननुवध्यप्रत्युत्थानविनयाद्यकरणाद्देवज्ञानं प्रवासीनं तत्राह हे सुमध्यमे प्रत्युद्गमादिकं मिथो जनैर्यद्विधीयते तत्तथा
देहिनः साधु विधीयते साधुत्वमेवाह परस्मै श्रीवासुदेवाय गुहाशयायान्तर्यामिण एव तच्चेतसैव परिशुद्धेन तस्मिन्नु का
यिकव्यापारायोगात् अतो न यो मिहुह्यामनसा सर्वं कृतमिति भावः २२ किंच न केवलमभ्यागतेष्वेव वासुदेवदृ
ष्ट्यानमनं क्रियते किंतु विप्रमेवमनसि वासुदेवस्थितं तत्राह विशुद्धं सत्त्वमन्तःकरणं सत्त्वगुणो वा वासुदेवशब्दितं व
सुदेवशब्देनोक्तं ऊतः यत्तस्मात्तत्र तस्मिन्सत्त्वे पुमान् वासुदेव ईयते प्रकाशते अपगतमाहृतमावरणं यस्मात्सत्त्वा
मर्थः वासुदेवे भगवति प्रतीयत इति हि वासुदेवः परमेश्वरः प्रसिद्धः स च विशुद्धे सत्त्वे प्रतीयते अतः प्रत्ययवार्थेन प्र

प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव
न देहमानिने २२ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः सत्त्वे च तस्मिन्भगवान्वासुदेवो
ह्यधोक्षजो मे मनसा विधीयते २३ तत्ते निरीक्ष्यो न पिताऽपि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये यो विश्व
सृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाकरोत्तिरः २४

प्रसिद्धेन शब्देनायमर्थो निर्दिश्यते यतः वासयति देवमिति व्युत्पत्त्या वा वसत्यस्मिन्निति वा वसुदेवः दीप्यते द्योतत इति वा
वसुभिः गुणैः दीव्यति प्रकाशत इति वा वासुदेवशब्दवाच्यं शुद्धं सत्त्वं ततः किमत आह सत्त्वे च तस्मिन्नु मे मया नमस्कारे
णानुविधीयते सेव्यत इत्यर्थः मनसेति पाठे मनसा विशेषेण धीयते ध्यायते चिन्त्यत इत्यर्थः स यतः अधोभूतेषु प
त्याहृतेष्विन्द्रियेषु जायते प्रकाशते इन्द्रियागोचर इत्यर्थः २३ तस्माद्ध्याननिरोधत्वात् देहकृदपीति पोषकत्वादिति औपचा
विकपितृत्वव्यावृत्त्यर्थं हि द्विट् शत्रुः तदेवाह
देवरोरुदत्तः विश्वसृजो यज्ञगतं मा
मिरयन्त्येव तिरस्कृत्य तिरस्कृतवान् २४

श्री॰ भा॰ च॰ टी॰ ४

विक्षेपे दोषमाह यदीति मद्वचो ऽतिहायाऽतिक्रम्य यतः संभावितस्य स्वप्रतिष्ठितस्य यदा भवति तदा स पराभवः तस्य मरणा
यकल्पते २५ इतिभावार्थेचतुर्थेतृतीयः ३ चतुर्थेपि पतिं द्विषा गतापि शिवमानिना रुषा निर्भर्त्स्यतायत्तेजसा देहमि
तीर्यते उभयत्र त्यागेन बलान्निवारणेन च सुहृद्दिदृक्षुः निष्क्रामने भवात्परिशंकिता पुनर्निर्विशती च तदा सा सती द्विधा सबभू
व ः १ सुहृद्दिदृक्षायाः प्रतिघातेन दुर्मनाः अश्रुकणैः कलाभिः लेशैः अतिविह्वला आकुला अप्रतिपुरुषं असमानं पुरु
षांतरवर्जितं प्रधक्ष्यतीव भस्मीकरिष्यतीव रुषा जातो वेपथुः कंपो यस्याः २ ततस्तं विहाय पित्रोर्गृहानगात्कथंभ

यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणा
य कल्पते २५ इति भागवते चतुर्थस्कंधे तृतीयोध्यायः ३ मैत्रेय उवाच एतावदुक्त्वा विरराम शंकरः पत्‍न्यं
गनाशं ह्युभयत्र चिंतयन् सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधास सा १ सुहृद्दिदृक्षा
प्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः २
ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा पित्रोरगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णात्मनो यो ऽर्ध
मदात्सतां प्रियः ३ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः सपार्षदयक्षा मणिमन्मदादयः
पुरोवृषेंद्रास्तरसा गतव्यथाः ४ तां सारिकाकंदुकदर्पणांबुजैः श्वेतातपत्रव्यजनस्रगादिभिः गीतायनैर्दुंदु
भिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः ५

ता यः प्रीत्या तस्यै आत्मनो देहस्यार्धमदात् त्यागे हेतुः स्त्रैणं स्त्रीस्वभावः तेन विमूढा धीर्यस्याः सा ३ द्रुतविक्रमां शीघ्रं गच्छं
तीं मणिमत्पार्षदे यक्षैः सह वर्तमानाः मणिमान्मदश्च आदिर्येषां ते पुरः पुरतो वृषेंद्रो येषां ते गतव्यथा निर्भयाः रुद्रातिक्रमेण तस्या
गमनात् आगता व्यथा इति वा ४ तां वृषेंद्रमारोप्य सारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिश्च
विटंकिताः कोपिता ययुः सारिकापठननिरूपिता पाठ्याणि गीतायनैः गीताश्रयैः ५

आम्नं मंत्राद्यो वेदघोषः तेनोर्जितशोभमानं यज्ञसंबंधि पशुविशसनं यस्मिन् यद्वा तेनोर्जितमतिशायितं यज्ञवैश
सं परस्परं स्पर्धा यस्मिन् तत् यजनं यज्ञस्थानं समाविशद्देवी विबुधैः सुरैः जुष्टं मृदादिभिः निसृष्टानि निर्मितानि भांडानि
पात्राणि यस्मिन् ६ कश्चन नाद्रियत नाहृतवान् यज्ञकृतो दक्षात् यद्वा येन स्मात् तद्धेलः तेन विमानितां स्वसृजं
जननीं च मनेनविना नास्मात्सादराः परिषस्वजुः आलिंगितवत्यः प्रेमास्रुभिर्निरुद्धः कंठो यासां ७ अप्रतिनंदिता

आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडं
यजनं समाविशत् ६ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ऋते स्वसॄर्वै ज-
ननीं च सादराः प्रेमाश्रुकंठाः परिषस्वजुर्मुदा ७ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च
सादरं दत्तां सपर्यां वरमासनं च सा नादत्त पित्राप्रतिनंदिता सती ८ अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा
च देवे कृतहेलनं विभौ अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ९ जगर्ह सामर्ष-
विपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयं स्वतेजसा भूतगणान्समुत्थितान्निगृह्य देवी जगतोभिशृण्व-

तः १० ॥

अनादृता सती नादत्तेन गृहीतवती कथं सौदर्येण सोदर्येण भगिनीनां यः संप्रश्नः तत्र समर्था योग्या या वार्ता त-
या सहैव नावनादत्तना सुधारणादित्यर्थः ८ न विद्यते रुद्रस्य भागो यस्मिन् तं देवे रुद्रे कृतं हेलनं अवज्ञानं आहरणाय क-
हारणात् ९ जगर्ह निंदितवती अमर्षेण क्रोधेन विपन्नाव्यक्ता न या शिवं द्वेष्टीति शिवद्विट् तं धूमपथः कर्ममार्गः
तत्र श्रमः अभ्यासः तेन स्मयो गर्वो यस्य दत्तवधाय समुत्थितं स्वान्तयानिगृह्य निवार्य १० ॥

श्री:
भा॰ व॰
टी॰
१०

निंदामेवाहं न यस्येति तयोरश्रामिः भुक्तवैरकंन्यक्त विशेषेण स्मिन्नुपिवे भवेनं स्नेनेविना वा नमः प्रतीपयन् प्रतिकूल
माचरेत् वैवाभावेहेतवः यस्य लोके तिशायनः अतिशयितो नास्ति तथा प्रियस्याप्रियश्च नास्ति समासपाठे अति
शायेन प्रियो नास्ति देहभृतो प्रियो यस्मान्नातस्य समस्तस्यात्मभिकारणभूते सम मस्तरूप एवनिवा ८ तस्य च प्रतिकू
लकावर्णं देयामहन्नमशोहेतास्यत्तान्नदोहेणचतत्रपुरुषाणां वान्तविध्यंवदंतीमहन्नमशोहमेंहृदोषानितिद्वाभ्यां
हेहिजत्यपितेपः भवादृशाः वद्विधाः अनपकाः परेषां गुणेषु दोषानेव गृह्णंतिनतयगणाः केचित्मध्यस्थागुणेषु दो

देवीउवाच नयस्य लोके स्यनिशायनः प्रियः तथापियो देहभृतोप्रियात्मनः तस्मिन्समस्तीत्मनिमुक्त
वैरके कसेनेभवं नेकनमः प्रतीपयेत् ९ दोषान्परेषां हि गुणेषु साधवो गृह्णंति केचिन्न भवादृशोद्विज
गुणांश्च फल्गुन्बहूलीकरिस्नवोमहन्नमासंबविदद्भवान्तवे १० नाश्चर्यमेतत्यदसत्सुसर्वदामहद्वि
निंदाकुणपात्मवादिषु मेर्षांमहापुरुषपादपांसुभिनिरस्ततेजःसुतदेवशोभन ११

यात्र गृह्णंति किं न यथास्थितान्गुणान्दोषान्विवेकेन गृह्णंति नेषु मह्यं तंउच्यते साधवस्तु केवलं गुणानेव गृह्णं
ति न दोषान् तेन मस्सम राउ च्येते महत्तमा मास्तु दोषाने गृह्णंति प्रत्युत फल्गुनुगुणान् सपिगुणान्बहूलीकरिस्नवोभवे
तितेषु भवान् प्रथमपिदतत्पिदितवानूकल्पितवानित्यर्थः तच्चभ्रातो स्पष्टानभिभयकल्पितवानित्यनेनसूचितं १० य
तच्चडुर्जनेषु मुक्तमेवेत्याहनेति कुणपेजडेशरीरे न देवात्मेति वदति येतेषु ईर्ष्या असूयाति: सेष्याय याभवतोवमहतो
निंदेतियदेतदाश्चर्यं नभवतिसेर्ष्यं निरस्तो तेजः प्रभा येषामिति वाय द्यपिमहापुरुषाः स्वनिंदासहंते तथापितत्पा
दरेणवः तदस्सहमानाः तेषां तेजांसि निरस्यन्ति अतोयत्के पुमहन्निंदनमेवोचितमित्यर्थः ११ ॥
शमकृत्साप्यनम:

नदेवं महदेहमुक्तानस्मिन्नेव हननदोषमाह ॥ यदिति ह्यभं यस्य यत्त्वरमाकेशिवइति तस्मिन्देनामनृणां सर्वे
षामाशु सर्वमेव देहनिकेवलं तिशिवैवितं उत्ताविते ननमनः सर्वकं नश्यसरूदयि प्रसंगाद्यपिनेशिवं दृष्टि नलेख्य
प्रासन माज्ञो यस्य स्नेहोशिवेनरः श्रमेगलदूषः १४ पापहेतून च सकं भुक्तिमुक्तिप्रदत्वेन शिवे वर्णयन्नाह
यस्य पादपद्मे मनो स्थेवाल ``` ब्रह्मासः ब्रह्मावेदः सप्तवासवो मकरेदः भट्टार्थिभिः यद्वार्थिनः सकामस्य लो
कस्यानाशाशिषो वर्षति १५ यत्त्वं श्रावापदेशोत्यशिवइति यद्वाकेप्रेन नामे स्थित्यादिनदाशिपेत्याह किंवेति

यद्वात्वरे नाम गिरिरिति नृणां सकृत्प्रसंगाद्यमाशु हेतितत् पवित्रकीर्तिमलेख्यशासने भवान्
देहदृष्टिशिवे शिवेतरः १४ यत्पादपद्मे महतो मनोलिभिर्विषवितैर्ब्रह्मरसासवार्थिभिः लोकस्य
यद्वर्षति वाशिषोर्थिनः तस्मै भवान्स्यात्तिविष्णुवेयवे १५ किंवाशिवाख्यमशिवं न विदुस्तदन्ये
ब्रह्मादयः तदवकीर्यजटाः श्मशाने जन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्द्धभिर्दधति तच्च
रणावसृष्टं १६ कर्मणोपि शायपनिरथा यदकल्पईशो यमीवितर्य सरसिभिर्नृभिरस्यमाने खियास
सह्यकवतीमस्तनी प्रभु स्वेच्छिहाम स्तनपितनो विसृजेत्स्य यमः १७ ॥

योजनस्य स्ववकीर्य श्मशाने स्ववसतः स्वसति स्वनस्यश्मशानस्य माल्यानि भस्मानि नृकपालानि च भूषणत्वेन संति यो
स्य तत्वेनान्येन विदुः किं वदंत्येवेति वेत्नेन यासति ते बोतद्यासोनुपपत्तेरित्याह तत्त्वरणादवसृष्टं गलितं निर्माल्य
शमूर्द्धभिधारयति ते १६ इदानीं देहत्यकेकामाय मे नत्रमाह कर्णाबाह्यादिविनिर्गच्छत यद्यपि मंत्रं मारयितेवा
कल्याव भवति कदाचमीवितरियमेवत्रके इशोस्वामिति प्रसत्तिभिर्विरउशेनृभिरस्यमाने श्रियपितियमाने प्रभुः
शक्तिः वेनरूपवतीमकल्याणवादिनी प्रसत्त्वबलात् छियातनतोपि स्वयं प्राणान्विसृ
जेदिति यन्मयमः १७ ॥

ननुवक्तुत्वं षितिकंठीनीलकंठः नन्विंद्रकावश्मादानअन्नस्यापविन्नस्यत्यागेविनानशुद्धिरिति दृष्टांतेनाह जप
स्यभक्तितस्याज्ञस्योहरणेवमननमेवपुंसः शुद्धिप्रवर्त्तते १७ यदुक्तं त्वमक्रियायाश्चवयश्चतितत्रस्याह नेतिवेदवादान्
विधिनिषेधरूपान्स्वएवलोकवात्मन्यवस्वमामात्मस्यमहतो मुनेः सम्यग्विरक्तस्यमतिः नानुवर्त्ततेनिवृत्ताधिकारत्वा
त् प्रथिकारभेदे दृष्टांतः यथादेवानांगतिराकाशएवमनुष्याणांपृथिव्यामेव अतः स्वधर्मएव प्रवृत्तिलक्षणोनिवृत्तिल
क्षणोवास्थितः मनुःपरमत्यंधर्मंपुरुषंवानतिपेत्त व्यवस्थिताधिकारत्वेनोभयोः सत्यत्वान्नदिपदेवेतिवान्वयः १९

अतःसंयोगत्वमिदंकलेवरंनधारयिष्येशितिकंठगार्हितः जन्यस्यमोहाद्धिविशुद्धिमेयसोजगप्रसिवस्यो
हरणेप्रवर्त्तते १८ नवेदवादाननुवर्त्ततेमतिःस्वएवलोकेरमतेमहामुनेः यथागतिर्देवमनुष्ययोःपृथ-
क् स्वएवधर्मेनपरंक्षिपेत्स्थितः १९ कर्मप्रवृत्तेनवनिवृत्तेनमत्तेतेवेदेविविधोभयलिंगमाश्रितं विरो-
धितयोगपदेककर्त्तरिद्वयेतथाप्नस्माणिकर्मनच्छति २०

यत्रदेवोपचारयन्याह अष्टत्वमग्निहोत्रादिनित्यंतंशमदमादिश्रुतंसत्यमेवयतः वेदे समाश्रितंविहितंतद्विविविच्यतत्तु-
व्यवस्थायाश्रितेनत्वविशेषेणाव्यवस्थायाश्रिते व्यवस्थामेवाह उभयेरागवैराग्यलक्षणेलिंगेऽपिमधिकारिविशे-
षेयस्मिन्सत्य ननुयावज्जीवमग्निहोत्रंजुहोतीत्यादिनायांतइत्यादिषुनैवंव्यवस्थाप्रतीयतेसत्यंतथाप्युभयोरेकाधि-
कारेविरोधात्तथापर्यवस्यतीत्याह युगपद्भावोयोगपद्यंयोगपद्येनैकस्मिन्कर्त्तरितत्कर्मद्वयेविरोधन्तुनहिनिवृत्ते
कर्मणिविवेनापिकर्त्तव्यमेवतेन्याह बलात्तिष्ठाशिवेकिंचिदपिकर्मवत्तेजिनप्राप्नोति अतोयथाप्रवृत्तनिवृत्तमायाःपर
स्पधर्माकारणेनदोषः तयोःपूर्वंतद्वभयधर्माकरणेःप्रीतिभावः २०

विनाभस्मकृतस्नानः नग्नानग्न इत्यादिनायोभोगाद्यभावउक्तः तत्राहहेपितः अस्माभिरास्थिताराश्रिताः पदव्यः
अणिमादिसमृद्धयः वः युष्माकं नसंतीत्यर्थः यतोवः पदव्योयज्ञशालासुएवमवेति ताश्चतदन्नेनयज्ञगतेनान्नेन
तृप्तैः केवलमीडिताधूमवर्त्मभिश्चभुज्यंतेयाअस्मत्पदव्यः तास्तुनैवंभूताः किंतुअव्यक्तलिंगाः अव्यक्तंलिंगंहे
तुर्यासांइच्छामात्रप्रभवत्वात् अवधूतैर्ब्रह्मविद्भिःसेविताः अतोहमाद्योहंदोदरिद्रइतिगर्वमाकृथाइतिभावः २१
किंबहुनोक्तेनइमंदेहंत्यक्ष्यामीत्याह ह्रामांपनेननालेर्यनेकिमपिबलमेव कथंभूतेनकुजन्मतदेवाह

मावः पदव्यः पितरः सदास्थितायायज्ञशालासुनधूमवर्त्मभिः तदन्नतृप्तैरसुभृद्भिरीडिताअव्यक्त
लिंगाअवधूतसेविता २१ नैतेनदेहेनहरेकृतागसोदेहोद्भवेनालमलंकुजन्मना व्रीडाममाभूत्कुज-
नप्रसंगतःतज्जन्मधिग्योमहतामवद्यकृत् २२ गोत्रंत्वदीयंभगवान्वृषध्वजोदाक्षायणीत्याहयदा-
सुदुर्मनाः व्यपेतनर्मस्मितमाशुतद्ध्यहंव्युत्स्रक्ष्यएतत्कुणपंत्वदंगजं २३ मैत्रेयउवाच इत्यध्वरे
दक्षमनूद्यशत्रुहन्क्षितावुदीचीनिषसादशांतवाक् स्पृष्ट्वाजलेपीतदुकूलसंवृतानिमील्यदृग्योग-
पथंसमाविशत् २४

हरेकृतागसःअपराधस्यतवदेहादुद्भवेनएतेनतन्नत्यक्ष्याम्येवायंदेहः कथंभूतेनाहत्याह कुजनस्यतवप्रसंगतःसंबंधात्मम-
लज्जाभूत् अतः योमहतोअप्रियकर्तातस्माद्यज्जन्मतद्धिक् तस्मैवेधात्यक्ष्याम्येत्यर्थः २२ किंचपरिहासा
दिरहितेनापिदाक्षायणीतिमेबोधयन् त्वदीयंत्वत्संबंधवाचकंगोत्रंनामयदावृषध्वजआह शृण्वतिनदेहे
व्यपेतनर्मस्मितंयथाभवत्येवंसुदुर्मनाअतिदुःखितचित्ताभवामि ततस्माद्धितिश्चितेएतत्कुणपंशवंअंगं
त्यक्ष्यामि २३ इत्येवमध्वरेनुवादंकृत्वाशत्रुहन्हेक्षोणौदिविस्थितापि उदीचीउदीच्यांदिशायांनसीदउदकस्पृष्टवेशा
नवाक्गृहीतमौनाजलंस्पृष्ट्वाआचम्यदृकहृशाम २४ ॥

श्री: भा॰ च॰ टी॰ १२ योगमार्गमेवाह कृत्वेति अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिकौ निरोधेन समानौ नाभिचक्रे कृत्वा ततः उदानमुत्थाप्य
धिया सह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् २५ महतां पूज्य २६ चरणाम्बुजे आसवं भजनानंदं भक्त्वा
परं च ददर्श देहस्तु सद्यः प्रज्वलितोऽभूत् समाधिना जातो योऽग्निस्तेन २७ खे भुवि च हाहेत्यादि वादः तमेवाह हंतेति

कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रु
वोर्मध्यमनिंदितानयत् २५ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् जिहासती दक्ष
रुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणां २६ ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिंतयती न चाप
रं ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना २७ तत्पश्यतां खे भुवि चाद्भुतं महद्धा
हेति वादः सुमहानजायत हंत प्रिया दैवतमस्य देवी जहावसून्केन सती प्रकोपिता २८ अहो अनात्म्यम
हदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः जहावसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति २९
सोऽयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेऽपकीर्तिं महतीमवाप्स्यति यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृ
तयेऽपराधतः ३० वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतं दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः ३१
तेषामापततां वेगं निशाम्य भगवान्भृगुः यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ३२

ति विषादे दैवतमस्य प्रिया केन दक्षेण प्रकोपिता सती २८ महदनात्म्यं दौर्जन्यं अस्य सर्वत्र स्नेहप्रवृत्याय्यस्याङ्गः तस्ये
तियेन विमना अवज्ञाता २९ दुर्मर्षमसह्यं हृदयं यस्य लोके जनमध्ये ब्रह्मध्रुक् किं च यद्यतः स्वीयामंगजां सुतां
अपराधतः स्वाचनयाद्युतये मरणायोद्यतां न निवारितवान् पुरुषद्विट् शिवद्वेष्टा ३० अद्भुतं दृष्ट्वा च ३१ यज्ञघ्ना
हंतीति यज्ञघ्नघ्नेन अपहतं रक्ष इत्यादिना ३२

अध्वर्युणा भृगुणा येन तपसा सोमं प्राप्ताः ऋभवो नाम देवा उत्थिताः ३३ ब्रह्मतेजसा उशद्भिर्दीप्यमानैः ३४ इ
ति श्रीभागवते चतुर्थस्कंधे चतुर्थोध्यायः ४ पंचमे तु सतीदेहत्यागमाकर्ण्य शंकरः वीरभद्रं समुत्पाद्य तेन दक्ष
मघातयत् प्रजापतेर्दक्षस्य निधने कृते ते नाम असत्कृतायाः तस्याध्वरे ये ऋभवो देवास्तैः १ सधूर्जटिः रुद्रः घोरः सन्
जटामुत्कृत्य उत्पाट्य उत्थितः सन् तां भुवि विससर्ज सुदष्टौष्ठपुटो येन तडितो वह्नेश्च सटाः ज्वालास्ताभिरुग्रो रो

अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ३३ तैरलातायुधैः स
र्वे प्रमथाः सहगुह्यकाः हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ३४ इति श्रीभागवते चतुर्थस्कंधे सतीदे
होत्सर्गो नाम चतुर्थोध्यायः ४ मैत्रेय उवाच भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदा
त् स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे १ क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटिर्जटां
तडिद्वह्निसटोग्ररोचिषं उत्कृत्य रुद्रः सहसोत्थितो हसन् गंभीरनादो विससर्ज तां भुवि २ ततोतिका
यस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घनरुक् त्रिसूर्यदृक् करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विवि
धोद्यतायुधः ३ तं किं करोमीति गृणंतमाह बद्धांजलिं भगवान्भूतनाथः दक्षं सयज्ञं जहि मद्भटानां त्व
मग्रणी रुद्र भटांशको मे ४ ॥

चिर्यस्यास्तां २ ततो जटायाः सकाशात् अतिकायो वीरभद्रो जात इति शेषः तनुवा तन्वा देहेन दिवं स्पृशन् अ
त्युच्च इत्यर्थः घनरुक् कृष्णवर्णः त्रयः सूर्या इव दृशो नेत्राणि यस्य करालास्तुंगा दंष्ट्रा यस्य ज्वलन्नग्निरिव मूर्धजा
यस्य कपालमालायुक्तः विविधान्युद्यतानि आयुधानि यस्य ३ हे रुद्र हे मदंश मद्भटानां मम भटानां त्वमग्रणीः सन् सय
ज्ञं दक्षं जहि ब्रह्मतेजो दुर्जयमिति मा मंस्थाः यतस्त्वं मम अंशकः ४ ॥

श्री० भा० चं० टी० २६

मन्युना रुद्रेण परिविक्रमे प्रवक्रमे प्रदातिणीव कार असंगमप्रतिघातं यत् वेहोवेगः ननभोतानमहीयसो बलीयस मपिमरः सहिसुं बलं साहुंसेममेने ६ जगदंतको मृत्युः तस्यापि अंतकं मम्लेचो वयंति पाहुंऊर्वतीति चोवेणानिन्न प्रदीनि भूवणानि यथा तौ संज्ञी यस्य सः ७ ककुभि दिशि नमान भवति किं तरजतिज्ञा वाङ्‌गः इजपतत् ऊतोभन् दध्युः चिंतयामासुः हे वेतरभवे नौ स्यातिकं कल्पयंति वाताउति दस्त नाम भावे हेतः प्राचीनबर्हिः नयनीननोरा।

प्राक्तनपनं ऊपितेन मन्युना सदेव देवं परिविक्रमेविधुं मेनेतदात्मानमसंगवहसामहीयसोतानसहःस हिम्नु ५ अन्वीयमानाः सनरुद्रपार्षदैर्मृशीनदाड्रिव्यनदत्सभैरवं उद्यमप्पलेजगदंतवोतकं सप्राहव द्वीपाणभूषणांविद्व ६ अप्यर्वि जोपजमानाः सदस्याः ककुभु दीवोपसमीत्य वेरणु तमः किमेतत्कृतप तंद्रजो भूदिति हिजाद्विजपत्न्यश्चदध्युः ७ वाताननवातिनहिंसंति दस्यवः प्राचीनबर्हिर्जीवति— होग्य दंडः गावो नकाल्यंतउदंऊतोरजो लोकेऽधुना किं प्रलयाय कल्पते ८ प्रसूतिमिश्राः स्त्रिय उद्विग्नवि ता ऊचुर्विपाको वृजिनस्यैव न स्यै यत्पश्यंतीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्याव नागो यस्यांत कालेव्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः वितत्य नृत्यत्युदितास्त्र दोर्ध्वजानुच्चाटहासस्तन यित्नुभिन्नदिक् १० ॥ ॥

नाजीवतिनकल्यं तेन पीञ्जं वीर्यंते ६ प्रसूतिर्दक्षपत्नी तामिश्राः मुख्याः सां विपाकः फलं पश्यंतीनामितितस्याइःखा थिकं हेतुः अवदध्यौ अवज्ञातवान् अनागामनागसं ९ नवेदं सतावज्ञामात्रे किं तद्भाव ज्ञानं अतो नास्य रुद्रभ। विषयं तीत्याहुः पस्येति ह्यभ्यां युगमोवि कीर्णो जटाकलापो यस्य स्वशूलस्याग्रेऽर्पिताः प्रेता दिग्गजेंद्रा यस्य उ… नात्म नमिनान्यस्त्राणि ये… दोषो वा हव यवध्वजाः नाविततयः हासाः तस्यस्त्रैः अट्टहासः कवोरोहासपवस्तनयित्नुगजि

२३

अमर्षयित्वा अमरहन् मखे कृत्वा मन्युष्ठितं क्रोधव्याप्त उद्दस्ततः उत्थितो भगणो नत्त्वा संचोयेन पुनः प्रतं कोपयतो वि
यात्मयपि किं स्वस्ति स्यात् नस्यादेकाप्यस्य कथा ॥ उद्विग्ना प्रवलिना हृष्यस्य जनेन बद्धयथा भवत्येव मुच्यमाने
सति उत्पाततमाः महोत्पाता उत्थिताः पर्यक् सर्वतश्चकंपभूता महात्मनोपि दक्षस्य भयावहाः १२ नानाश्चायुधा
नि येषां वामनकैर्ह्रस्वैरुद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोदराननं येषां तैः परितो धावद्भिस्वरू

अमर्षयित्वा तं महद्युते जन्संमन्युस्तं दुर्विषहं भ्रुकुट्या करालदंष्ट्राभिरुदस्तभागणो ह्यास्वस्ति किं को
पयतो विधातुः ११ बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मुहुर्महात्मनः उत्पेतुरुत्पाततमाः सह
स्रशो भयावहा दिवि भूमौ च पर्यक् १२ तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः पिंगैः
पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत १३ केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथापरे सद
आग्नीध्रशालां च तद्विहारं महानसं १४ रुरुजुर्यज्ञपात्राणि तथैकेग्नीननाशयन् कुंडेष्वमूत्रयन् केचि
द्बिभिदुर्वेदिमेखलाः १५ अबाधन्त मुनीनन्ये एके पत्नीरतर्जयन् अपरे जगृहुर्देवान्प्रत्यासन्नान्पला
यितान् १६ भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिं चंडेशः पूषणं देवं भगं नंदीश्वरोग्रहीत् १७ सर्व
एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् १८ जुह्वतः स्रुवहस्तस्य
श्मश्रूणि भगवान्भवः भृगोर्लुलुंचे सदसि योहसत् श्मश्रु दर्शयन् १९

वः १२ यज्ञशालायाः पूर्वपश्चिमस्तंभयोः अर्पितं पूर्वपश्चिमायतं काष्ठं प्राग्वंशः तं यज्ञशालायाः पश्चिमतः पत्नी
शालां यज्ञशालायाः पुरतः स्थितं सदो मंडपं सदसः पुरतो हविर्धानं तस्योत्तरतः आग्नीध्रशालायां तद्विहारं यजमा
नगृहं महानसं पाकभोजनशालां १४ रुरुजुः बभंजुः उत्तरवेदिमेखलाः सीमासूत्राणि १५ १८ ग्रावभिरर्द्यमा
नाः नैकधा अनेकधा उद्द्रवुः १८ स्रुवो हस्ते यस्य भवो वीरभद्रः लुलुंचे उत्पाटितवान् १९

उज्जहार उद्धृतवान् सदस्थः सभायामुपस्थितः सन् शपंतं शिवनिंदां कुर्वंतं दक्षं अक्ष्णा निकोचेन असूसुचत् प्रेरितवान् २०
कलिंगदेशराजस्यानिरुद्धहासाद्बलभद्रो यथा पातितवान् तद्वत् दंतान्पातितवान् गरिमणि गुरुतरे रुद्रे निंद्यमाने दतः दंतान्दर्शयन्
योऽजहास पूष्णोरिति पाठे द्विवचनमेकशेषोऽस्य भगस्य च तस्मादितस्यापि पिष्टस्योर्दितन्नामस्यर्थं सूचितवान् तथा हि पूषा
पिष्टभागो दंतको हि नं देवा ... इति विहितस्य पौष्णस्य द्विदैवत्याभावात् न तत्र तस्य दतः संतीति वक्तव्यं स्यात् नचैत

भगस्य नेत्रे भगवान्पातितस्य रुषा भुवि उज्जहार सदःस्थोऽक्ष्णा यः शपंतमसूसुचत् २० पूष्णो ह्यपाति-
यद्दंतान्कालिंगस्य यथा बलः शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः २१ आक्रम्योरसि दक्षस्य शितधारे-
ण हेतिना छिंदन्नपि तदुद्धर्तुं नाशक्नोत्त्र्यंबकस्तदा २२ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः विस्मयं प-
रमापन्नो दध्यौ पशुपतिश्चिरं २३ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे यजमानपशोः कस्य कायात्तेना-
हरच्छिरः २४ साधुवादस्तदा तेषां कर्म तत्तस्य पश्यतां भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः २५ जुहा-
वैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयं २६ इति श्रीभागवते चतु-
र्थस्कंधे दक्षयज्ञविध्वंसो नाम पंचमोऽध्यायः ५

तं गच्छत इत्याशंक्यान्यस्य दंतपातो नोक्तस्याभेदेऽप्यह तेन द्विवचनेन ज्ञाप्यते अत एव पूष्णो ह्युग्रहं हे यथा वक्ष्यति पूषा-
तु यजमानस्य दद्भिर्भक्षयिष्यतीत्यर्थः २१ छिंदन्नपीत्यत्र शिरः उपरि त्यक्तुमभविष्यति त्र्यंबको वीरभद्रः २२ शस्त्रा-
स्त्रान्वितैर्मंत्रैः सहितैः अनिर्भिन्ना त्वक् यस्य तं यथाभूतं दृष्ट्वेति शेषः २३ स पशूनां पतिः मखे संज्ञपनं योगं कंठनिष्पीडनादि-
रूपं मारणोपायं दृष्ट्वा तेनोपायेनाहरत् २४ अन्येषां भूतप्रेतादीनां तद्विपर्ययः असाधुवादः अभूदिति शेषः २५ गुह्य-
कालयं कैलासं २६ इति भावार्थे चतुर्थस्कंधे पंचमोऽध्यायः ५

षेहतदेवसंघेनसहगतानामभवेविधिः सोत्वयामासरुदानादिजीविताद्यर्थमादरात् अथदेवगणाःस्वयंभुवेन्यवेदयन्नि
तिद्वितीयेनान्वयः शूलादिभिः १ संछिन्नानित्रुटितानिभिन्नानिविदीर्णानिसर्वांगानियेषांसहऋत्विग्भिःसभ्यैश्चवर्त
मानाः २ कस्यदक्षस्यनेयतुःनजग्मतुः विभुर्ब्रह्मातेजीयसिप्रतितेजस्विनि पुरुषेकृतागसिसत्यपिस्वयंकृतागहं
नागसोवुभूषतामपराधंकर्तुमिच्छतांसोतत्रयावुभूषातेषांक्षेमायनभूयान्प्रायेणेतिलोकोक्तिःनभवेदित्यर्थः ४

मैत्रेयउवाच अथदेवगणाःसर्वेरुद्रानीकैःपराजिताः शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः १ संछि
न्नभिन्नसर्वांगाःसर्त्विक्सभ्याभयाकुलाः स्वयंभुवेनमस्कृत्यकार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्यपुरैवैतद्भ
गवानब्जसंभवः नारायणश्चविश्वात्मानकस्याध्वरमीयतुः ३ तदाकर्ण्यविभुःप्राहतेजीयसिकृतागसि
क्षेमायतत्रसाभूयान्नप्रायेणबुभूषतां ४ अथापियूयंकृतकिल्बिषाभवंयेबर्हिषोभागभुजंपराडुः प्रसा
दयध्वंपरिशुद्धचेतसाक्षिप्रप्रसादंप्रगृहीतांघ्रिपद्मं ५ आशासानाजीवितमध्वरस्यलोकःसपालःकुपि
तेनयस्मिन् तमाशुदेवंप्रिययाविहीनंक्षमापयध्वंहृदिविद्धंदुरुक्तैः ६ नाहंनयज्ञोनचयूयमन्येयेदेहभाजो
मुनयश्चतत्वं विदुःप्रमाणंबलवीर्ययोर्वायस्यात्मतंत्रस्यकउपायंविधित्सेत् ७ सइत्थमादिश्यसुरानज
स्तैःसमन्वितःपितृभिःसप्रजेशैः ययौस्वधिष्ण्यान्निलयंपुरद्विषःकैलासमद्रिप्रवरंप्रियंप्रभोः ८

यूयमपिप्रसादयध्वंक्षमापयतयेभवंतेः बर्हिषोयज्ञस्यभागभाजंपराडुः हृतादेवत्वंडितवंतः प्रगृहीतांघ्रिपद्मंप्रया
तोप्रगृहेत्यर्थः ५ अध्वरस्यजीवितंपुनःसंधानंप्रार्थयमानाःसंतःयस्मिन्कुपितेसतिनभवेत् नश्येदित्यर्थः ६
वयंतत्वतरंगेतेविभिमः प्रमेवकंविदुर्यायंविधित्सेनिचेत् अतआहनीतियज्ञस्तदानीनतनइंद्रःयस्यतत्वंबलवीर्ययोः
प्रमाणमियत्तांचनविदुः वीर्यंपराक्रमः
यापमितिपायंप्रयपराचच ७

श्री:
भा०४
टी०
१५

कैलासं वर्णयति जन्मौषधीत्यादि चतुर्दशभिः नरेतरैर्देवैर्जुष्टं ९ शृंगैरमणीयमिति प्रथमेनान्वयः कथंभू-
तैः नानाधातुभिः विचित्रितैः नानाद्रुमलतागुल्मा येषु १० नानाम---निप्रस्रवणानि येषु नानाकंदराः सानवश्च
येषु रमणैः सह क्रीडंतीनां ११ मयूराणां केकाभिः स्वनैः नादितं मदांधैरलिभिर्विमूर्च्छितं मूर्च्छना रागगतिविशेषः
तद्याप्तं रक्तकंठानां कोकिलानां प्लावितैः स्तनितैः स्वरैः अन्येषां पतत्रिणां च कूजितैः १२ उद्धस्तैरुन्नतशाखैः

जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ९ नानामणिमयैः शृंगैर्ना
नाधातुविचित्रितैः नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः १० नानामलप्रस्रवणैर्नानाकंदरसानु
भिः रमणं विहरंतीनां रमणैः सिद्धयोषितां ११ मयूरकेकाभिरुतं मदांधालिविमूर्च्छितं प्लावितै रक्त
कंठानां कूजितैश्च पतत्रिणां १२ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः व्रजंतमिव मातंगैर्गृणंतमि
व निर्झरैः १३ मंदारैः पारिजातैश्च सरलैश्चोपशोभितं तमालैः शालतालैश्च कोविदारासनार्जुनैः १४
चूतैः कदंबैर्नीपैश्च नागपुन्नागचंपकैः पाटलाशोकबकुलैः कुंदैः कुरबकैरपि १५ स्वर्णार्णशतपत्रैश्च वे
णुवेणुकजातिभिः कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मंडितं १६ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिं
गुभिः भूर्जैरोषधिभिः पूगै राजपूगैश्च जंबुभिः १७ ॐ नमो नमः

द्रुमैः द्विजान् पक्षिणः आह्वयंतमिव लोके हि हस्तसंज्ञया पांथैः स्वरेणाह्वानमर्थिनो कुर्वंति अद्रिश्चोन्नतिमद्धस्ताका
रैः द्रुमैः तत्रत्यपक्षिस्वनैश्च तथा लक्ष्यत इत्यर्थः व्रजद्भिर्मातंगैर्व्रजंतमिव निर्झरध्वनिभिर्गृणंतं भाषमाणमिव १३
१४ चूताम्रयोरवांतरजातिभेदः वेणुकीचकयोश्च नीरंध्रसरंध्रत्वेन भेदः १५ वेणुकजातिभिर्नित्यं वेणुकाः पेल्लाजा-
तिर्मालती १६

द्रुमजातिविस्मयजातिरवांतरभेदसामान्यं १८ ऊम्बरादिसमुद्दिष्टैर्भिर्द्दृष्टैर्नलिनीषु सरःसु कलमधुरं यथा भवत्येवं
कूजंतियानिपदिष्टंदानितैरुपशोभितं १९ मृगादिभिस्तुष्टैर्निषेवितैर्नाभिभिः कस्तूरीमृगैः पूर्वैर्मृगगणाः संगविशे
षणात्वेनोक्ताः इदानींस्वानंद्येणोत्पयोनरुकं कदलीषंडैः संरुद्धानिश्राइनानिनलिनीनां पुलिनानि तैः श्रीः शोभा यस्मि
न् २० नदयागंगयापर्यस्तंपवित्रे द्विते मन्याः भवान्याः स्नानेन पुण्यतरमतिस्वगंधमुदकं यस्याः तया तत्रगिरौ वनेवदद्ध

त्वर्न्नेराग्रानकाग्राद्यैः प्रियालमधुकैंगुदैः द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ऊम्बदोत्पलकल्हा
रशतपत्रवनर्द्धिभिः नलिनीषु कलं कूजत्खगवृंदोपशोभितं १९ मृगैः शाखामृगैः क्रोडैः मृगेंद्रैः ऋक्षश
ल्यकैः गवयैर्नाभिभिर्व्याघ्रैर्निर्जुष्टं महिषादिभिः २० कदलीषंडसंरुद्धनलिनीपुलिनश्रियं पर्यस्तं नं
दया मन्याः स्नानपुण्यतरोदया २१ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः ददृशुस्तत्र ते रम्यामलकां
नाम वैपुरीं २२ वने सौगंधिके चापि यत्र तन्नाम पंकजं नंदा चालकनंदा च सरितौ बाह्यतः पुरः २३ तीर्थ
पादपदांभोजरजसातीव पावने यथोः सुरस्त्रियः तत्र स्वरूपसाधिरूपतः २४ क्रीडंति पुंसः सिंचंत्यो विगा
ह्य रतिकर्शिता ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं २५ वितृषोपि पिबंत्यंभः पाययंतो गजागजी तारहेम
महारत्नविमानशतसंकुलं जुष्टं पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम् २६

पुः २१ यत्र वने तन्नाम सौगंधिकं नाम पंकजं भवति जातावेकवचनं २२ पुरीं वर्णयति नंदा चेति तत्तर्भिः सरितौ पुरात्तद्बाह्
तो भवत तीर्थपादस्य हरेः पादांभोजरजसा २३ ययोर्विगाह्य प्रविश्य क्रीडंति २४ ययोरंभो विगतस्पृहा अपि गजाः
पिबंति तत्र हेतुः तासां सुरस्त्रीणां स्नानेन भ्रष्टं गलितं यन्नवं कुंकुमं तेन पिंजरं पीतवर्णं गजीः करिणीः २५ तारं रूप्यं ता
रादिमयविमानानां शतैः संकुलां तडिद्भिः स्त्रीणां जलैर्विमानानां खं तत्पुर्याः साद्दृश्यं २६ ॥

श्री: भा० च टी० १६

यत्रेत्स्वर्धुनी दिवा प्रतिक्रम्य नन्दां च दृष्ट्वा तां देवा आगात् ह्रदाद्दृष्टं दृष्टशुभिर्निवर्तन्ते ऐनान्वयः कथंभूतं वनं विशाणि माल्यानि फलानि छदाश्च येषु तैर्द्रुमैः हृद्यं मनोहरं २७ रक्तकण्ठखगानामनीकस्य स्वरैर्मण्डिताः षट्पदा षट्पदस्वरा यस्मिन् कलहंसानां कुलस्य प्रेष्ठं खरदण्डानि पद्मानि तैर्युक्ता जलाशया यस्मिन् २८ वनकुञ्जरैः संघृष्टा ये हरिचन्दनद्रुमाः तत्संबन्धिना वायुना पुण्यजनस्त्रीणां मनः अधि अधिकमुन्मथयत् २९ यत्र च उत्पलमालिन्यो वाप्यः स्वर्गं किंपुरुषैः प्राप्तं वापीश्च दृष्ट्वा

दिवापतत्स्वर्धुनीवनं सौगंधिकं च तत् द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः २७ रक्तकण्ठखगानीक
स्वरमण्डितषट्पदं कलहंसकुलप्रेष्ठं खरदण्डजलाशयं २८ वनकुञ्जरसंघृष्टहरिचन्दनवायुना अधिपुण्य
जनस्त्रीणां मुहुरुन्मथयन्मनः २९ वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः प्राप्तं किंपुरुषैर्दृष्ट्वा त आ
राद्ददृशुर्वटं ३० स योजनशतोत्सेधः पादोनविटपायतः पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ३१
तस्मिन्महायोगमये मुमुक्षुःशरणे सुराः ददृशुः शिवमासीनं त्यक्तामर्षमिवान्तकं ३२ सनन्दनाद्यैर्महा-
सिद्धैः शान्तैः संशान्तविग्रहं उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां ३३ विद्यातपोयोगपथमास्थितं तम-
धीश्वरं चरन्तं विश्वसुहृदं वात्सल्याल्लोकमंगलम् ३४

र्थः ३० योजनशतमुत्सेध उच्छ्रायो यस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैर्विटपैः शाखाभिरायतो विस्तृतः
पर्यक् सर्वतः कृता अचलच्छाया येन निर्गतं नीडं यस्मात् ३१ मुमुक्षूणां शरणे आश्रये त्यक्तामर्ष इत्यन्तकः तत्तुल्यं ३२
तं विशिनष्टि सनन्दनाद्यैरिति पंचभिः सख्या कुबेरेणोपास्यमानं ३३ विद्या उपासना तपश्चित्तैकाग्र्यं
योगः समाधिः तेषां पंथानं प्रवर्तनद्वारा लोकस्य मंगले हि
तं तपो वात्सल्यात् स्नेहाच्चरन्तम् ३४

मेध्याम्यरुवावह्लवर्णानीगेनभस्मादिलिंगंवेदइलेखांवविभ्रतं ३५ प्रतिनामासनेतृसीनस्यांब्रह्मप्रबोधेतं ३६ सव्येपा
दयमंदक्षिणोरुगेरुकृत्वाविन्यस्यजानुनिवसव्येबाहुच्छवाद्दक्षिणबाहुप्रकोष्ठेमणिबंधस्थानेयदतमालोकृत्वादक्षि
णहस्ताकृतयातर्कमुद्रयाउपलक्षितमासीनमित्यर्थः तदुक्तंयोगशास्त्रे पर्कमादमथैकस्मिन्विन्यसेदूरुसंस्थि
ते इतरस्मिंस्तथाबाहुंवीरासनमिदंस्मृतं तर्कमुद्रयावोक्ता तर्जन्यंगुष्ठयोरग्रेमिथःसंयोज्यचांगुलीः प्रसार्यबंध
नेप्राहुःतर्कमुद्रेतिमात्रिकाइति ३७ ब्रह्मनिर्वाणेब्रह्मानंदः तत्रसमाधिरैकाग्र्यंतमाश्रितंयोगकक्षां योगपट्टंच

लिंगंचातपसाभीष्टंभस्मदंडजटाजिनं अंगेनमेध्याहरुवावेदइलेखांवविभ्रतं ३५ उपविष्टंदर्भमय्यां
वृस्यांब्रह्मसनातनं नारदायप्रवोचंतंपृच्छतेशृण्वतांसतां ३६ कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि
बाहुंप्रकोष्ठेक्षमालांआसीनंतर्कमुद्रया ३७ तंब्रह्मनिर्वाणसमाधिमाश्रितंव्युपाश्रितंगिरिशंयोगक
क्षां सलोकपालामुनयोमनूनामाद्यंमनुंप्रांजलयःप्रणेमुः ३८ सतूपलभ्यागतमात्मयोनिंसुरासुरे
शैरभिवंदितांघ्रिः उत्थायचक्रेशिरसाभिवंदनमर्हत्तमःकस्ययथैवविष्णुः ३९ तथापरेसिद्धगणामहर्षि
भिःयेवैसमंतादनुनीललोहितं नमस्कृतःप्राहशशांकशेखरं कृतप्रणामंप्रहसन्निवात्मभूः ४० श्री
ब्रह्मोवाच जानेत्वामीशंविश्वस्यजगतोयोनिबीजयोः शक्तेःशिवस्यचपरंयत्तद्ब्रह्मनिरंतरम् ४१

वामजानुवुरस्तीकरणार्थविशेषणोपाश्रितवंतं मननशीलामनवःतेषामाद्यंमनुं ३८ अर्हत्तमोविष्णुर्वामनमूर्ति
र्यथाकश्यपस्यकश्यपस्यमहर्षिभिः सहितायेनीललोहितमनुवर्तंते तेपितमेवंवंदनंचक्रुः एवंसर्वैर्नमस्कृतःप्राहकं
तःप्रणामोदेवेयस्मैतं ४० यद्यपितेमानीचवन्नमस्कारोचितयापितवेष्टपंथ्रहेवेशीन्याह जानइतिविष्णुस्येशंजा
नेतरहेतःजगतीयोनिर्योनिर्योशक्तिःप्रकृतिबीजंवयः शिवःपुरुषःतयोःकारणंतयापितनिर्भेदंयद्ब्रह्मनिर्विकार
तंतदेवत्वमितिजाने ४१ ॥

नन्वविरुद्धमेतत्तत्राह त्वमेव स्वरूपयोरविभक्तयोः शिवशक्त्योः क्रीडन् विश्वं सृजस्यादि करोषि ऊर्णनाभिरिव स्वरूपयोरि-
तिपाठे स्वांशयोः अतो न विरोधः ४३ धर्ममर्थं च दोग्धि या त्रयी तस्या अभिपत्तये रक्षणायाध्वरं सृष्टवानसि यद्वा हे धर्मा-
र्थदुघ धर्मार्थ्यभिपत्तये तन्मात्रमये दक्षेण सूत्रेण सेतवो वर्णाश्रममर्यादाश्च अवसिता निबद्धाः निर्णीता इति वा श्रद्दधते
श्रद्धयाऽनुतिष्ठन्तीति ४४ सर्वकर्मफलदातापि त्वमेवेत्याह हे मङ्गल मङ्गलानां शुभानां कर्मणां कर्तुः स्वर्गं परं मोक्षं वा तनुषे
अमङ्गलानामशुभानां कर्मणां कर्तुस्तमिस्रं नरकं तनुषे तत्र केन हेतुना न तदेव तस्मिन्नेव कस्यचिद्विपर्ययो भवति ४५

त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ४३ त्वमेव धर्मार्थदुघाभि-
पत्तये दक्षेण सूत्रेण ससर्जिथाध्वरं त्वयैव लोकेऽवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः ४४ त्वं कर्म-
णां मङ्गल मङ्गलानां कर्तुः स्वलोकं तनुषे स्वः परं वा अमङ्गलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव क-
स्यचित् ४५ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रो-
षोऽभिभवेद्यथा पशुम् ४६ पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशं परान्दुरुक्तैर्वितुद-
न्त्यरुन्तुदास्तान्मावधीद्दैववधान्भवद्विधः ४७ यस्मिन्यदा पुष्करनाभमायया दुरन्तया स्पृष्टधियः पृथग्दृशः
कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात्कृते क्रमम् ४८

त्वत्कोपो न रुद्रे तु वितिष्ठते भावितमिति कैमुत्यन्यायेनाह न वै सतां सतः रोषोऽभिभवेत् तव तन्त्रोऽद्वितीयार्थेषु पशुमज्ञं यथाभि
भवति तद्वत् ४६ अतः ये पृथग्धियः भेददृशः अतः कर्मण्येव दृग्दृष्टिर्येषां दुष्ट आशयो येषां परेषामुदयेन संपदा अर्पिता
हृदि रुक् यैषां अरुन्तुदा मर्मभेत्तारः दैवेनैव वधो येषां तान् भवद्विधः निरुपमः साधुः मा वधीत् न हन्यात् ४७ प्रस्तुत
साधूनां वृत्तमालोक्याद्य हे कर्तुमेवार्हसीत्याह द्वाभ्यां यस्मिन्देशे यदा काले स्पृष्टधियो मोहितचित्ताः पृथग्दृशो भवन्ति
तत्रापराधे साधवो हि अनुकम्पया आर्त्तेन तमेव परं दुःखसहिष्णुतया चित्तप्रकम्पेण कृपां कुर्वन्ति न तु क्रमं पराक्रमं यतः दै-
वबलात् कृतेऽर्थे ममैव दैवमेवं भूतं कोऽत्रापराधः तेषामिति मत्वा हननं तेन कुर्वन्तीत्यर्थः ४८ ४९

भवांस्त्वग्रस्तदृष्टमतिः अतः समस्तदृक् सर्वतः तथापि हतमायया हतआत्मीयेषु भेदतेषु अतएवकर्मानुगतचित्तेषु इहआप
तायेत्वग्रहंकर्तुमर्हसि ४८ एवंसामान्येनोक्त्वाप्रस्तुतमाह ऊर्व्विति त्रिभिः तथापि तस्य अग्रेएवासमाप्तस्यप्रजापतेर
ध्वरस्य हेमन्योयथाध्वरेयुष्मादिकाः भागिनोपिभागंनददुः भागार्हस्त्वमाह येनतवयामस्त्वोनिनीयतेफलंप्राप्यते ४ ५

भवांस्तुपुंसः परमस्यमाययादुरंतयास्पृष्टमतिः समस्तदृक् तयाहतात्मस्वनुकर्मचेतःस्वनुग्रहंक
र्तुमिहार्हसिप्रभो ४८ ऊर्वध्वरस्योद्धरणंहतस्यभोत्वयासमाप्तस्यमनोप्रजापतेः नयत्रभागंतवभागि
नोददुः कुयज्वनोयेनमखोनिनीयते ४९ जीवताद्यजमानोयंप्रपद्येताक्षिणीभगः भृगोःश्मश्रूणि
रोहंतुपूष्णोदंताश्चपूर्ववत् ५० देवानांभग्नगात्राणामृत्विजांचायुधाश्मभिः भवतानुगृहीतानामाशु
मन्योस्त्वनातुरं ५१ एषतेरुद्रभागोस्तुयदुच्छिष्टोध्वरस्यवै यज्ञस्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ५२ २
श्रीभागवतेचतुर्थस्कंधेरुद्रसांत्वनंनामषष्ठोध्यायः ६ मैत्रेयउवाच इत्यजेनानुशातेनभवेनपरितु
ष्यता अभिधायमहाबाहोप्रहस्यश्रूयतामिति १

५० हेमन्यो अनातुरमारोग्यमस्तु ५१ भागमुक्तवानस्मीत्याह एषइति हेरुद्र यावदित्यर्थे यदिति अध्वरस्ययज्ञस्यशेषक
तेयावानवशिष्टः अवशेषोर्थः तावानेषतवभागोस्तु हेरुद्र तेभागेनाद्ययज्ञः कल्पतांसंपद्यतां ५२ इतिश्रीभावा
र्थदीपिकायांचतुर्थस्कंधेषष्ठोध्यायः ६ सप्तमेविष्णुरुद्रतःस्तुतोदक्षभवादिभि यज्ञेप्रवर्तयामासदक्षिणांतिति
इष्यते १ अजेनयोनुनीतः प्रार्थितोभवस्तेनाभिहिते हेमहाबाहोविदुर १ ॥

श्री॰
भा॰ च॰
टी॰
१८

प्रवप्रणायं २ मायपायमपहत्यानुगृह्णाति दग्धेति शीर्षं यस्य प्रजापतेः अजस्य मुखं यस्मिन् तत्तथाभूतं शि॰
रोस्तु बर्हिषः संबंधिनं भागं मित्रनाम्नो देवस्य ३ प्रकृष्टेण कृतानि लग्नानि सर्वाण्यंगानि येषां ते भवंतु उच्छेषणं यज्ञा
वशिष्टं ४ ५ येषां त्वंगानि विनष्टानि ते तु अश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां कृतहस्ताश्च भवंतु अध्वर्य
वः अन्ये च। भृगुरपि अजः बस्तस्य छागस्य श्मश्रूणि यस्य मीढुष्टमः शिवः तेनोक्तं परितुष्टैश्चित्तैः ६ तदा मीढ्वांसं शिवं

श्रीमहादेव उवाच नाघं प्रजेश बालानां वर्णये नानुचिंतये देवमायाभिभूतानां दंडस्तत्र धृतो मया २
प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ३ पूषा तु यजमा॰
नस्य दद्भिर्जक्षतु पिष्टभुक् देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ४ बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां
कृतबाहवः भवंत्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ५ मैत्रेय उवाच तदा सर्वाणि भूतानि श्रुत्वा॰
मीढुष्टमोदितं परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ६ ततो मीढ्वांसमामंत्र्य शुनासीराः सहर्षि॰
भिः भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ७ विधाय कार्त्स्न्येन च तद्यदाह भगवान्भवः संदधुः कस्य॰
कायेन सवनीयपशोः शिरः ८ संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः सद्यः सुप्त इवोत्तस्थौ ददृ॰
शे चाग्रतो मृडं ९ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः शिवावलोकादभवच्छरद्ध्रद इवामलः
१० भवस्तवाय कृतधीर्नाशक्नोदनुरागतः औत्कंठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ११ कृच्छ्रात्संस्त॰
भ्य च मनः प्रेमविह्वलितः सुधीः शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः १२

वयागत्य सर्वं कार्यमित्यामंत्र्य संप्रार्थ्य शुनासीरा देवाः सह मीढुषा वेधसा च वर्तमानाः समीढ्वद्वेधसः ७ कार्त्स्न्येन त॰
त्तदाहोदि साधारणाय विधाय ८ ९ पूर्वं वृषध्वजद्वेषेण कलिलः कलुषीकृतः आत्मा यस्य सः तदा शरत्कालीनो॰
ह्रद इवामलोऽभवत् १० ॥

यदपि यद्यपि प्रलब्धः पराभूतो मया भवान् तथापि त्वया दंडो धृतः शिक्षितः कृतो न तूपेक्षितोस्मीति युक्तमेव तदित्याह ब्रह्म
बंधुषु च वां ब्राह्मणाभासेष्वपि तुभ्यं तव हरेश्च नितरां धृतव्रतेषु उपेक्षा नास्ति १३ तत्र हेतुमाह विद्येति ब्रह्मा भूत्वा त्वमस्रा
क्षः सृष्टवान् किमर्थं आत्मतत्त्वमवितुं ब्रह्मा वेदं आत्मतत्त्वं च अवितुं संप्रदायप्रवर्तनेन त्रातुमित्यर्थः तत्तस्मात् हे
परम उक्तं च १४ अर्वाक् पतंतमुपकारेणानुगृह्णात्याह योसाविति अविदिततत्त्वदृशा ज्ञानाभावेन तत्त्वज्ञानेन तद्विगणय्य तिरस्कृ

दक्ष उवाच भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः न ब्रह्मबंधुषु च वां भगवन्नव
ज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु १३ विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्रा
क् तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः १४ योसौ मयाविदिततत्त्वदृशा
सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां अर्वाक्पतंतमर्हत्तमनिंदयापाद्दृष्ट्यार्द्रया स भगवान्स्वकृतेन तु
ष्येत् १५ मैत्रेय उवाच क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमंत्रितः कर्म संतानयामास सोपाध्यायर्त्विगा
दिभिः १६ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः पुरोडाशं निरवपन्वीरसंसर्गशुद्धये १७ अध्वर्युणा
त्तहविषा यजमानो विशांपते धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः १८ तदा स्वप्रभया तेषां द्योतयंत्या
दिशो दश मुष्णंस्तेज उपानीतः तार्क्ष्येण
स्तोत्रवाजिना १९

त्य अर्हत्तमस्य निंदया याघ्र्वाक् अधः पतंतं मां अपात् रक्षितवान् स कृतेनैव परानुग्रहेण तुष्येत् न मया तस्य तिश्रा
कं कृतमित्यर्थः १५ अनुमंत्रितोनुज्ञातः उपाध्यायमहर्षिभिः ऋत्विगादिभिः अनुवर्तयामास १६ वीराणां प्रमथादी
नां संसर्गकृतदोषस्यापनुदये निर्हरणार्थः १७ उपात्तहविषा अध्वर्युणा सह विशुद्धया बुद्ध्या दध्यौ हे विशांपते हे विदुर १८ स्व
या प्रभया तेषां तेषां मुखं न्यूनीकुर्वन् उपानीतः समीपं प्रापितः स्तोत्रैर्बृहद्रथंतरादिभिः वाजौ यस्य तेन तार्क्ष्येण स्तोत्रवाजिना नेः

श्रीः
भा॰ च॰
टी॰
४१

तमेवानुवर्णयति श्याम इति पंचभिः श्यामो हिरण्यवरशना यस्येति वस्त्रं रशने ऽर्कतुल्येन किरीटेन जुष्टः नीलालका इव भ्र
मराः तैर्मंडिते कुंडले युतं आस्यं यस्य मरकतवादिभिरायुधैः भृत्यवत्ताद्वेष्यग्रैर्हिरण्मयैर्भुजैः पुष्पितः कर्णिकार इव शो
भमानः भुजानां हिरण्मयत्वं केयूरकंकणमुद्रिकाद्यलंकारैः २० वक्षस्यधिश्रिता वधूर्लक्ष्मीर्यस्य स उदारो हासावलोक
श्चैतयोः कलया लेशेन याश्चेदुभयतो भ्रमंती व्यजनचामरे चामरव्यजने एव राजहंसौ यस्मिन्सः रज्यमानः शोभमानः शि
र्षवीयमानः २१ ब्रह्मेंद्रत्र्यक्षा मुख्या नायका येषां ते २२ हतरुचः तिरस्कृतप्रभावाः जिह्वागद्गदवाचः ससाध्वसाः

श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः शंखाब्जचक्रशरचापगदासिचर्म
व्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः २० वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च
विश्वं पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः २१ तमुपागतमालक्ष्य सर्वे
सुरगणादयः प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः २२ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः
मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजं २३ अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः यथामति गृणंति
स्म कृतानुग्रहविग्रहं २४ दक्षो गृहीतार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुं सुनंदनंदाद्यनुगैर्वृतं
मुदा गृणन्प्रपेदे प्रयतः कृतांजलिः २५

तेन्महिम्नात्वभिभूता विनीताः उपतस्थुः नमश्चक्रुः २३ यस्य महिम महिमानं प्रति तु अर्वाग्वृत्तयो ये ते ऽपि यथामति गृणंति स्म
प्रस्तुवंतु कृतः प्रकटीकृतः अनुग्रहार्थं येन विग्रहः ते यद्वा तेषामर्वाग्वृत्तित्वे हेतुः तत्तु यस्य महि महिमा विभूतिमाना
देवा इत्यर्थः ... तथापि तावद्दत्तस्तुतिप्रकारमाह दक्ष इति गृहीतमर्हणं सादनोत्तमं येन तं उत्तमेषु पात्रेषु आहृत्य अर्हणं प्रसम
र्पितेषु मध्ये तस्मात् अर्हणं पात्रमेव येन गृहीतमित्यर्थः यद्वा कथं प्रपेदे गृहीतमर्हणं सादनोत्तमं भवति यथा तथा तं गृहीत्वा
वा प्रपेदे इत्यर्थः गृहेनेति पाठः स्वगामः गृणन्स्तुवन् प्रपेदे शरणं जगाम दक्षस्य विकारहृस्य शापभृगुर्ब्रह्मलिंगदयोषितः स
वयप्रेतया मिहायजमानी व लोकपाः ब्रह्मादिदेवाश्च स्तवैति तदादीश्वरं तथा गंधर्वविद्याधरचारणाश्च इत्यर्थः

रा॰
रामः
४१

ननुसात्वन्यात्मेश्वरस्य बरुद्रस्य स्वरूपत्वेनजीवत्व मनुवर्तमानंत्वंहंतत्किमितिनयामेदष्टुमसौमेश्वत्त्वानइतिमांभग-
वानाहत्यमतीयाशंक्य अप्रच्युतस्वरूपस्यजीवधर्मनाद्यंतत्वैवमेगच्छतेनान्यस्येन्याह मुद्दमितिसत्यात्रिसस्वरूपनिष्ठत्व
भवान् मुद्दविन्मात्रैवैतन्य----नः मुदवेदेहतः उपरतानिदृत्नाप्रखिलातुद्यवस्थायस्मात् अतएकंभेदमन्यंअतएव
अभयंदिनीयाद्वैभयंभवतीतिश्रुतेः जीवस्यापितत्त्वतएवभूतेनानद्वैलक्षण्यं---- योप्रतिविध्यअभिभूयसंतत्त्व
वसन्तःतयामायपाप्रुरुषत्वं मनुष्यभावमपेत्यतस्यामायायोतिष्ठन् अपरिमुदृश्वरामादिमानिवासत्तामहःसाद्यवनोरेतथा
प्रतीयतेभवानित्यर्थः अन्येनविद्यापाधस्येमायाभिभूताः संसरंति अतःममेवोस्वरोनरुद्रादयइतिभावः अतएवमा

दत्तउवाच मुदंस्वधाप्रपरतादविलद्धद्यवस्थाविकीर्षमेकमभयंप्रतिविध्यमायां तिष्ठंतयैवपुरुषत्वमुपे-
त्यतस्यामासत्त्वभवानपरिमुद्धइवात्मतंत्रः २९ सविजतुजः नत्वेनतेवयमनेजनरुद्रप्रखायाकर्मण्येवग्रह
थियोसमवनिदामः धर्मोपलक्षणमिदंविहितदुष्करांस्त्वानेयदर्थमधिदेवमदोव्यवस्थाः ३०

भेदहद्भिर्भगवान्नुवारयिष्यति अहंब्रह्माचशर्वश्चजगतः कारणंपरमित्यादिना सविजोपिसापरायंपरिहरंभः सर्वेति
भोअनंजनउयोपिमलक्षणयद्यपिवमेवरुद्रादिदेवताभूपः तथापिनेदीशस्वरज्ञापाकर्मण्येवदुराग्रहधियइसेनः त
वतत्त्वेनविद्मः किंतस्वधर्मोणासर्वस्योपलक्षणभूतंविहितत्रयीप्रति----- यदाख्येनवदंपंश्रस्माभिस्तीनेकोदृशायद
र्थयज्ञमिदुद्धयेअधिदेवैर्दैवनाधिकारेणत्रहोव्यवस्थाः अस्मत्व्यवस्थाः अत्रयमेवदेवतानान्येपंचभूतानियतान्यर्थः
यद्वाव्यवस्थाइत्यर्थः `` नंप्रज्ञागमाभावआर्षः यदर्थं
अहइवइडायाधिदेवनेत्रपेविशेषणा
स्थितवानसीत्यर्थः ३० ॥

श्रीः
भा॰ च॰
टी॰
२॰

तदस्यास्तु निरीक्षेरेदत्वाधरेयतनलोभेनस्पृहृतिमन्तु वि-------- क्रिमाणमानाः स्तुवंति हे शरणद आश्रयप्रद उ
त्पत्यध्वनि संसारमार्गे वर्तमानाः जीवानां सार्थः-------- त्वत्पदनिवासं कदा यास्यति अशरणो विश्रामस्थानशून्ये उरुक्ले
शा एव दुर्गमस्थानानि यस्मिन् अंतकरूपो योऽग्रो व्यालः तेनान्विष्टे लक्ष्मीकृते विषया रूपा मृगतृष्णिका यस्मिन् आत्मा
देहः कामादयश्च शरीरं मम गेहं च स्वर्गे देवसमूहो रुभारो यस्य सः देहादि स्वभावद्वंद्वः शीतोष्णादीन्येव श्वाभ्राणि गर्ता यस्मिन् खला एव मृगा
व्याघ्रादयस्तेभ्यो भयं यस्मिन् शोक एव दावाग्निर्यस्मिन् कामेनोपसृष्टः पीडितः २८ श्रीरुद्रस्तु सर्वं मम निंदादुःसहाः

सदस्या ऊचुः उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्यालान्विष्टे विषयमृगतृष्ण्यात्मगेहोरुभारः द्वंद्वश्व
भ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः २८ रुद्र उवाच तव वरद
वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरस-- रादरेणार्हणीये यदि रचितधियं माविद्यलोकोऽपविद्धं जप
ति न गणये तत्त्वत्परानुग्रहेण २९ भृगुरुवाच यन्मायया गहनयापहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तम
सि स्वपंतः नात्मन्श्रितं तव विदंत्यधुनापि तत्त्वं सोऽयं प्रसीदतु भवान्प्रणतात्मबंधुः ३०

सोढ़ीदानीं तन्नान गणयामीत्याह तवेति आशिषा कामेन असक्तैः निष्कामैः रचितधियं मयि अभिनिवेशितचित्तं अविद्योवि
द्याहीनो लोकाः यदि अपविद्धं जपति आचारभ्रष्टं जल्पति तन्न गणये न्यूनं तव यः परानुग्रहः त्वत्परायणानां वा योऽनुग्रहस्तेन
२९ भृगुस्तु स्वभावेन स्वस्य ज्ञानहीना जीवाः अतो ज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह यन्माययेति आत्मन्यात्मनि
स्थितं अनुगतं तव तत्त्वं न विदंति प्रणतानामा
त्मा बंधुश्च ३० ॥ ३०

ब्रह्मादयो न विदंतीति भृग्वाद्युक्तेन तद्‌सहमानो ब्रह्मा तत्र स्तौति माविषुर्वत्रिवाहनैतदिति पदार्थभेदग्राहकैरिंद्रियैः गुरुस्तें
द्रियस्य यद्वा ज्ञानार्थयोः कारणस्य सत्त्वादेः ३१ इंद्रियस्त्विंद्रियविषयः सर्वोपि मिथ्येति ब्रह्मणोक्तमसहमानआह इदं तव
वपुरपि उपपन्नमेवनतु प्रपंचवदनिर्वचनीयं न यानुपपन्नं सुराणां विद्विषः क्षपयंतीति तथा तैर्भुजदंडैरुपपन्नमिति ३२ सं
विन्नो पत्न्यः स्तुवंति यज्ञो यं तव यजनाय तेनोयं सृष्टो केन ब्रह्मणा सर्वं सृष्टः हे यज्ञात्मन् तं नोयज्ञं नलिनकांत्या दृशा नेत्रेण पुनी
हि पवित्रं कुरु कथंभूतं यज्ञं शवः शेरते यस्मिंस्तत् शवशयनं शमशानं तेन हेतुना अभाप्रतीतियस्य स चासौ शांतमेधश्च उप

ब्रह्मोवाच नैतत्स्वरूपं भवतोसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्य
तिरिक्तो यतस्त्वं ३१ इंद्र उवाच इदमप्यच्युत विश्वभावनं वपुरानंदकरं मनोदृशो सुरविद्विट्क्षपणैरुदायुधैर्भुज
दंडैरुपपन्नमष्टभिः ३२ पत्न्य ऊचुः यज्ञोयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् तं न
स्त्वं शवशयनाभशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ३३ ऋषय ऊचुः अनन्वितं तव भगवन्विचेष्टितं यदा

त्मना चरसि हि कर्म नाज्यसे विभूतये यत उप

सेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भ

वान् ३४

तो मखः मेधः शांतेन पशुहिंसायुक्तो वा लक्ष्यते शवस्य दर्शनं तत्प्रशांतं इति शवशायं पश्चात्तन्नाभोयस्येति संबोधनं वा ३३ ऋषयस्त
कर्माण्यनुतिष्ठंतस्तत्र गुणे नैतत्फलेन बध्यन्ते भगवतिस्तु न तद्भाव मालक्ष्य विस्मिताः स्तुवंति अनन्वितं स्व रमाने यद्यस्मा
त् आत्मनास्वयं कर्माचरसि अनुतिष्ठसि न तु अज्यसे लिप्यसे यतश्च अन्ये विभूतये संपदे ईश्वरीं लक्ष्मीमुपसेदुः भेजुः यद्वाय
त इति सर्वविभक्तिकस्तसि यामित्यर्थः भवांस्तु स्वयमेवानुवर्तमानामतां न मन्यते नाद्रियते ३४

श्रीः
भा॰४॰
टी॰
अ॰

सिद्धास्त्वत्कथामृतमभिनंदंतः स्तुवंति अयं नो मनोगजः त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्यामवगाढः
प्रविष्टो दावाग्नितुल्यं संसारतापं न स्मरति स्म न च ततो निर्गच्छति ब्रह्मसंपन्नः ब्रह्मलयप्राप्त इव ३५ यजमानी दक्षपत्नी स्तौ
ति ते स्वागतं भद्रं आगतं जातं हे अधीश त्वां विना शिरसा हीनः कबंधमात्रः पुरुषोंगैः करचरणाद्यवयवैः शोभनैरपि
न शोभते तथा त्वां विना केवलैः प्रयाजाद्यंगैर्मखो न शोभते अतो नः श्रिया सह त्रायस्व स्वभक्तान्न विलंबय ३६ लो
कपालास्त्वां स्तुवंतोभिमानात् हे भगवंस्त्वमपश्यंतस्तुष्टुवुः दृष्टः किं न दृष्ट इत्यर्थः उतः असद्ग्रहैः प्रत्यक्षमात्रविषयैर्लिं

सिद्धा ऊचुः अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः तृषार्तोवगाढो न सस्मार दा
वं न निष्क्रामति ब्रह्मसंपन्नवन्नः ३५ यजमान्युवाच स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांत
या त्राहि नः त्वामृतेऽधीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पुरुषः ३६ लोकपाला ऊचुः दृ
ष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यं मायाह्येषा भवदीया हि भूमन्यस्त्वं षष्ठः पंचभिर्भासि
भूतैः ३७ योगेश्वरा ऊचुः प्रेयान्न तेऽन्योस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः अथापि भ
क्त्येश तयोपधावतामनन्यवृत्त्यानुगृहाण वत्सल ३८

पत्वाद्रष्टा काशरूपाभिर्दृग्भिरदृश्यैः अयं भावः षड्विधानां तेषु षष्ठः पंचभिर्भासि अस्माकं तु बहिर्मुखेंद्रियाणां पंचभू
तोपलक्षितो जीवविशेषवद्वाव भासि अतस्त्वं सम्यगिंद्रियगोचरो न भवसीति न स्मज्जीवितमिति ३७ योगेश्वरास्त्वद
भेदेन भजतामनुग्रहभाक्त्वं मन्यमानाः स्वामिभृत्यभावेन भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्यां प्रेयानिति
विश्वात्मनि परब्रह्मणि त्वयि आत्मनः पृथक्त्वेनेक्षेत अमुतः अमुष्मादन्यः ते प्रेष्ठो नास्ति आत्मनो जीवान्पृथक्
नेक्षेतेति वा वत्सल हे भक्तप्रिय अनन्यवृत्त्या अव्यभिचारिण्या भक्त्या ३८

म्रव्यभिचारिणीभक्तिः कथंस्यादिज्यजनीयानांबहुत्वादित्याशंक्याहुः जगतउद्भवादिषुदैवतोजीवादृष्टाद्बहुधाभिद्यमाणा
यस्यास्तयास्वमाययात्मनिस्वरूपेरचिताब्रह्मादिभेदमतिर्येनतस्मै स्वसंस्थयाकेवलस्वरूपावस्थानेनचविनिवर्तिताभेद
भ्रमोगुणाश्चनद्वैतवश्चात्मनिर्येनतस्मै ३९ पाहब्रह्मस्तोतिनमस्तेश्रितंस्वीकृतंसत्त्वंयेनसत्त्वोभक्त्यादिफलप्रसविते स
त्त्वगुणावनिर्गुणात्वंचकथमित्याशंक्याहयस्यकाष्ठांतत्त्वंनाहंवेद्मिअपरेचब्रह्मादयश्चनविदुःतस्मै ४० अग्निस्तुयज्ञमूर्तिं
प्रणमतियस्यतेजसासुसमिद्धप्रदीप्ततेजायस्यसोऽहंप्रशस्तेअध्वरेहविर्वहामि तंयज्ञियंयज्ञायहितंपालकंयज्ञंयज्ञरू

जगदुद्भवस्थितिलयेषुदैवतोबहुभिद्यमानगुणयात्ममायया रचितात्मभेदमतयेस्वसंस्थयाविनिवर्तित
भ्रमगुणात्मनेनमः ३९ ब्रह्मोवाच नमस्तेश्रितसत्त्वायधर्मादीनांचसूतये निर्गुणायचयत्काष्ठांनाहंवेदा
परेपिच ४० अग्निरुवाच यत्तेजसाहंसुसमिद्धतेजाहव्यंवहेस्वध्वरआज्यसिक्तं तंयज्ञियंपंचविधंच
पंचभिःस्विष्टंयजुर्भिःप्रणतोस्मियज्ञम् ४१

र्तिं पंचविधंचैवैनरेयकउक्तं सप्तयज्ञः पंचविधोऽग्निहोत्रंदर्शपौर्णमासौचातुर्मास्यानिपशुः सोमइतिपंचभिर्यजुर्भिः य
जमानैः स्विष्टंसुपूजितंतथाचश्रुतिः आश्रावयेतिचतुरक्षरं अस्तुश्रौ
षडितिचतुरक्षरं यजइतिद्व्यक्षरं येयजामहइतिपंचा
क्षरं द्व्यक्षरोवषट्कारइतिस्तुतिश्चतुर्भि
श्चद्वाभ्यांपंचभिरेवचहूयतेचप्रजापती
ओंसमैविष्णुः प्रीतिं
तःस्विति ४१

श्री: देवास्तु सन्त्येव यमिह देवाः तथापि जगदाद्यं त्तयोस्त्वमेव नान्यः कश्चिदित्याहुः पुरेति कल्पापाये प्रलये विकृतं कार्यजातमु
भा० द० दरीकृत्य संहृत्य त्वमेवाद्यः पुमानुदरे गेंऽपगाधिके शयने शय्यायामस्मिन् शेषे शयनं करोऽसि सिद्धैर्जनोलोकादिवासिभिः
टी० विमृग्यात्मा विविक्तेनाध्यात्मपदवीत्मान मार्गो यस्य स एव त्वं य इदानीमक्ष्णोः पथि वर्त्मसि प्रत्यक्षोऽसि अवसि रक्षसि ४२ गं
२२ धर्वा अप्सरसस्तव वयं भिया केवलं सर्वेन पि परमेष्ठ्यंदेनोपश्लोकयामः त्वमेव त्वं परमेष्ठः अस्येत्त्वदंशाप्येत्याहुः अं

देवा ऊचुः पुराकल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन्सलिलउरगेन्द्रादिशयने पुमान्
शेषे सिद्धैर्हृदि विमृषिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ४२ गंधर्वा ऊचुः
अंशांशास्ते देव मरीच्याद्य एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः क्रीडाभाण्डं विश्वमिदं यस्य विभूमन् तस्मै
नित्यं नाथ नमस्ते करवाम ४३ विद्याधरा ऊचुः त्वन्मायया(र्थ)मभिपद्य कलेवरेऽस्मिन्कृत्वा ममाहमिति
दुर्मतिरुत्पथैः स्वैः क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ४४

अंशांशा इति हे विभूमन् महत्तम क्रीडाभाण्डं क्रीडोपकरणं विश्वं ब्रह्माण्डं यस्य तस्मै तेन नमस्ते करवाम ४३ विद्याधरास्तु केव
लं विद्याभिः संपदः प्राप्यन्ते अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना नास्तीत्याहुः अर्थं पुरुषार्थसाधनं
कलेवरमभिपद्य प्राप्य त्वन्मायया अस्मिन्ममाहमिति निवाभिमानं कृत्वा इममात्ममोहं युष्मत्कथामृतनिषेवकः उद्व्यु
दस्येत् परित्यजेन्न नान्यः स्वैः पुत्रादिभिरुत्पथैः क्षिप्तो दुःखितः सन् परित्यजेदेवेत्याहुः क्षिप्तोपि दुर्मतिः असद्वि
षयेषु लालसा तृष्णा यस्य सम्भवेत् ४४

ब्राह्मणाः स्तुवंति त्वमिति त्रिभिः सदस्यास्तत्र ऋत्विजस्तु ८५ गोष्टंपीरमायाः रसातलात् दंष्ट्रया समुज्जहर्थ विष्णो रक्षेणोद्धृत
वान् सियोगिभिः स्तूयमानाः हे त्रयीमात्र वेदमूर्ते यज्ञो यागः सप्तप्तन्तु हिरण्यः क्रतुः स्तत्रूपी यज्ञसंकल्पत्रूप इतिवा यज्ञः कौ
तुः कर्मयस्येतिवा ८६ सत्वमस्माकं त्वद्दर्शन माकं तनो प्रसीद् सम्यग्यज्ञ मस्तु इरोत्पर्यः नवाशाकेन तेनतत यजनस्तवना

ब्राह्मणाः कुत्तुः वैकृतः वेद्दविः वेद्दनाशः स्वयं वेद हिमें रः समि````णिवत्वेसदस्यार्त्विजो दंपती देवता सु
ग्निहोत्रे स्वधा सोमश्चाज्यं पशुः ८५ त्वं पुरागोरसायाम् महासूकरो दंष्ट्रया पद्मिनी वारणेन्द्रो यथा स्तूयमाणो
नदन्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ८६ सप्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्ट
सत्कर्मणां कीर्तिमाने नृभिर्नाभिर्यज्ञेश यत्तेयज्ञविघ्नाः``यांति तस्मै नमः ८७ मैत्रेय उवाच इतिदत्तः कवि
र्यज्ञे भद्र रुद्राभिमर्शिते कीर्त्यमाने हृषीकेशः सन्निन्ये यज्ञ भावने ८८ भगवान्स्वेन भागेन सर्वात्मा सर्व भागभुक्
दक्षं बभाष आभाष्य प्रीयमाण इवानघ
त्र ८९ ॥

स्निकीर्त्यमानसव यज्ञविघ्नाः त्वयं यांति एवं प्रभावो यः तस्मै नमः इत्यनेन प्रकारेण सर्वैः कीर्तमाने हे भद्र विदुर सन्निन्ये प्रवर्त
यामास ८८ सर्वात्मन यासर्व भागभोक्तापि भगवद्विज्ञानं दत्तः श्रोपि स्वेन भागेन त्रिक
पाल पुरोडाशेन प्रीयमान इव दक्षमाभाष्य संबोध्य बभाषे ८९

योऽहं जगतः कारणं आत्मा ईश्वरश्च उपद्रष्टा साक्षी च स्वप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च शर्वश्चेत्यन्वयः ५० कुतइ
त्यत आह अहमेवात्ममायामधिष्ठाय जगत्सृष्ट्यादि कुर्वन् स च स च सर्वशक्तियोजितो सत्तो धारयामि ५१ तस्मिन्केवले
ऽद्वितीये समानासमानज्ञाने यभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेनाज्ञः पश्यतीत्यर्थः ५२ विद्वांस्तु न म

श्रीभगवानुवाच अहं ब्रह्मा च शर्वश्च जगतः कारणं परं आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ५० आ
त्ममायां समाविश्य सोऽहं गुणमयीं द्विज सृजन्रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचितां ५१ तस्मिन्ब्रह्मण्य
द्वितीये केवले परमात्मनि ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ५२ यथा पुमान्न स्वाङ्गेषु शिरःपा
ण्यादिषु क्वचित् पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ५३ त्रयाणामेकभावानां यो न पश्यति वै भिदां
सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ५४ मैत्रेय उवाच एवं भगवतादिष्टः प्रजापतिपतिर्हरिं अर्चि
त्वा क्रतुना स्वेन देवानुभयतोऽयजत् ५५ रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः कर्मणोदवसानेन सोम
पानितरानपि उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ५६

पश्यतीति सदृष्टान्तमाह यथेति ५३ तस्मादेवमेकोऽपि पश्यन्कृतार्थो भवतीत्याह त्रयाणामेकोभावः स्वरूपं येषां ५४
स्वेन क्रतुना रिक्तया लिप्सया उभयतः अङ्गैः प्रधानेन च ५५ स्वेन भागेन यज्ञावशिष्टेन उदवस्यते समाप्यते नेनेत्युदवसा
नं तेन कर्मणा सोमपानितरानपि उपाधावदित्यन्वयः अङ्गैः प्रधानेन च ५५ स्वेन भागेन यज्ञावसिष्टेन उदवस्यते समा
प्यते ततश्च उदवसकर्म समाप्य अवभृथस्नानं यथा भवति तथा स्नातवान् ५६

स्वेनैवानुभावेनावाप्तराधसे संप्राप्तसिद्धये तस्मा अपि ५७ ५८ अव्यक्तेभजतेस्म अनन्यभावनामेकैवगतिर्यस्तं प्रलयकाले
सुप्ताशक्तिरीश्वरमिव ५९ बृहस्पतेः शिष्यान्मयाश्रुतं ६० यदेतपवित्रं यआकर्णयेत्तथानुकीर्तयेत्तस्यात्मनः पवस्यापिच
हंसंसारव्यसनंसर्वदाधुनोति ६१ इतिश्रीभावार्थदीपिकायांचतुर्थस्कंधेसप्तमोध्यायः ७ दक्षकन्यान्वयेप्रागुक्तदक्षय

तस्माअप्यनुभावेनस्वेनैवावाप्तराधसे धर्मएवमतिंदत्वात्रिदशास्तेदिवंययुः ५७ एवंदाक्षायणीहित्वासती
पूर्वकलेवरं जज्ञेहिमवतः क्षेत्रेमेनायामितिशुश्रुम ५८ तमेवदयितंभूयआवृंक्तेपतिमंबिका अनन्यभा
वैकगतिंशक्तिःसुप्तेवपूरुषं ५९ एतद्भगवतःशंभोःकर्मदक्षाध्वरद्रुहः श्रुतंभागवताच्छिष्यादुद्धवान्मे
बृहस्पतेः ६० इदंपवित्रंपरमीशचेष्टितंयशस्यमायुष्यमघौघमर्षणं योनित्यदाकर्ण्यनरोनुकीर्तयेद्धुनोत्यघं
कौरवभक्तिभावतः ६१ इतिश्रीभागवतेचतुर्थस्कंधेसप्तमोध्यायः ७ मैत्रेयउवाच सनकाद्यानारद

ऋभुर्हंसोरुणिर्यतिः नैतेगृहान्ब्रह्मसुता
ह्यावसन्नूर्ध्वरेतसः १ मृषाधर्मस्यभार्या
सीद्दंभंमायांचशत्रुहन् असूतमिथु
नंतत्तुनिरृतिर्जगृहेप्रजाः २ ॥

त्तकथोदिता मनुपुत्रान्वयेप्राक्स्वायंभुववर्ण्यतेपंचभिः १ अष्टमेगुरुदारोक्तिरोषमत्सरतः पुरात् निर्गतेनध्रुवेणाहृत
पस्तातोषणंहरेः एवंतावन्मनुकन्यान्वयोक्तः एवंमरीच्यादीनांब्रह्मपुत्राणांवंशावर्णिताः तत्रावशिष्टंकिंचिदाह सनका
द्याइतिनावसन्ननाश्रिताः ऊर्ध्वरेतसोनैष्ठिकाः अतस्तेषांवंशोनास्ति १ अधर्मोपिब्रह्मपुत्रस्तस्यवंशमाह मृषेतिचत
र्भिः दंभः मायाचनाम्नावर्णौमायातद्विनाशेतयोः सोदरयोरपिदांपत्यमधर्माश्रितत्वात् एवमुपर्यपिअप्रजः अपुत्रः २

श्री:
भा० व०
टी०
२५

निकृतिः शठतापद्याभ्यां कलिस्तुनस्य समाहकक्तिमैत्यर्थः ३ यातनातीव्रवेदना ४ प्रतिसर्गोनुसर्गप्रत्ययश्च प्रसर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात्प्रतिसर्गत्वं पतत् एतमधर्मवंशं पुण्यमिति वर्जनद्वारा पुण्यहेतुत्वात् ५ मनोपुत्र वंशांश्च देवेशो ब्रह्मनस्यांशाद् हार्थांज्जन्मयस्य ६ जगतोरक्षायांस्थितौ ७ सुनीतिः सुरुचिश्चजायेतयोर्मध्ये ८ तयोः

तयोः समभवल्लोभो निकृतिश्च महामते तामभ्यांक्रोधमहिंसावयहुरुक्तिः स्वसाकलिः ३ दुरुक्तौ कलि
रादत्तमहम्मृत्युंश्च सत्तम तयोश्चामिथुनं जज्ञे यातना निरयस्तथा ४ संग्रहेण मयाख्यातः प्रतिसर्गस्तवा
नघ त्रिः श्रुत्वैतत्पुमान्पुण्यंविधुनोत्यात्मनो मलं ५ अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह स्वायंभुवस्या
पिमनोर्हरेरंशांशजन्मनः ६ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ वासुदेवस्य कलया रक्षायां जगतः
स्थितौ ७ जायेउत्तानपादस्य सुनीतिः सुरुचिस्तयोः सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ८ एक
दा सुरुचेः पुत्रमंकमारोप्यलालयन् उत्तमंनारुरुक्षंतं ध्रुवं राजाभ्यनंदत ९ तथा चिकीर्षमाणं तं सपत्न्या
स्तनयं ध्रुवं सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता १० नवत्सनृपतेर्धिष्ण्यं भवानारोढुमर्हति नगृ
हीतो मयायत्त्वं कुक्षावपिनृपात्मजः ११ बालोसि वत नात्मानमन्यस्त्रीगर्भसंभवं नूनं वेद भवान्यस्य दुर्ल
भेर्थे मनोरथः १२ तपसाराध्यपुरुषं तस्यैवानुग्रहेण मे गर्भेत्वं साधयात्मानं यदीच्छसि नृपासनं १३

प्रियाप्रियविपर्ययं वपन् ध्रुवववरितमाहयंचभिरध्यायैः सुरुचेः पुत्रमुत्तमसंज्ञंलालयन् ९ तथा अंकारोहचिकीर्षमाणं
१० गर्वोक्तिमेवाहत्रिभिर्नेतिनृपते धिष्ण्यमासनं नृपात्मजोपि भवान्नारोढुम
र्हति ११ पुरुषमी
श्वरं १३

मिषंतंपश्यंतंसन्नवाचंकुंठितवाचं १४ उदूह्यांकमारोप्यश्वसंतःस्फुरदधरोष्ठं १५ शोकएवदावाग्निस्तेनदावाग्निगता
लतेवम्लायितासाबालाविलापंचकार १६ वृजिनस्यदुःखस्यअमंगलमपराधंपरेषुमामंस्थाःयद्यतःपरेभ्योदुःखदा
तियःसःस्वदत्तमेवदुःखंभुंक्ते १७ दुर्भगायाउदरेगृहीतःतस्याएवस्तन्येनवृद्धश्चदुर्भगामेवाहंयामामिडस्पतिःभूप

मैत्रेयउवाच मातुःसपत्न्याःसदुरुक्तिविद्धःश्वसन्रुषादंडहतोयथाहिः हित्वामिषंतंपितरंसन्नवाचंज
गाममातुःप्ररुदन्सकाशं १४ तंनिःश्वसंतंस्फुरिताधरोष्ठंसुनीतिरुत्संगउदूह्यबालं निशम्यतत्पौरमुखा
न्नितांतंसाविव्यथेयद्गदितंसपत्न्या १५ सोत्सृज्यधैर्यंविललापशोकदावाग्निनादावलतेवबालावाक्यंसप
त्न्याःस्मरतीसरोजश्रियादृशावाष्पकलामुवाह १६ दीर्घंश्वसंतीवृजिनस्यपारमपश्यतीबालकमा
हबाला मामंगलंतातपरेषुमंस्थाभुंक्तेजनोयत्परदुःखदस्तत् १७ सत्यंसुरुच्याभिहितंभवान्मेयद्दुर्भ
गायाउदरेगृहीतः स्तन्येनवृद्धश्चविलज्जतेयांभार्येतिवावोढुमिडस्पतिर्मां १८ आतिष्ठतत्तातविमत्सरस्त्व
मुक्तंसमात्रापियदव्यलीकं आराधयाधोक्षजपादपद्मंयदीच्छसेध्यासनमुत्तमोयथा १९ यस्यांघ्रिपद्मं
परिचर्यविश्वविभावनायात्तगुणाभिपत्तेः अजोध्यतिष्ठत्खलुपारमेष्ठ्यंपदंजितात्मश्वसनाभिवंद्यं २० त
थामनुर्वोभगवान्पितामहोयमेकमत्यापुरुदक्षिणैर्मखैः इष्ट्वाभिपेदेदुरवापमन्यतोभौमंसुखंदिव्यमथाप
वर्ग्यम् २१ ॥

तिभार्येतिनिवोढुंस्वीकर्तुंविलज्जतेवाशब्दाद्दासीत्यपि १८ पितृभार्यत्वेनसमामात्रामातुःसपत्न्यायापियदुक्तंतत्पथ्यत्वादितु
रुथमित्यादिनातत्आतिष्ठकुरुअध्यासनंवसतीति १९ परिचर्येतिविश्वस्यविभावनायपालनायात्तास्वीकृतागुणाअभिप
त्तिःसत्त्वगुणाधिष्ठानंयेनतस्यजितआत्मामनःसनःप्राणश्चयैस्तैरभिवंद्यं २० एकमत्याएकाग्रबुद्ध्या २१ ॐन
मोभगवतेवासुदेवाय

श्री:
भा-च-
टी-
२५

मृग्यपदाब्जयोः पद्धतिर्मार्गो यस्य तं मोक्षाश्रयं शरणं व्रज. ततो भजस्व नान्यास्मिन् निजधर्मैर्भाविते शोधिते २२ न मे
वेत्यनेन सूचितं सर्वैर्निमित्तं वयतिनाव्याप्यमिति हस्तेन गृहीतं दीपवत्पद्मं यया इतरैर्ब्रह्मादिभिः २३ संजल्पितं विलापं
ननव अर्थस्यागमो यस्मात्तथाभूतं वच आकर्ण्य २४ विस्मित इत्युक्तं तदेवाह अहो तेजः प्रभावः २५ २६ विकल्पे
मानापमानविवेकसत्यपि भिन्ना न संति किंतु मोहकल्पिता एवेत्यर्थः कुतः यत्सर्वं स्वेनैव निजकर्मभिरेव भवति

तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिं अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भ
जस्व पूरुषं २२ नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन यो मृग्यते हस्तगृहीतपद्म
या श्रियेतरैरंग विमृग्यमाणया २३ मैत्रेय उवाच एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः संनिय
म्यात्मनात्मानं निश्चक्राम पितुः पुरात् २४ नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितं स्पृष्ट्वा मूर्धन्यघ
घ्नेन पाणिना प्राह विस्मितः २५ अहो तेजः क्षत्रियाणां मानभंगममृष्यतां बालोप्ययं हृदा धत्ते यत्समा
तुरसद्वचः २६ नारद उवाच नाधुनाप्यवमानं ते सम्मानं वापि पुत्रक लक्षयामः कुमारस्य सक्तस्य क्री
डनादिषु २७ विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः २८
परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः अथ मात्रोपदिष्टेन
योगेनावरुरुत्ससि यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ३० मुनयः पदवीं यस्य निःसंगेनोरुजन्म
भिः न विदुर्मृगयंतोपि तीव्रयोगसमाधिना ३१

यतः २७ उपशमोपदेशेनानिवर्तयन्निपरितुष्येदिति षड्भिः ईश्वरस्य गतिं वीक्ष्य ईश्वरानुकूल्यं विना नोद्यमाः
फलहेतव इति ज्ञात्वा २९ दुष्करत्वं तत्र समुदायेनाह अथेति द्वाभ्यां यस्य प्रसादमवरोद्धुं प्राप्तुमिच्छसि ३० निःसंगे
न तीव्रयोगयुक्तेन समाधिना मृगयंतेपि यस्य पदवीमार्गं न विदुः स देवो दुराराध्यः ३१

श्रेयसां काले ईहस्व ३२ सुखदुःखयोर्मध्ये सुखे सति पुण्यं क्षीयते दुःखे सति पापं क्षीयते इत्यात्मानं तोषयंस्तमसः पारं
मोहं प्राप्नोति ३३ किंच गुणेनाधिकात्स्वेभ्यः इति ल्यब्लोपे पंचमी तं दृष्ट्वा प्रीतिं कुर्यात् न तु स्पर्धामित्यर्थः अनुक्रो
शं कृपां कुर्यात् न तु तिरस्कारं समानान्मैत्रीं न तु स्पर्धां ३४ ३५ क्षात्रं स्वभावं प्राप्तवतः अत एव नीतस्य दुर्वाक्यबाणैर्भि

अतो निवर्ततामेष निर्बंधस्तव निष्फलः यतिष्यति भवान्काले श्रेयसां समुपस्थिते ३२ यस्य यद्दैववि
हितं स तेन सुखदुःखयोः आत्मानं तोषयन्देही तमसः पारमृच्छति ३३ गुणाधिकान्मुदं लिप्सेदनुक्रो
शं गुणाधमात् मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ३४ ध्रुव उवाच सोयं शमो भगवता सुखदुःखह
तात्मनाम् दर्शितः कृपया पुंसां दुर्दर्शोस्मद्विधैस्तु यः ३५ अथापि मेविनीतस्य क्षात्रं घोरमुपेयुषः सुरुच्या
दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ३६ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ब्रूह्यस्मत्पितृभिर्ब्रह्मन्न
न्यैरप्यनधिष्ठितम् ३७ नूनं भवान्भगवतो योंगजः परमेष्ठिनः वितुदन्नटते वीणां हितार्थं जगतोर्कवत्
३८ इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा प्रीत्या प्रत्याह तं बालं सद्वाक्यमनुकंपया ३९ नारद उवाच
जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते भगवान्वासुदेवस्तं भज तत्प्रवणात्मना ४० धर्मार्थकाम
मोक्षाख्यं य इच्छेच्छ्रेय आत्मनः एकं ह्येव हरेस्तत्र कारणं पादसेवनं ४१

न्ने हृदि न श्रयते न तिष्ठति ३६ अन्यैरनधिष्ठितं त्रिभुवने उत्कृष्टं पदं जेतुमिच्छोर्मे साधु वर्त्म मार्गं ब्रूहि ३७ अंकजः
इति पाठे उत्संगाज्जातो यो नारदः स भगवान् तत्र लिंगं वितुदन् वादयन् हिताय अटति ३८ निःश्रेयसस्य अभिप्रेता
र्थस्य पंथाः कोसावित्यत आह भगवान्वासुदेव एव अतस्तं भजस्व ४० ४१

मधुवनाख्यं तटं गच्छ यत्र मधुवने ४२ अथ्यपत्राभावेपि आत्मन उचितानि योग्यानि देवतानमस्कारादीनि कृत्वेति॰
यमनियमा उक्ताः आसनकल्पनं च कुशादिभिः स्वस्तिकादिभिश्च ४३ प्राणेंद्रियमनसां मलं चांचल्यं व्युदस्येति
प्राणायाम प्रत्याहारौ धारणामाह अभिध्यायेदित्यादिषड्भिः गुरुणा धीरेण मनसा गुरुं श्रीहरिं ४४ रमणी॰

तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि: पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ४२ स्नात्वानुसवनं त
स्मिन्कालिंद्याः सलिले शिवे कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ४३ प्राणायामेन त्रिवृता प्रा
णेंद्रियमनोमलं शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् ४४ प्रसादाभिमुखं शश्वत्प्रसन्नवदने॰
क्षणं सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरम् ४५ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरम् प्रण॰
ताश्रयणं नृम्णं शरण्यं करुणार्णवम् ४६ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनम् शंखच
क्रगदापद्मैरभिव्यक्तचतुर्भुजं ४७ किरीटिनं कुंडलिनं केयूरवलयान्वितं कौस्तुभाभरणग्रीवं पीत
कौशेयवाससं ४८ कांचीकलापपर्यस्तं लसत्कांचननूपुरं दर्शनीयतमं शांतं मनोनयनवर्द्धनम् ४९
पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चतां हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ५०

याण्यंगानि यस्य ओष्ठश्च ईक्षणं च अरुणे ओष्ठेक्षणे धारयतीति तथा नृम्णं मोष्ठमेव त्राणं वा सम्यक् धारयतीति वा
सुकं नसुखकं वेस्कंनासुखकरं पद्मासरकाय नेमर्वपुरुषार्थनिधिमित्यर्थः ४६ पुरुषं पुरुषलक्षणयुक्तं ४७
कौस्तुभस्याभरणं ग्रीवा यस्य ४८ कांचीकलापेन पर्यस्तं परिवेष्टितं मनोनयनयोर्वर्धनं हर्षकरं ४९ हृत्पद्मक
र्णिकायां यद्धिष्ण्यमध्यस्थानं तदाक्रम्य समर्चतां आत्मनि मनसि स्थितम् ५०

ध्यानमाह स्मयमानमिति नितिर्यं नेन आशङ्कया धारणया सुस्थिरेण अत एवैकभूतेन एकाग्रेण धारणोक्तानि विशेषणानि ध्या
नेपि द्रष्टव्यानि यद्वा यथोक्तमात्रमेव तदुक्तमेकादशस्कंधे नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखमिति ५१ समाहितमा
ह एवमिति तूर्णं शीघ्रं संपन्नं सत् ५२ जप्यो मंत्रः ५३ द्रव्याण्येवाह सलिलैरिति शस्तैरङ्कुरैर्वान्यैरंशुकै र्भूर्जत्वगादि
भिः ५४ अधिष्ठानमेवाह लब्ध्वेति मायद्रव्यमयीं शिलादिभिर्निर्मितां पूजाधाकृणहेतुनाह सार्द्धद्वाभ्यां आभृतात्मा धृ-

स्मयमानमभिध्यायेत्सानुरागावलोकनं नियतेनैकभूतेन मनसा वरदर्षभं ५१ एवं भगवतो रूपं सुभद्रं ध्या
यतो मनः निर्वृत्या परया तूर्णं संपन्नं न निवर्तते ५२ जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज यं सप्तरात्रं प्रपठ
न्पुमान्पश्यति खेचरान् ५३ ॐ नमो भगवते वासुदेवाय मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः सपर्यां
विविधैर्द्रव्यैर्देशकालविभागवित् ५४ सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः शस्ताङ्कुरांशुकैश्चा
र्चेत्तुलस्या प्रियया प्रभुं ५५ लब्ध्वा द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु वार्चयेत् आभृतात्मा मुनिः शान्तो यतवाङ्मित
वन्यभुक् ५६ स्वेच्छावतारचरितैरचिंत्यनिजमायया करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमं ५७ परिच
र्या भगवतो यावत्यः पूर्वसेविताः ता मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ५८ एवं कायेन मनसा वचसा च मनोग
तं परिचर्यमाणो भगवान्भक्तिमत्परिचर्यया ५९ पुंसाममायिनां सम्यक् भजतां भाववर्धनः श्रेयो दिशत्य
भिमतं यद्धर्मादिषु देहिनाम् ६०

नचित्तः मितं वन्यं भुङ्क्ते इति तथा ५६ करिष्यतीति तदानीमवतारप्रवृत्त्यभावात् ५७ पूर्वसेविताः सेवनं कारिताः का
र्यत्वेन विहिता इत्यर्थः मंत्रहृदयेन द्वादशाक्षरेण ५८ एवमुक्तरीत्या मनोगतं यथा भवति तथा कायादिभिर्भक्तिम
त्या परिचर्यया परिचर्यमाणो धर्मार्थकामेषु यदभिमतं तत् श्रेयो
दिशतीति द्वयोरन्वयः ५९ ६०

श्री॰
भा॰ व॰
टी॰
३२

विरक्तोभजेन्‌ किमर्थं विमुक्तये ६१ हरेश्चरणाभ्यां चर्चितं मंडितं ६२ अर्हितं सत्कृत्य समर्पितं अर्हणमर्घादि य
स्मै ६३ किं वा न रिष्यते न नश्यति निमित्तं विनर्तकः प्रश्नः ६४ मात्रा सह निर्वासित इति तस्या अप्यनादृतत्वात्‌ ६५
मास्मादंति किं स्विद्भक्षयंतीत्यर्थः ६६ यस्य यशो जगत्प्रावृंक्ते व्याप्नोति ६८ विपुलयन्‌ विस्तारयन्‌ ७० भुवो

विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा तं निरंतरभावेन भजेताद्धा विमुक्तये ६१ इत्युक्तस्तं परिक्रम्य प्रण
म्य च नृपार्भकः ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं ६२ तपोवनं गते तस्मिन्प्रविष्टोंतःपुरं मुनिः अ
र्हितार्हणको राज्ञा सुखासीन उवाच हं ६३ नारद उवाच राजन्किं ध्यायसे दीर्घं मुखेन परिशुष्यता किं
वा न रिष्यते कामो धर्मो वार्थेन संयुतः ६४ राजोवाच सुतो मे बालको ब्रह्मन्मास्मादंत्यर्भकं वृकाः श्रां
तं शयानं क्षुधितं परिम्लानमुखांबुजं ६५ अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय योंकं प्रेम्णारुरुक्षंतं
नाभ्यनंदमसत्तमः ६७ नारद उवाच मा मा शुचः स्वतनयं देवगुप्तं विशांपते तत्प्रभावमविज्ञाय प्रावृं
क्ते यद्यशो जगत्‌ ६८ सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ऐष्यत्यचिरतो राजन्यशो विपुलयंस्तव
६९ मैत्रेय उवाच इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत्‌ ७०
तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीं समाहितः पर्यचरदृष्यादेशेन पूरुषं ७१ त्रिरात्रांते त्रिरात्रांते
कपित्थबदराशनः आत्मवृत्त्यनुसारेण मासं निन्येर्चयन्हरिं ७२ द्वितीयं च तथा मासं षष्ठे षष्ठेर्भको दिने
तृणपर्णादिभिः शीर्णैः कृतान्नोभ्यर्चयद्विभुं ७३ तृतीयं चानयन्मासं नवमे नवमेहनि अब्भक्ष उत्तमश्लोक
मुपाधावत्समाधिना ७४

मधुवने किमकरोदित्यपेक्षायामाह तत्रेत्यादिना अभिषिक्तः स्नातः यस्यां याम: तां ७१ कपित्थानि बदराणि च अश
नं यस्य आत्मवृत्तिर्देहस्थितिः तदनुसारेण ७२ तृतीयं चानयन्‌ ईषदिव नयन्‌ यापयामास अब्भक्षः प्रतिमासमह्नां संकोचन
योतिशोकं वहन्नवानित्यर्थः ७४ ॥

भूतानि शब्दादीनींद्रियाणि च आशेरते यस्मिंस् तन्मन आकृष्य तद्रूपं परं ब्रह्म ध्यायन् ७७ धारयमाणस्य सतः तस्य तेजः सो
ढुमशक्नुवंतः कंपिताः ७८ तस्यांगुष्ठेन निपीडिता आक्रांता सती मही तत्तदा अर्द्धेन ननाम समेंशके अर्द्धशब्दस्य नपुं
सकत्वादंगांगिनोरभेदाद्वैवं समानाधिकरण्यं इभेंद्रेणाधिष्ठिता तरीनौर्यथा पदे पदे सव्यतो दक्षिणतश्च नमति तद्व
त् ७९ असुं प्राणं यथा आह तस्मिन् ध्रुवे विश्वं विश्वात्मकं विष्णुमात्मनः सकाशात् अनन्यया धिया स्वात्माभेददृष्ट्या

चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ७५ पंचमे मास्यनुप्राप्ते
जितश्वासो नृपात्मजः ध्यायन्ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ७६ सर्वतो मन आकृष्य हृदि भूतेंद्रि
याशयं ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरं ७७ आधारं महदादीनां प्रधानपुरुषेश्वरं ब्रह्म धारय-
माणस्य त्रयो लोकाश्चकंपिरे ७८ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही ननाम तत्रा
र्द्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ७९ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्य
या धिया लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिं ८० देवा ऊचुः नैवं विदामो भग-
वन्प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यं ८१ श्रीभ
गवानुवाच मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम यतो हि वः प्राणनिरोध आसीदौत्तान-
पादिर्मयि संगतात्मा ८२ इति श्रीभागवते चतुर्थस्कंधे अष्टमोऽध्यायः ८

भिध्यायति सति किंकृत्वा असुं प्राणं तद्द्वारं च निरुध्य विष्णुमात्मन्येकीकृत्य स्वप्राणनिरोधे कृते विश्वप्राणनिरोधो जात
इति भावः ८० एवं प्राणनिरोधं कदापि विदध्म इति विद्मः अखिलसत्त्वधाम्नः सर्वप्राणिशरीरस्य तत्तस्माद्वृजिनात् क्लेशात्
८१ यतो बालात्त को सौ बालः कथं च तस्मात्प्राणनिरोधस्तत्राह उत्तानपादस्य पुत्रो मयि विश्वरूपे संगतात्मा ऐक्यं प्राप्तो
वर्तत इति ८२ ॥

नवमे तु हरिं दृष्ट्वा लब्ध्वा तस्माद्वरान्ध्रुवः प्रत्यागत्याकरोद्राज्यं पित्रादत्तमितीर्यते एवंभगवद्वाक्येनगतभयाः १
सवैध्रुवःयोगस्यविपाकेनतीव्रेणनिश्चलया गरुडारूढेश्वरःस्थितमपियदानदृष्टवान्सोनापश्यत् तदाभग
वत्तेजःस्वरूपमाकृष्टमन्तस्तिरोहितमुपलभ्योत्थितःसन् तदवस्थंयादृग्गतःस्फुरितःतादृशं २ आगतसा
ध्वसः जातसंभ्रमः विनमय्यआनतंकृत्वासंभ्रममेवाह दृग्भ्यांप्रपिबन्निवपश्यन्नेवपश्यन्नवंदन भुजाभ्यामाश्लि
ष्यन्निवावंदनेत्यर्थः ३ विवक्षंतंतद्गुणवक्तुमिच्छंतं अतद्विदंस्तुत्यानभिज्ञंजानंतं अस्यध्रुवस्यचहृदयेवस्थितत्वात्

मैत्रेयउवाच तएवमुत्सन्नभयाउरुक्रमेकृतावनामाःप्रययुस्त्रिविष्टपम् सहस्रशीर्षापिततोगरुत्म
तामधोर्वनंभृत्यदिदृक्षयागतः १ सवैधियायोगविपाकतीव्रयाहृत्पद्मकोशेस्फुरितंतडित्प्रभम्
तिरोहितंसहसैवोपलक्ष्यबहिःस्थितंतदवस्थंददर्श २ तद्दर्शनेनागतसाध्वसःक्षिताववंदतांगंवि
नमय्यदंडवत् दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येनभुजैरिवाश्लिषन् ३ सतंविवक्षंतमत
द्विदंहरिर्ज्ञात्वास्यसर्वस्यचहृद्यवस्थितः कृतांजलिंब्रह्ममयेनकंबुनापस्पर्शबालंकृपयाकपोले ४
सवैतदैवप्रतिपादितांगिरंदैवींपरिज्ञातपरात्मनिर्णयः तंभक्तिभावोभ्यगृणादसत्वरंपरिश्रुतोरुश्र
वसंध्रुवक्षिति ५ ध्रुवउवाच योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्तिधरःस्वधाम्ना
अन्यांश्चहस्तचरणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यं ६

त्वाब्रह्ममयेनवेदात्मकेनशंखेन ४ भगवताप्रतिपादितांगिरंप्रतिपद्येतिशेषः प्रतिपद्यतामितिपाठेतांवेदा-
त्मिकांपरिज्ञातःपरात्मनोरीश्वरजीवयोर्निर्णयोयेनसः अतएवभक्त्याभावःप्रेमयस्य असत्वरंस्थैर्येणपरिश्रुतः
श्रुतविख्यातउरुश्रवःकीर्तिर्यस्यतंध्रुवाक्षितिःस्थानंयस्येतिभाविनिर्देशः ५ ईशानुग्रहसंभावितवाग्ध्रुवस्तौति
भिः द्वादशादित्यसंकाशैःश्लोकैरस्तौद्धरिंध्रुवः १ योममप्रसुप्तांलीनांइमांवाचं अन्यांश्चप्राणानइंद्रियाणितथा-
प्राणविद्धक्यामसंजीवयति यतःअखिलाशक्तयोज्ञानक्रियाशक्तीर्धारयतीतितस्मैपुरुषायप्रणतोस्मि ६

ननु वागादीन्द्रियशक्तिधरा ब्रह्मादयः प्रसिद्धा नाहमित्यत आह एक इति अनुविश्य पुरुषोऽन्तर्यामी त्वमेक एव तत्तस्यामायायाः असद्गुणेष्विन्द्रियादिषु स्थितः सन् तत्तद्देवतारूपो नानेव भासि न तु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्तिधरः कश्चिदस्तीत्यर्थः ७ अपि च किं वक्तव्यं ब्रह्मादयो ज्ञानादिशक्तिधरा न भवन्तीति यस्मात् ब्रह्मणोऽपि ज्ञानं त्वदधीनमेवेत्याह त्वद्दत्तया वयुनया ज्ञानेन भवन्तं शरणं प्रपन्नो ब्रह्मा इदं विश्वमचष्ट अपश्यत् कथं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् आपवर्ग्यं मुक्तानामपि शरणं कृतविदा सर्वेन्द्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते एवंभूतं त्वां भजन्तः

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु
नानेव दारुषु विभावसुवद्विभासि ७ त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः तस्या
पवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबन्धो ८ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवा
प्ययविमोक्षणमन्यहेतोः अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणां ९ या
निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् सा ब्रह्मणि स्वमहिमन्यपि नाथ मा
भूत्किं त्वन्तकासिलुलितात्पततां विमानात् १०

कृतघ्ना इत्यर्थः ८ ये त्वन्मायामोहिताः कामाद्यर्थं भजन्ति तेऽपि मूढा इत्याह नूनमिति भवाप्ययौ जन्ममरणे ताभ्यां विमोक्षहेतुं त्वामन्यहेतोः कामाद्यर्थं भजन्ति ते नूनं विमुष्टमतयः वञ्चितचित्ताः यतस्ते कल्पतरुं त्वामर्चन्ति तथा कुणपकल्पेन देहेनोपभोग्यं सुखमिच्छन्ति न चेत्थं योग्यं तदित्याह यत्स्पर्शजं विषयसंबन्धजं तत्सुखं नरकेऽपि भवति ९ ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजनेन तु स्यादित्यत आह येति स्वमहिमनि निर्गुणे ब्रह्मण्यपि मा भूत् न भवतीत्यर्थः अन्तकस्यासिना कालेन लुलितात्स्वर्गादिविमानात्पततां सा नास्तीति किमु वक्तव्यम् १० ॥

श्रीः
भा.बा.
व.टी.
२५

अनंतकथाश्रवणाय सत्संगं निर्दिशतीत्याह भक्तिमिति प्रवहतां संतत्येन कुर्वतां ननु मोक्षं किं न याचसे अत आह येन म-
हत्संगेन अंजसा अयत्नेनैव उल्बणं उग्राणि व्यसनानि यस्मिन् तं उरुं नेष्ये पारं गमिष्यामि भवद्गुणकथैवामृतं तस्य पानेन मत्तः
सन् ११ कथामृतपानस्य साधकत्वमाह ते इति न ते अतितरां प्रियमपि मर्त्यदेहं न स्मरंति तदनुसंबंधिनश्च ये सुतादयः अदः
मर्त्यमनु ये बद्धाः तानपि केन ते न स्मरंतीत्याह कृतप्रसंगाः केषु भवदीयपादारविंदसौगंध्ये लुब्धं हृदयं येषां तेषु तत्र हेतुः
नान्येषां केवलयोगादिनिष्ठानां देहाभिमानानिवृत्तिर्दर्शयति १२ नन्वेवं विद्वानपि त्वं किमित्यभिमानवद्वहसि अत

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महतां अमलाशयानां येनांजसोल्बणमुरुव्यसनं
भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ११ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृ-
हवित्तदाराः ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्रसंगाः १२ तिर्यङ्नगद्विजस-
रीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि
न यत्र वादः १३ कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंतसखस्तदंके यन्नाभिसिंधु-
रुहकांचनलोकपद्मगर्भे द्युमान्भगवते प्रणतोस्मि तस्मै १४

आह तिर्यङ्नगादिभिः परिचितं व्याप्तं सत् असत् च विशेषा यस्य महदादीन्यनेकानि कारणानि यस्य हे परम अज
ते इदं स्थविष्ठं विराड्रूपं केवलं वेद्मि अतः परं परमेश्वररूपं न वेद्मि यत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मस्वरूपं च न वेद्मि
अतोऽभिमानो नैव निवर्तत इति भावः १३ तदेव भगवद्रूपं तत्पदद्वयं ज्ञात्वा ईश्वररूपमनुवर्णयन्नमस्करोति क-
ल्पांत इति एतत् त्रैलोक्यं यः पुमान् शेते स्वस्मिन्नेव दृक् न बहिर्यस्य योगनिद्रात्वात् अनंतसखः शेषसहायः
तदंके शेषांके यस्य नाभिरेव सिंधुः समुद्रः तस्मिन् रोहतीति तथा तस्य कांचनलोकपद्मस्य गर्भे कर्णिकायां
द्युमान् तेजस्वी ब्रह्माभवत् तं प्रणतोस्मीत्यर्थः १४ २५

श्रीः
भा॰ व॰
टी॰
४॰

व्यवसितं संकल्पितं १९ तत्प्रयच्छामीत्युक्तं किं तदित्यपेक्षायामाह नान्यैरिति संज्ञाभ्यां हे भद्र ध्रुवाक्षितिर्विशेषो
यस्मिन्नाहितमर्पितं २० आलानाक्रमणाय भ्राम्यमाणानां पशूनां बंधनस्तंभो मेढी तस्यां वलीवर्दसमूहवत् भवो
तत्कल्पवासिनां परस्तादपि स्थास्नु लोकत्रयनाशेऽप्यनश्वरं धर्माग्न्यादयो नक्षत्ररूपाः वनौकसः सप्तर्षयः यत्प्रदक्षि
णीकृत्य भ्रमंतश्चरंति २१ यत्तु राज्यान्नो भविष्यतीत्याह प्रस्थित इति त्रिभिः पृथिवीं दत्वा वने प्रस्थिते भावे क्तः वनं

श्रीभगवानुवाच वेदाहं ते व्यवसितं हृदि राजन्यबालक तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत १९ ना
न्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षितिः यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं २० मेढ्यां गोचक्रवत्स्था
स्नु परस्तात्कल्पवासिनां धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः २१ चरंति दक्षिणीकृत्य भ्रमंतो य
त्सतारकाः २१ प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः २२
त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति २३ इष्ट्वा मां यज्ञहृदयं
यज्ञैः पुष्कलदक्षिणैः भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि २४ ततो गंतासि मत्स्थानं सर्वलो
कनमस्कृतं उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते गतः २५ मैत्रेय उवाच इत्यर्चितः स भग
वानतिदिश्यात्मनः पदं बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः २६ सोऽपि संकल्पजं विष्णोः पादसेवो
पसादितं प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरं २७ ॥

प्रस्थिते भावे क्तः वनं प्रति तीर्थगमने कृते सति रक्षिता रक्षिष्यति २२ किं च इष्ट्वा मां यज्ञस्ते हृदयं प्रिया मूर्तिर्यस्य तं २४ म
या संकल्पितमपि मज्जन्मस्पत्त्वस्त्वेद्वादेवं भविष्यतीत्याह त्वद्भ्रातरीति सा सुरुचिः प्रवेक्ष्यति २३ यतः स्थानात् २५
अतिदिश्य दत्वा २६ संकल्पजं मनोरथं पादसेवया प्राप्यापि संकल्पस्य निर्वाणं समाप्तिं यस्मात् २७ ॥

ननुममापिस्वापाद्यवस्थावत्त्वेकोजीवाद्विशेषइत्याह त्वंनित्यमुक्तेतिविरक्तः जीवविलक्षणएवाःसेतिष्ठसिवैलक्षण्यमेवाहत्वं।
नित्यमुक्तः जीवस्तुबन्धमोक्षान्मुच्यतेत्वंपरिशुद्धः सतुमलिनः त्वंविबुद्धः सचत्तः त्वमात्माजीवस्तुजडः त्वमविकारः सतुविकारी।
त्वमादिपुरुषः सतुवादिमान् त्वंतुभगवान् सतुभक्तहीनः त्वंगुणानांत्रयाणामधीशः सतुपरतंत्रः कृतमनहैलक्षण्यंयद्यतःबुद्ध्याव
स्थितिंबुद्धेस्तांतामवस्थांअखंडितयास्वदृष्ट्याविलक्षणाद्रष्टापशासिरहेविन्तर्न्नभन्ययानं अतोबुद्ध्यवस्थितिमित्यत्रषष्ठीभा
वः तथाभूतएवत्वंस्थितौमिपालनेअधिमखः पतत्रापिष्ठानाख्योविभुः १५ नमोवकुलिन्नूपेणज्ञानेनमस्करोतियस्मिन्निति य

त्वंनित्यमुक्तपरिशुद्धविबुद्धआत्माकूटस्थआदिपुरुषोभगवांस्त्र्यधीशः यद्बुद्ध्यवस्थितिमखंडितयास्वदृष्ट्याद्र
ष्टास्थितावधिमखोव्यतिरिक्तआस्से १५ यस्मिन्विरुद्धगतयोह्यनिशंपतंतिविद्यादयोविविधशक्तयआनुपूर्व्या
त् तद्ब्रह्मविश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहंप्रपद्ये १६ सत्याशिषोहिभगवंस्तवपादपद्ममा
शीस्तथानुभजतःपुरुषार्थमूर्तेः अप्येवमर्यभगवान्परिपातिदीनान्वाश्रेववत्सकमनुग्रहकातरोस्मान् १७
मैत्रेयउवाच अथाभिष्टुतएवंवैसत्संकल्पेनधीमता भृत्यानुरक्तोभग
वान्प्रतिनंद्येदमब्रवीत् १८ ॥

तत्कस्मादहंत्वांनतिविश्वस्यभवोयस्मात् एकमखंडमाद्यमनादि १६ सकामभजनादपिमोक्षमाशासानआह हेभगवन्पु
रुषार्थः १७ एवमनिंदः सपवन्मूर्तिर्यस्यतस्यतवपादपद्मंआशिषोराज्यादेः सकाशात्सत्याआशीःपरमार्थफलंहिनिश्चितेक
स्यतथानेनप्रकारेणावमेवपुरुषार्थइत्येवंनिष्कामतयाअनुभजतः यद्यप्येवंतथापिहेअर्यस्वामिन्दीनान्सकामानप्यस्मा
न्भगवान्भवात्परिपातिसंसारभयाद्रक्षत्येव यतस्त्वमनुग्रहेहिताचरणेकातरः परवशः यथानवप्रसूतावाश्रावत्सन्संतीरं
पाययतिवृकादिभ्योरक्षतिवनद्वत् १८

मायाविनः सकाशात्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानं मतः असिद्धार्थमप्राप्तमनोरथममन्य
त पुरुषार्थविदपि २८ २९ तापमेवाह समाधिनेति सार्धैः षड्भिः नैके अनेकभवा यस्मिन् बहुजन्मसाध्येनेत्यर्थः प्राप्तमस्त
त्यादि समधिगतश्चाधिजन्मस्य हरेः पादच्छायायां स्थितं मात्मानं स्मरन्नाह छायामुपेत्येति पृथक् मतिर्भेददृष्टिः सन्नहाक
पृमिति भावः ३० अनात्म्यमात्मस्वरूपानवसत्तं भवच्छेतः सकाशात् यदन्तवत् तदा याचे याचितवानस्मि ३१ अत्र तत्कारणं संभाव
यति मतिरिति पतद्भिर्मदपेक्षया अधः पतद्भिः अतएवासहनशीलैः नाग्रहिषमन्यमानेन तद्यादिसत्यं यो नारदस्य वचो यो न गृ-

विदुर उवाच सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मा
नममन्यतार्थवित् २८ मैत्रेय उवाच मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन् नैच्छन्मुक्तिपतेर्मुक्तिं तस्मा-
त्तापमुपेयिवान् २९ ध्रुव उवाच समाधिना नैकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः मासैरहं षड्भिरमुष्य पा-
दयोश्छायामुपेत्यापगतः पृथङ्मतिः ३० अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत भवच्छिदः पादमूलं गत्वा याचे
यदंतवत् ३१ मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ३२ दैवीं मायामु-
पाश्रित्य प्रसुप्त इव भिन्नदृक् तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायु-
षि प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम् ३४ भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः स्वाराज्यं यच्छतो मौढ्या-
न्मानो मे भिक्षितो बत ऐश्वर्यात्क्षीणपुण्येन फलीकारानिवाधनः ३५ ॥

हीतवान् अस्मि तस्य मे मतिर्विदूषिता ३२ किं च दैवीमिति प्रसुप्तः स्वप्नानिव पश्यन् द्वितीये असत्यपि भ्रातैव भ्रातृव्यः शत्रुः इति हृ-
द्रुजा हृद्रुजा हृदयशोकेन तप्ये तापमनुभवामि ३३ किं च मया प्रसाद्य यत्प्रार्थितं तद्व्यर्थं प्रार्थितमाह भवच्छिदमिति ३४ यत
देवसहस्रोन्नमाह स्वाराज्यं निजानंदं प्रयच्छतः सकाशात् दभिमानः क्षीणपुण्येन मया भिक्षितः याचितः क्षीणेन पुण्येनेति वा दृ-
ष्टान्तमेव संबंध यथाधनः ईश्वरात् चक्रवर्तिनः फलीकारान् सतुषतंडुलकणान् याचते तद्वत् ३५

श्री:
भा-ढं.
टी.
३१

एवंनिस्पृहत्वंतस्ययुक्तमित्याह नवैइति तस्यदास्यंविना अन्यमर्थमात्मनोनवैवांछंति यदृच्छयैवलब्धेनमनसःसमृद्धिर्ये-
षांते ३६ प्रसन्नमाह आकर्ण्येतिसंपरेत्यमृत्वा आगतमाकर्ण्ययथानश्रद्दधेविश्वासंनचकार अभद्रस्यममभद्रं
कुतइतिमत्वा ३७ धर्षितस्त्वपिपतन्नपिदेवर्षेर्वाक्यंश्रद्धाय ३८ ब्राह्मणादिभिःपर्यस्तःपरिवृतः ३९ ४० अस्यराज्ञोमहि

मैत्रेयउवाच नवैमुकुंदस्यपदारविंदयोरजोजुषस्तातभवादृशाजनाः वांछंतितद्दास्यमृतेर्थमात्मनो
यदृच्छयालब्धमनःसमृद्धयः ३६ आकर्ण्यात्मजमायांतंसंपरेत्ययथागतं राजानश्रद्दधेभद्रमभद्रस्यकु
तोमम ३७ श्रद्धायवाक्यंदेवर्षेर्हर्षवेगेनधर्षितः वार्ताहर्तुरतिप्रीतोहारंप्रादान्महाधनम् ३८ सदश्वं
रथमारुह्यकार्तस्वरपरिष्कृतम् ब्राह्मणैःकुलवृद्धैश्चपर्यस्तोमात्यबंधुभिः ३९ शंखदुंदुभिनादेनब्रह्म
घोषेणवेणुभिः निश्चक्रामपुरात्तूर्णमात्मजाभीक्षणोत्सुकाः ४० सुनीतिःसुरुचिश्चास्यमहिष्यौ
रुक्मभूषिते आरुह्यशिबिकांसार्धमुत्तमेनाभिजग्मतुः ४१ तंदृष्ट्वोपवनाभ्याशआयांतंतरसारथात्
अवरुह्यनृपस्तूर्णमासाद्यप्रेमविह्वलः ४२ परिरेभेंगजंदोर्भ्यांदीर्घोत्कंठमनाःश्वसन् विष्वक्सेनांघ्रिसंस्प
र्शहताशेषाघबंधनम् ४३ अथाजिघ्रन्मुहुर्मूर्ध्निशीतैर्नयनवारिभिः स्नापयामासतनयंजातोद्दाममनो
रथः ४४ अभिवंद्यपितुःपादावाशीर्भिश्चाभिमंत्रितः ननाममातरौशीर्ष्णासत्कृतःसज्जनाग्रणीः ४५
सुरुचिस्तंसमुत्थाप्यपादावनतमर्भकं परिष्वज्याहजीवेतिबाष्पगद्गदयागिरा ४६

योर्मध्येउत्तमेनसहैकामेवशिबिकांनरविमानमारुह्य ४१ उपवनस्याभ्याशेसमीपे ४२ विष्वक्सेनांघ्रिसंस्पर्शेन
हतमशेषमघंबंधनंयस्य ४३ जातउद्दामोमहान्मनोरथोयस्य ४४ अभिमंत्रितःपित्राशीर्भिःसद्भावेनकृतसं
भावणः ४५ ४६

स्तरुच्चः प्रीतिस्तां संभावितेत्याह यस्येति नमंति आपो यथा स्वयमेव निम्नं देशमवनं वेति ४७ ऊहतुर्दधतुः ४८ हे वीरवी
रसू ध्रुवमातः अभिषिच्यमानाभ्यां स्तनाभ्यां पयः सुस्राव ५० चिरं नष्टः दर्शनमप्राप्तः रक्षिता रक्षिष्यति ५१ ५२
पदमितिव्यवहितंपिशाद्युपलालनंमरणमुपपन्ने ५३ पुरं वर्णयति तत्र तत्रेति चतुर्भिः सवृंदैः फलमंजरीयुक्तैः पूगानां

यस्यप्रसन्नोभगवान्गुणैर्मैत्र्यादिभिर्हरिः तस्मैनमंतिभूतानिनिम्नमापइवस्वयं ४७ उत्तमश्चध्रुवश्चोभाव
ह्वं न्योन्यंप्रेमविह्वलौ अंगसंगादुत्पुलकावस्रौघंमुहुरूहतुः ४८ सुनीतिरस्यजननीप्राणेभ्योपिप्रियंसुतं
उपगुह्यजहावाधिंतदंगस्पर्शनिर्वृता ४९ पयःस्तनाभ्यांसुस्रावनेत्रजैःसलिलैःशिवैः तदाभिषिच्यमा
नाभ्यांवीरवीरसुवोमुहुः ५० तांशशंसुर्जनाराज्ञींदिष्ट्यातेपुत्रआर्तिहा प्रतिलब्धःचिरंनष्टोरक्षितामंडलं
भुवः ५१ अभ्यर्चितस्त्वयानूनंभगवान्प्रणतार्तिहा यदनुध्यायिनोधीरामृत्युंजिग्युःसुदुर्जयं ५२ लाल्य
मानंजनैरेवंध्रुवंसभ्रातरंनृपः आरोप्यकरिणींहृष्टःस्तूयमानोविशत्पुरं ५३ तत्रतत्रोपसंक्लृप्तैर्लसन्म
करतोरणैः सवृंदैःकदलीस्तंभैःपूगपोतैश्चतद्विधैः ५४ चूतपल्लववासःस्रक्मुक्तादामविलंबिभिः उपस्कृ
तंप्रतिद्वारमपांकुंभैःसदीपकैः ५५ प्राकारैर्गोपुरागारैःशातकुंभपरिच्छदैः सर्वतोलंकृतंश्रीमद्विमान
शिखरद्युभिः ५६ मृष्टचत्वररथ्याट्टमार्गंचंदनचर्चितं लाजाक्षतैःपुष्पफलैस्तंडुलैर्बलिभिर्युतं ५७ ध्रु
वायपथिदृष्टायतत्रतत्रपुरस्त्रियः सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानिच ५८

पोतैर्बालवृक्षैःतद्विधैःसवृंदैःउपस्कृतंप्रतिद्वारमित्युत्तरेणान्वयः ५४ चूतपल्लवाश्चवासांसिचस्रजश्चमुक्तादामानिते
षांविविधैर्लंबनमस्तियेषुकुंभेषु ५५ गोपुरागाराश्चशातकुंभाःपरिच्छदाःपरिकरायेषुविमानानामिवशिखरैः
द्यौःकांतिर्येषां ५६ चत्वरमंगणंरथ्यामार्गाःअट्टउच्चस्थपदिनिर्मिताभूमिकामार्गावानराःमृष्टाःसंमार्जि
तास्तन्नगरदृश्यायस्मिन्श्वेतसर्षपाःसिद्धार्थाःअक्षतायवाः ५८ ॥

उपजह्रुःविकरन्त्यमतीसत्यः ५५ ६१ ६२ ऊमुनरूमदंपद्यादिमन्येवाप्यः ६४ ६५ दृष्टवयसंप्राप्तयौवनं
अनुरक्ताःप्रजायस्मिन् ६६ प्रयमसेष्टद्वं ६७ इतिचतुर्थेनवमः ९ दशमेभ्रातृहंतॄणांयक्षाणामकरोद्वधं
एकपवालकोगतेत्यस्यविक्रमउच्यते योषितांरत्नमिवातिमनोहरं कन्यारत्नंचेतिवा १ यक्षेणाज्ञोहिमवति·

उपजह्रुःप्रयुंजानावात्सल्यादाशिषःसतीः शृण्वंस्तद्वल्गुगीतानिप्राविशद्भवनंपितुः ५९ महाम
णिव्रातमयेसतस्मिन्भक्तोत्तमे लालितोनितरांपित्रान्यवसद्दिविदेववत् ६० पयःफेननिभाःशय्या
दांतारुक्मपरिच्छदाः आसनानिमहार्हाणियत्ररैक्मा उपस्कराः ६१ यत्रस्फटिककुड्येषुमहामरकते
षुच मणिप्रदीपाआभांतिललनारत्नसंयुताः ६२ उद्यानानिचरम्याणिविचित्रैरमरद्रुमैः कूजद्वि
हंगमिथुनैर्गायन्मत्तमधुव्रतैः ६३ वाप्योवैदूर्यसोपानाःपद्मोत्पलकुमुद्वतीः हंसकारंडवकुलैर्जुष्टाश्च
क्राह्वसारसैः ६४ उत्तानपादोराजर्षिःप्रभावंतनयस्यतं श्रुत्वादृष्ट्वाद्भुततमंप्रपेदेविस्मयंपरं ६५
वीक्ष्योढवयसंपुत्रंप्रकृतीनांचसंमतं अनुरक्तप्रजंराजाध्रुवंचक्रेभुवःपतिं ६६ आत्मानंचप्रवयसमाक
लय्यविशांपतिः वनंविरक्तःप्रातिष्ठद्विमृशन्नात्मनोगतिं ६७ इतिश्रीभागवतेचतुर्थस्कंधेनवमोध्या
यः ९ मैत्रेयउवाच प्रजापतेर्दुहितरंशिशुमारस्यवैध्रुवः उपयेमेभ्रमिंनामतत्सुतौकल्पवत्सरौ १ इला
यामपिभार्यायांवायोःपुत्र्यांमहाबलः पुत्रमुत्कलनामानंयोषिद्रत्नमजीजनत् २ उत्तमस्त्वकृतोद्वाहो
मृगयायांबलीयसा हतःपुण्यजनेनाद्रौतन्मातास्यगतिंगता ३ ध्रुवोभ्रातृवधंश्रुत्वाकोपामर्षशुचा
र्पितः जैत्रंस्यंदनमास्थायगतःपुण्यजनालयं ४

हतः आज्ञाविनिमयदेयुद्धेप्रयस्यगतिंगतान्नृतेत्यर्थः ३ कोपामर्षशुचोदंदैकंतेनार्पितोव्याप्तः जैत्रंजयहेतुंपुण्यज
नालयंअलकां ४ ॥

रुद्रानुचराभृत्यादयः दध्मौवादितवान् येन शंखवादनेन हेतुना ऽपदेश्योपत्तस्त्रियः ६ ७ एकैकं त्रिभिस्त्रिभिरित्येवं
सर्वानुत्रयोदशायुतानि यदायुगपद्दहन्जघान ८ ९ तेपितत्कर्मासहमानाअस्त्रमविध्यन्दिशःएवंयथाभवन्त्येवंषड्भिःब

गत्वोदीचींदिशंराजारुद्रानुचरमेदिनाम् ददर्शहिमवद्द्रोण्यांश्वेरीगुल्मकसंकुलां ५ दध्मौशंखंमहाबाहुःस्वं
दिशश्चानुनादयन् येनोद्विग्नदशाःसत्वरूपदेश्योत्रसम्भ्रमं ६ ततोनिष्क्रम्यबलिनउपदेवमहाभटाः अस
हंतोनिनादंतमभिपेतुरुदायुधाः ७ सतानापततोवीरउग्रधन्वामहारथः एकैकंयुगपत्सर्वानहन्बाणैस्त्रि
भिस्त्रिभिः ८ तेवैललाटलग्नैस्तैरिषुभिःसर्वएवहि मत्वानिरस्तमात्मानमाशंसन्कर्मतस्यतत् ९ तेपितंचाम
मृष्यन्तःपादस्पर्शमिवोरगाः शरैरविध्यन्युगपद्द्विगुणंप्रचिकीर्षवः १० ततःपरिघनिस्त्रिंशैःप्रासशूलपरश्वधैः
शक्त्यृष्टिभिर्भुशुण्डीभिश्चित्रवाजैःशरैरपि ११ अभ्यवर्षन्प्रकुपिताःसरथंसहसारथिं इच्छन्तस्तत्प्रतीकर्तुमयुत
नानांत्रयोदश १२ औत्तानपादिःसतदाशस्त्रवर्षेणभूरिणा नउपादृश्यतच्छन्नआसारेणयथागिरिः १३ हाहा
कारस्तदैवासीत्सिद्धानांदिविपश्यतां हतोयंमानवःसूर्योमग्नःपुण्यजनार्णवे १४ नदत्सुयातुधानेषुजयकाशि
ष्वथोमृधे उदतिष्ठद्रथस्तस्यनीहारादिवभास्करः १५ धनुर्विस्फूर्जयन्दिव्यंद्विषतांखेदमुद्वहन् अस्त्रौघंव्य
धमद्बाणैर्घनानीकमिवानिलः १६ तस्यतेचापनिर्मुक्ताभित्वावर्माणिरक्षसाम् कायानाविविशुस्तिग्मागिरी
नशनयोयथा १७ ॥ १७

ड्भिःप्रतिकर्तुमिच्छवः १० चित्रवाजैर्विचित्रपक्षैः ११ धारासंपातेनच्छन्नोगिरिरिवनैवादृश्यत १३ सूर्यःसूर्यतुल्यः १४
यातुधानेषुराक्षसेषुजयकाशिषुजितंजितमितिजयप्रकाशकेषुसत्सु १५ व्यधमत्संचूर्णयामास १६ वर्माणिकवचा
नि १७ रक्षसांविनाशकायतम:

शिवः प्रमुखैर्वा स्वना: प्रकीर्णा वेजुविनिहद्योरन्वय: ३८ प्रायो बाहुल्येन विहूकणाः संकिन्नाः अवयवायेषां ३९ प्रान
नायितं भगस्त्रपाणीं ४१ इनिश्रुवत्रित्यजापिनमायिनामितनुषंगः विरहघोभुवः यत्नः यत्नवान् प्रतियोगः पुनरुद्योगः
तस्मा छिंकितः नभस्वतो वायोर्हेतोः ४२ विस्फुरंतस्तडितोयस्मिन्ननेनत्रासयंतः स्तनयित्नवो यन यो यस्मिन् ४३
वहृपुर्निपेतुरित्यर्थः नभस्तजनि प्राणिशरमित्यस्तगिहृल्लेष्मादिमेदसः पुंस्त्वमार्षमेतांसिक्रस्याग्रतोलिपेतः ४४ साश्मव

भल्लैः संछिद्यमानानां शिरोभिश्चारुकुंडलैः ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ३८ हारकेयूरमु
कुटैरुष्णीषैश्च महाधनैः शास्त्रनास्तरणाभूर्वादेजुवीरमनोहरा: ३९ हतावशिष्टा इतरे रणाजिराद्
लोकगणाः त्वचियुवर्यसायकैः प्रायोविहूकाणवयवाविडुर्वुभुंगेंद्रविक्रीडितमृत्युयाडव ४० अपवयमा
नः स्वतदानवनायकं महामृधे कंचन मानवोत्तमः पुरोदितलब्धमपना विशाद्विषोन मायिनो वेदविकीर्षितं जनः
४१ अनिश्रुवं चित्ररथः स्वसारथीयत्तः परेषां पतिनियोग शंकितः मुमोच वै शार्ङ्गं जलयोविवेकिनेन भस्वतोदित्य
रजोत्वहट्टयतन ४२ तृणेनाच्छादितं व्योमं चनानीकेन सर्वतः विस्फुरत्तडितो दिक्षुत्रासयन्नुयितुवार्णे
४३ वव्हपुरुधिरैव्यासकूयविण्मूत्रमेदसः निपेतुर्गगनादस्य कबंधान्यग्रतोनव ४४ ततः खेदृश्यतगिरि
र्निपेतुः सर्वतोदिशं गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ४५ महयोग्निनिः श्वासावमनोग्नि
रूपाग्निभिः प्रमथावन्नाजामत्ताः सिंहव्याघ्रवराहशः ४६ सप्तसमुद्रोर्मिभिर्भीमः ज्ञावयन्सर्वतोभुवं
समसादमहाहारः कल्पांत इव भीषणः ४७ एवंविधान्यनेकानि त्रासनान्यमनस्विनाम् सस्रसृष्टमायमायान
यवा सुर्यामायया सुराः ४८ भुवेश्च ताभ्यां ममसुर्मायामायामतिदृश्यते निशाम्यतस्य सुनयः समाशोसन्समाग

वर्षिणः अश्मसहितं पतनं वर्षेतहेतः ४५ प्रशानिवषिः श्वासोयेषां ४६ शासनानि भयंकराणि तिग्माकृ रागतिप्रवृत्तिर्येषां प्रस
रागात्समादिशष्टे रहृतान्तरत्नेन यत्नापयोच्यते ४८ तस्य शंकल्याणं श्राशंसन् प्रार्थितवंतः ४९ नवद्विपत्तान् शान्त्राशयत

यक्षाद्वयोनयस्ताणांतयैर्हृष्टामन्त्रः स्वयं अगात्पवारयामासध्रुवंततोमदेशतः एवंगदतोवचनमउद्देशान्निशास्यउपस्थ
श्चात्रायणनिर्मितेनारायणास्त्रेणतंसंदधेक्लेशारागादद्वेषोयथा किंचनस्यार्मात्रेअर्घेर्वनागयणाद्दन्तमस्त्रंप्रयुंजतः
संदधेतंनःमनःस्वर्णमयाःपुंखाःमूलंप्रांतायेषांकलहंसानावामासिपद्यायेषांतेध्राविनिःसृतनाइतिरद्यसुपरिष्टात्

श्रीमैत्रेयउवाच निशाम्यगदतामेवमृषीणांधनुर्विध्रुवः संदधेस्त्रमुपस्पृश्यपयनारायणनिर्मितं १ संधीय
मानएतस्मिन्मायागुह्यकनिर्मिताः क्षिप्रंविनेशुर्विद्वत्क्लेशाज्ञानोदयेयथा २ तस्यार्षमस्त्रंधनुषिप्रयुंजतः
स्वर्णपुंखाःकलहंसवाससः विनिःसृताआविविशुर्द्विषद्बलंयथावनंभीमरवाःशिखंडिनः ३ तैस्तिग्मधा
रैःप्रधनेशिलीमुखैरितस्ततःपुण्यजनाउपद्रुताः तमभ्यधावन्कुपिताउदायुधाःसुपर्णमुन्नद्धफणाइवाहयः
४ सतान्पृषत्कैरभिधावतोमृधेनिकृत्तबाहूरुशिरोधरोदरान् निनायलोकंपरमर्कमंडलंव्रजंतिनिर्भिद्ययमूर्ध्व
रेतसः ५ तान्हन्यमानानभिवीक्ष्यगुह्यकाननागसश्चित्ररथेनभूरिशः औत्तानपादिंकृपयापितामहोमनु
र्जगादोपगतःसहर्षिभिः ६ मनुरुवाच अलंवत्सातिरोषेणतमोद्वारेणपाप्मना येनपुण्यजनानेतानव
धीस्त्वमनागसः ७ नास्मत्कुलोचितंतातकर्मैतत्सद्विगर्हितं वधोयदुपदेवानामारब्धस्तेकृतैनसां ८ नन्वेक
स्यापराधेनप्रसंगाद्बहवोहताः भ्रातुर्वधाभितप्तेनत्वयांगभ्रातृवत्सल ९ नायंमार्गोहिसाधूनांहृषीकेशा
नुवर्तिनां यदात्मानंपराग्गृह्यपशुवद्भूतवैशसं १०

शिलीमुखायस्तरणात् प्रधनेयुद्धेउत्पद्रुताउपस्थिताः फणायेषांतेसमतान्पृषत्कैर्बाणैर्निकृत्ताबाहूदयोयेषांतान्परंलोकंनिना
यकथंभूतंऊर्ध्वरेतसःसंन्यासिनोर्कमंडलंनिर्भिद्ययेव्रजंतितंनात् अनागसोनिरपराधान्तमसोनरकस्यद्वारेणयेनदो
षेणतमद्रुहंतारःकथमकृतेनसोतप्राहुनाति निमित्तमपराधेनउचितंनभवतीत्याह ॥ १०

तं च बाले साधुः सन्निदानीं कथमन्यथाकृतवानित्याह सर्वभूतात्मभावेनेति द्वाभ्यां ११ अनुध्यातः हृदि स्थितः त
त्पुंसां विदामानामपि साधुत्वेन संमतः १२ सतां व्रतमेवाह महत्सु तितिक्षया नीचेषु करुणया समेषु मैत्र्या चाखिले
षु जंतुषु समत्वेन च १३ ततः कृतार्थो भवतीत्याह संप्रसन्ने सति गुणैर्विमुक्तो न पवनत्कार्येण जीवेन लिंगशरीरेणानि
र्मुक्तः सन्निर्वाणं सुखात्मकं ब्रह्म प्राप्नोति १४ आत्महंतृत्वमंगीकृत्योक्तं इदानीं तत्त्वतो आत्मनो भ्रातृवधादिसंबंधः नेत्या-

सर्वभूतात्मभावेन भूतावासं हरिं भवान् आराध्याप दुराराध्यं विष्णोस्तत्परमं पदं स त्वं हरेरनुध्यातस्तत्पुं
सामपि संमतः कथं त्ववद्यं कृतवाननुशिक्षन् सतां व्रतं १२ तितिक्षया करुणया मैत्र्या चाखिलजंतुषु
समत्वेन च सर्वात्मा भगवान्संप्रसीदति १३ संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः विमुक्तो जीवनिर्मुक्तो
ब्रह्म निर्वाणमृच्छति १४ भूतैः पंचभिरारब्धैर्योषित्पुरुष एव हि तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह
१५ एवं प्रवर्तते सर्गः स्थितिः संयम एव च गुणव्यतिकराद्राजन्मायया परमात्मनः १६ निमित्तमात्रं तत्रासी
न्निर्गुणः पुरुषर्षभः व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् १७ ॥

न्योन्यहंतृत्वादिकमपीत्याह दशभिः भूतैः पंचभिरारब्धैर्देहाद्याकारेण परिणतैर्योषित्पुरुषश्चेति प्रसिद्धः तयोर्व्यवा
याद्व्यवायेन मैथुनात् संभूतिरन्ययोर्योषित्पुरुषयोरिह संसारे भवति १५ एवं तावत्सर्गः प्रवर्तते एवं पालकाकारपरिणते
र्भूतैरेव स्थितिः हंतृदेहाकारपरिणतैः संयमः स च परमात्मनो मायया गुणानां व्यतिकरात् न तु स्वतः १६ न तु जन्
मनो देहानां गुणानां वा कथं सर्गादिहेतुत्वं तत्राह निमित्तमात्रं पुरुषर्षभः ईश्वरः तत्र यस्मिन्निमित्ते सति कार्यकारणात्म

ननु सर्वेषु निमित्तेषु तर्हि नस्याद्विशेषात् युगपदेव सर्गादित्रयं भवेदत आह स खल्विति कालशक्त्याक्रमेण गुणानां प्रवाहः ।
क्षोभः तेन विभक्तं सत्त्वादिविषयं वीर्यं शक्तिर्यस्य ननु कालोपि गुणान् युगपदेव क्षोभयत्वत आह चेष्टा कालशक्तिः दुर्वि
भाव्या अचिन्त्या १७ ननु पित्रादिः सृजति पालयति राजादिः नहन्ति चौरादिः नतु ईश्वरस्तत्राह स इति जनेन पित्रादिना जनं पु
त्रादि जनयन् पित्रादिकं तु चौरादिकं तन्मृत्युहेतुं मारयन् न करोति स्वयं तत्र अनन्तोनादिश्च अव्ययः अक्षीणशक्तिः अयं भा
वः पित्रादयो अन्यतः उत्पन्नाः मिनो न स्वातन्त्र्येण कारणं किन्तु ईश्वर एव तन्नियन्ता सर्वकारणमिति १८ नचैवं कर्त्तोपि वैषम्य

स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः करोत्यकर्त्तैव निहन्त्यहन्ता चेष्टा विभूम्नः खलु दुर्वि
भाव्या १९ सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः जनं जनेन जनयन्मारयन्मृत्युनान्तकं २० न वै स्वपक्षो
स्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसंघाः २१
आयुषोऽपचयं जन्तोस्तथैवोपचयं विभुः उभाभ्यां रहितः स्वस्थो दुःस्थ
स्य विदधात्यसौ २२ ॥

प्रसक्तिः पक्षपाताभावादित्याह द्वाभ्यां न वा इति स्वपक्षस्समं यथा भवति तथा प्रजाः कर्मभूताः प्रविशतः तस्य साम्येपि
भूतेषु फलवैषम्यं तत्तत्कर्मणा तथा वादिति सदृष्टान्तमाह तं धावन्तमनु अनीशाः कर्माधीना भूतसंघा धावन्ति अनिले
धावंतमनुवजन्तीव तद्यथा रजांसि तन्मस्तकाकाशजलाद्यादि एवं नानिलस्य वैषम्यं एवमीश्वरस्यापीति भावः २१ अप
चयं तमनु वर्त्तमानाः आयुष उपचयं कालमृत्योरपि वदतो यद्वा अपचयं मशकादेः उपचयं देवादेः स्वस्थत्वात् उपचयापचयाभ्यां रहि
तः यमकालिमृत्युं अपचयं कालमृत्योरपि वदतो यद्वा अपचयं मशकादेः उपचयं देवादेः स्वस्थत्वात् उपचयापचयाभ्यां रहि
तोसौ विभुः दुःस्थस्य कर्माधीनस्य विदधाति

॥ २२ ॥

एवंभूतस्येश्वरस्यसर्ववादिसंमतः विवादस्तुनाममात्रइत्याहकेचिदितिद्वेसःकाममेवात्स्यायनः स्मृतिश्चकामोकार्षी
त्कामःकरोतिकामःकर्त्ताकामःकारयितेत्यादि २२ ननुकर्मादीनांजडत्वादिनास्वरूपतोपिभिन्नत्वात्कथमेकत्व-
त्वेनत्राह अव्यक्तस्यातएवाप्रमेयस्यतथापिसत्वेहेतुःनानाशक्तीनामुदयोयस्मात् चिकीर्षितमेवतावत्कोपिन-
वेदअथस्वस्यसंभवोयस्मात्तमीश्वरंकोवेदनकोपिअद्धेतिपठितत्वात् अतस्तत्प्रभावाद्धिशेषविवादइत्यर्थः तथा
चश्रुतिः कोअद्धावेदकइहप्रवोचत्कुतःआजाताकुतइयंविसृष्टिः अर्वाग्देवाअस्यविसर्जनेनाथकोवेदयतआबभूव

केचित्कर्मवदंत्येनंस्वभावमपरेनृप एकेकालंपरेदैवंपुंसःकाममुतापरे २२ अव्यक्तस्याप्रमेयस्यनानाश-
क्त्युदयस्यच नवैचिकीर्षितंतातकोवेदाथस्वसंभवं २३ नवैतेपुत्रकभ्रातुर्हंतारोधनदानुगाः विसर्गाद-
नयोस्तातपुंसोदैवंहिकारणं २४ सएवविश्वंसृजतिसएवावतिहंतिच अथापिह्यनहंकारान्नाज्यतेगुण-
कर्मभिः २५ एषभूतानिभूतात्माभूतेशोभूतभावनः स्वशक्त्यामाययायुक्तःसृजत्यत्तिचपातिच २६
तमेवमृत्युममृतंतातदैवंसर्वात्मनोपेहिजगत्परायणं यस्मैबलिंविश्वसृजोहरंतिगावोयथावैनसिदाम-
येत्रिताः २७ ॥

इत्यादि २३ ईश्वरवादस्यप्रकृतोपयोगमाह नवैतेभ्रातुर्हंतारःउक्तमेवहेतुमनुवदतिविसर्गादानयोर्मृत्युजन्म
नोःयद्वाविसर्गःसृष्टिःआदानंसंहारः दैवमीश्वरमेवकारणं २४ तथापिनिर्लेपतामाहसएवेति २५ अनहंकार
त्वेहेतुमाहएषइति २६ तस्मादीश्वरमेवकर्त्तारंयथाव्यहंकारादिमयानन्युक्त्वाशोकंइतिवेदनश्चाहतमेवेतिचतुर्भिःमृ
त्युमभक्तानांभक्तानांतुअमृतमुपेहिशरणंगच्छतमेवेत्यवधारणेहेतुःयस्मैनसिनासिकायांदामभिर्बद्धागावइवविश्व
सृजोपिदामभिर्यंत्रिताबद्धाःसंतोबलिंहरंतितत्कारितेकर्मकुर्वंतीत्यर्थः २७

तदाराधनंचनवयस्सापेक्षमेवेत्याह यः पंचवर्षः सन्नेवमाराध्य त्रिलोक्या मूर्ध्निपदंस्थानंलेभेलब्धवान् किंइदानीनमेवा
न्विच्छ अवलोकयेत्युत्तरेणान्वयः प्रत्यंचमक्षाणियस्मिन् क्रियाविशेषणंवा २८ हरिंध्यायन्नेनमित्याह अंगअयिमुक्तवि
ग्रहे आत्मनिमनसिव्यपाश्रितंआत्मदृक्प्रत्यग्दृष्टिःसन् अयंभेदोयस्मिन्तदिदंभेदंअसदेवविश्वंयस्मिन्प्रतीयतेतं २९

यःपंचवर्षोजननींत्वंविहायमातुःसपत्न्यावचसाभिन्नमर्मावनंगतःतपसाप्रत्यगक्षमाराध्यलेभेमूर्ध्निपदं
त्रिलोक्याः २८ तमेवमंगात्मनिमुक्तविग्रहेव्यपाश्रितंनिर्गुणमेकमक्षरं आत्मानमन्विच्छविमुक्तमात्म
दृक् यस्मिन्निदंभेदमसत्प्रतीयते २९ त्वंप्रत्यगात्मनितदाभगवत्यनंतआनंदमात्रउपपन्नसमस्तशक्तौ
भक्तिंविधायपरमांशनकैरविद्याग्रंथिंविभेत्स्यसिममाहमितिप्ररूढं ३० संयच्छरोषंभद्रंतेप्रतीपंश्रेयः
सांपरं श्रुतेनभूयसाराजन्नगदेनयथामयं ३१ येनोपसृष्टात्पुरुषाल्लोकउद्विजतेभृशं नबुधस्तद्वशं
गच्छेदिच्छन्नभयमात्मनः ३२ हेलनंगिरिशभ्रातुर्धनदस्यत्वयाकृतं यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानि
त्यमर्षितः ३३ तंप्रसादयवत्साशुसंनत्याप्रश्रयोक्तिभिः नयावन्महतांतेजःकुलंनोभिभविष्यति ३४ ए
वंस्वायंभुवःपौत्रमनुशास्यमनुर्ध्रुवं तेनाभिवंदितःसाकमृषिभिःस्वपुरंययौ ३५ इतिश्रीभागवतेचतुर्थ
स्कंधेएकादशोध्यायः ॥ मैत्रेयउवाच ध्रुवंनिवृत्तंप्रतिबुद्ध्यवैशसादपेतमन्युंभगवान्धनेश्वरः त
त्रागतःचारणयक्षकिन्नरैःसंस्तूयमानोभ्यवदत्कृतांजलिः १

तदन्वेषणफलमाह त्वंतदाअन्वेषणकालएव ३० उपदेशमारभमाणःसंयच्छेतिद्वाभ्यांप्रतीपंप्रतिकूलंश्रेयसांयेन
यथाआमयोरोगंनियच्छति ३१ येनरोषेणोपसृष्टात्व्याप्तात् ३२ अन्यच्चत्वयाकार्यमित्याह नमितिद्वाभ्यांयद्यतःजघ्नि
वान् ३३ ३४ इतिश्रीभागवतेभावार्थदीपिकायांएकादशोध्यायः ॥ द्वादशेधनदेनाभिनंदितःपुरमागतः यज्ञैरिष्ट्वाहरेः
स्थानमारुरोहेतिकथ्यतेदेशमाद्दुःखान्निवृत्तंतानाव १ ॥

त्त्रियदायादत्त्वियश्चश्चत्यजः त्यक्तवानसि २ नचवैरस्यकारणमस्तीत्याहनभवानितिश्चप्ययभावयोर्हत्पत्तिनाशयोः
३ कथंतर्हिश्चहंत्वंहंतेत्यादिबुद्धिस्तत्राहश्चहंत्वमितिश्चभातिप्रकाशतेजायतइत्यर्थः श्चतद्ध्यानात्देहात्मसंधानात्यया
धियाबंधःविपर्ययोऽवःखादिः तत्तस्मात्दृश्चगवाचभगवंतंभजस्वेत्युत्तरेणान्वयः सर्वभूतात्मद्दष्ट्याभोगैःपुण्यक्षयंकु

धनदउवाच भोभोत्त्रियदायादपरितुष्टोस्मितेनघ यत्त्वंपितामहादेशाद्वैरंदुस्त्यजमत्यजः २ नभवा
नवधीद्यक्षान्नयक्षाभ्रातरंतव कालएवहिभूतानांप्रभुरप्ययभावयोः ३ श्चहंत्वमित्यपार्थाधीरज्ञानात्पुरु
षस्यहि स्वाप्नीवाभात्यतद्ध्यानाद्ययाबंधविपर्ययो ४ तद्गच्छध्रुवभद्रंतेभगवंतमधोक्षजं सर्वभूता
त्मभावेनसर्वभूतात्मविग्रहं ५ भजस्वभजनीयांघ्रिमभवायभवछिदं युक्तंविरहितंशक्त्यागुणम
य्यात्ममायया ६ वृणीहिकामंनृपयन्मनोगतंमत्तस्त्वमौत्तानपदेविशंकितः वरार्हमंबुजना
भपादयोरनंतरंत्वांवयमंगशुश्रुम ७ मैत्रेयउवाच सराजराजेनवरायचोदितोध्रुवोमहाभागवतो
महामतिः हरौसववेचलितांस्मृतिंययातरत्ययत्नेनदुरत्ययंतमः ८ तस्यप्रीतेनमनसातांदत्वैडवि
डस्ततः पश्यतोंतर्दधेसोपिस्वपुरंप्रत्यपद्यत ९ श्चथायजतयज्ञेशंक्रतुभिर्भूरिदक्षिणैः द्रव्यक्रि
यादेवतानांकर्मकर्मफलप्रदं १० सर्वात्मन्यच्युतेसर्वेतीव्रौघांभक्तिमुद्वहन् ददर्शात्मनिभूतेषुतमे
वावस्थितंविभुं ११ तमेवंशीलसंपन्नंब्रह्मण्यंदीनवत्सलं गोप्तारंधर्मसेतूनांमेनिरेपितरंप्रजाः १२ ष
ड्त्रिंशद्वर्षसाहस्रंशशासक्षितिमंडलं भोगैःपुण्यक्षयंकुर्वन्नभोगैरशुभक्षयम् १३

कोविग्रहोयस्य ५।६ कामंयथेष्टमविशंकितःनिःशंकःश्चनंतरंनिकटे ७ सवरायचोदितःतदनुवादश्चंधेश्च
धरवाक्यंश्चतःसवेइगितत्वङ्स्याप्येतत्समं ८।९ द्रव्यक्रियादेवतानांकर्मसाध्यंफलंतद्रूपेकर्मफलप्रदंचो०
त्यर्थः १० सर्वेस्यात्मश्चसर्वेसर्वोपाधिवर्जिते ११ १२ श्चभोगैर्यज्ञाद्यनुष्ठानैः १३ ॥

बहवः सवा यागाः संवत्सरा वा यस्मिंस्तं कालं त्रिवर्गसाधकं नीत्वा अविचलानि संयतानींद्रियाणि यस्य १४ इदं देहादि
भगवन्मायया आत्मनि स्वस्मिन्नरचितं मन्यमानः अत्राविद्यादृष्टिं दृष्टांतयति अविद्यारचितेनेति १५ आत्मा देहः आत्मादि मा
यिकमतः पुनः कालेनोपसृष्टमनित्यमित्याकलय्य विविन्य विशालां बदरिकाश्रमं १६ तत्र तत्स्थानमष्टांगयोगमाह तस्या
मिति शिववार उदकं विगाह्य प्रविश्येति स्नानादिनियमा उक्ताः विशुद्धकरण इति शमदमादयो यमाः आसनादीनि स्फुटमे

एवं बहु सवं कालं महात्माविचलेंद्रियः त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनम् १४ मन्यमान इदं विश्वं
मायारचितमात्मनि अविद्यारचितस्वप्नगंधर्वनगरोपमं १५ आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोशमंतःपु
रं परिविहारभुवश्च रम्याः भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालाम् १६
तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वासनं जितमरुन्मनसाहृताक्षः स्थूले दधार भगवत्प्रतिरूप ए
तद्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ १७ भक्तिं हरौ भगवति प्रवहन्नजस्रं आनंदबाष्पकलया मुहुरर्द्यमा
मानः विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः १८ स ददर्श विमानाग्र्यं न
भसोवतरद्ध्रुवः विभ्राजयद्दश दिशो राकापतिमिवोदितम् १९

वोक्तानि जितो मरुत्प्राणो येन आहृतान्यक्षाणि येन भगवतः प्रतिनिधिभूते स्थूले विराड्रूपे एतन्मनो दधार ध्यायंश्चा
व्यवहितो ध्यातृध्येयभेदशून्यः समाधौ स्थितः सन् तत्स्थूलं व्यसृजत् १७ एवमजस्रं नित्यं हरौ भक्तिं प्रकर्षेण वहन्नु असौ
ध्रुवोहमित्यात्मानं न सस्मार यतो मुक्तलिंगः त्यक्तशरीराभिमानः तत्र हेतवः आनंदबाष्पस्य कलया बिंदुप्रवाहेणाभि
भूयमानः विक्लिद्यमानं द्रवद्धृदयं यस्य
सपुलकैश्चितांगः १८, १९

श्रीः
भा·च·
टी·
३०

अनुअनंतरंदेवप्रवरौददर्शेत्यनुषंगः गदामवष्टभ्यास्थितौकिरीटादिभिःसहितेचारुणीकुंडलेययोः २० उत्तमगायः
पुण्यश्लोकःतस्यकिंकरौतौविज्ञायमधुद्विषः पार्षत्प्रधानाविति हेतोःसाध्वसेनसंभ्रमेणविस्मृतःक्रमःकेवलंतस्य
नामानिगृणन्ननाम २१ सुभद्रंतइतिसप्तमीरस्येविष्णुपदारोहाभिप्रायं अतीतृपत्तर्पितवान् २३ अवांतस्यपार्षदौ २४
सुदुर्जयत्वेहेतुःसूरयःसमर्थायोपियदप्राप्यकेवलमधःस्थिताःपश्यंतियच्चचंद्रादयःप्रदक्षिणंयथाभवतिएवंपरिक्रामंति

तत्रानुदेवप्रवरौचतुर्भुजौश्यामौकिशोरावरुणांभुजेक्षणौ स्थिताववष्टभ्यगदांसुवाससौकिरीटहारांगद-
चारुकुंडलौ २० विज्ञायताउत्तमगायकिंकरावभ्युत्थितःसाध्वसविस्मृतक्रमः ननामनामानिगृणन्मधुद्वि
षःपार्षत्प्रधानाविति संहतांजलिः २१ तंकृष्णपादाभिनिविष्टचेतसंबद्धांजलिंप्रश्रयनम्रकंधरम् सुनंद-
नंदावुपसृत्यसस्मितंप्रत्यूचतुःपुष्करनाभसंमतौ २२ सुनंदनंदावूचतुः भोभोराजन्सुभद्रंतेवाचंनोवहि-
तःशृणु यःपंचवर्षस्तपसाभवान्देवमतीतृपत् २३ तस्याखिलजगद्धातुरावांदेवस्यशार्ङ्गिणः पार्षदावि
हसंप्राप्तौनेतुंत्वांभगवत्पदं २४ सुदुर्जयंविष्णुपदंजितंत्वयायत्सूरयोप्राप्यविचक्षतेपरम् आतिष्ठतच्चंद्र
दिवाकरादयोग्रहर्क्षताराःपरियंतिदक्षिणं २५ अनास्थितंतेपितृभिरन्यैरप्यंगकर्हिचित् आतिष्ठजगतां
वंद्यंतद्विष्णोःपरमंपदम् २६ एतद्विमानप्रवरमुत्तमश्लोकमौलिना उपस्थापितमायुष्मन्नधिरोढुंत्वमर्हसि
२७ मैत्रेयउवाच निशम्यवैकुंठनियोज्यमुख्ययोर्मधुच्युतंवाचमुरुक्रमप्रियः कृताभिषेकःकृतनित्यमंग
लोमुनीन्प्रणम्याशिषमभ्यवादयत् २८ परीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्यच इयेषतदधिष्ठातुंबिभ्रद्
रूपंहिरण्मयं २९ तदादुंदुभयोनेदुर्मृदंगपणवादयः गंधर्वमुख्याःप्रजगुःपेतुःकुसुमवृष्टयः ३०

तदातिष्ठअधितिष्ठ २५ २६ आयुष्मन्नित्यपिसशरीरतयातमभिप्रायमेव २७ मधुच्यवतेस्रवतीतिमधुच्युत्तंपाठां
तरेमधुच्युतेयस्यांतामुत्तमश्लोकस्यसाविष्णोरित्यर्थः कृतंनित्यकर्ममंगलंचालंकरणंयेनप्रणम्यचवयस्यावयामास २८ तदेव

श्री रूपंहिरण्मयंबिभ्रत्सत् इयेषपेष्टुन २९ ३०

दीनांहित्वा अगं दुर्गमं त्रिविष्टपं यास्यामीत्यन्वस्मरत् ३१ व्यवसितमभिप्रायं व्यवसीय ज्ञात्वा देवयानेन देवमार्गेण विमाने
नेति वा ३२ ३३ मुनीन्सप्तर्षीनपि ततः परस्ताद्विष्णोः पदं तदभ्यगात् ध्रुवा गतिर्यस्य सः ३४ यत्तु भ्राजमानमनु यस्य त्रयो
लोका विभ्राजन्ते येन त्वननुग्रहा निर्घृणाः ते यन्नाव्रजन् न व्रजन्त्येव तैः ३५ अच्युतप्रिया बान्धवा येषां ३६ अनिमिषं अनलसं ज्यो
तिषांचक्रं यस्मिन्नाहितं अर्पितं सद्भ्रमति मेढ्यामाहितो गंभीरवेगो गवां गण इव ३७ आतोद्यं वीणां विरुदन्वादयन् प्रचेत

सच स्वर्लोकमारोक्ष्यन्सुनीतिं जननीं ध्रुवः अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपं ३१ इति व्यवसितं तस्य
व्यवसाय सुरोत्तमौ दर्शयामासतुर्देवीं देवयानेन गच्छतीं ३२ तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः अ
वकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ३३ त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि परस्ताद्यद्ध्रुवगति
र्विष्णोः पदमथाभ्यगात् ३४ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनुविभ्राजन्त एते यन्नाव्रजञ्जन्तुषु ये
ऽननुग्रहा व्रजन्ति भद्राणि चरन्ति येऽनिशं ३५ शान्ताः समदृशः शुद्धाः सर्वभूतानुरंजनाः यान्त्यंजसाच्युतपदं अ
च्युतप्रियबान्धवाः ३६ इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ३७
गंभीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितं यस्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गणः ३८ महिमानं विलोक्या
स्य नारदो भगवानृषिः आतोद्यं वितुदञ्श्लोकान्सत्रेऽगायत्प्रचेतसां ३९ नारद उवाच नूनं सुनीतेः पतिदेवता
यास्तपः प्रभावस्य सुतस्य तां गतिं दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगन्तुं प्रभवन्ति किं नृपाः ४० यः पंचव
र्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजि

सांत्रात्व सत्रे भगवन्माहात्म्यप्रसंगेन ध्रुवमहिमानं प्रतिपादयन् परान्त्रीन्श्लोकानगायत् ३९ नूनमिति पतिर्देवदेवता यस्या
स्तस्याः सुतस्य सुतपः प्रभावः तस्य तां गतिं फलमधिगन्तुं वेदवादनशीलाः ऋषयोऽपि नैव प्रभवन्ति अभ्युपायान् भग
वद्धर्मान् दृष्ट्वापि पुनर्नृपाः ४० तपः प्रभावे गतिं विविशिनष्टि द्वाभ्यां गुरुदाराः पितृपत्नी सुरुचिस्तस्या वाक्शरैर्भिन्नेन हृ
दयेन दूयमानः सन् अजितमपि यो जिगाय ४१

श्री:
भा॰च॰
टी॰
३८

तस्याधिरूढं तेन प्राप्तं पदं यो भुवि क्षत्रबंधुः क्षत्रियो भवेत्सः तमन्वर्षपूगैरपि आरोढुमिच्छेदपि किंतत्संकल्पोप्यशक्यः मृ
दंतः आरोढुमित्यर्थः कथंभूतेपदे षड्वा पंचवा वर्षाणि यस्य सः अल्पैरेवाहोभिः वैकुंठं प्रसाद्य यत्तस्य पदमवापतत् ४२
उद्दाममुत्कृष्टं यशो यस्य ४३ धनादेर्निमित्तं ध्रौव्यं ध्रुवस्थानप्रापकं प्रशस्यं प्रशंसार्हं अघमर्षणं पापनाशनं ४४ अच्युत

यः क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः षट्पंचवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदं
४२ मैत्रेय उवाच एतत्तेभिहितं सर्वं यत्पृष्टोहमिह त्वया ध्रुवस्योद्दामयशसः चरितं संमतं सतां ४३ धन्यं यश
स्यमायुष्यं पुण्यं स्वस्त्ययनं महत् स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणं ४४ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युत।
प्रियचेष्टितं भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ४५ महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः
यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां ४६ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनां सायं च पुण्यश्लोकस्य
ध्रुवस्य चरितं महत् ४७ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेथवा दिनक्षये व्यतीपाते संक्रमेर्कदिनेपि
वा ४८ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः नेच्छंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति ४९ ज्ञानमज्ञातत
त्त्वाय यो दद्यात्सत्पथेमृतं कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ५० इदं मया तेभिहितं कुरूद्वह ध्रुव
स्य विख्यातविशुद्धकर्मणः हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णोः शरणं यो जगाम ५१ इतिश्रीभा
गवते चतुर्थस्कंधे द्वादशोध्यायः ॥
१२

प्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा यो वर्तते तेन तस्य भक्तिर्भवेत् ४५ तीर्थं महत्त्वप्राप्तिस्थानं गुणाश्चात्र भवंति ४६ समवाये सभायां ४७
४८ नेच्छन् निष्कामः तत्र श्रवणे आत्मनैवात्मानं प्रति संतुष्टो भवतीति हेतोः सिद्धिं प्राप्नोति ४९ किंच सत्पथे भगवन्मार्गे अ
मृतं तत्त्वज्ञानं यो दद्यात् ध्रुवस्य चरितं मयाभिहितं मातुर्गृहं
च हित्वा ५१ इतिश्रीभावार्थे चतुर्थे द्वादशः १२

एवंपंचभिरध्यायैर्ध्रुवचर्यानुवर्णिता॥अथैकादशभिः विंशे पृथुचरित्रसंख्यानेतत्रयोदशे वक्ष्ये पृथोर्जन्म ध्रुवान्वये
अंगोवेनपिता पुत्रक्रौर्याद्गत— नीयते प्ररूढो भावो भक्तिर्यस्य १ अन्ववाये वंशे २ नारदेन प्रचेतसां सत्रे वर्णिताः कथाः
अहं तन्महिमानमाह मन्य इति देवस्य दर्शनं यस्मात् हरेः परिचर्याप्रकारः क्रियायोगः पंचरात्रे येन प्रोक्तः ३ स्वधर्मशीलैः
प्रचेतोभिः ४ ५ ध्रुवस्य वंशे ते जाता इति वक्तुं ध्रुवस्य वंशमनुक्रामति ध्रुवस्येत्यादिना पितुः सार्वभौमश्रियं नैच्छत् अधिराजा

सूत उवाच निशाम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं
पुनस्तं विदुरः प्रचक्रमे १ विदुर उवाच केते प्रचेतसो नाम कस्यापत्यानि सुव्रत कस्यान्ववाये प्रख्याताः कु
त्र वा सत्रमासत २ मन्ये महाभागवतं नारदं देवदर्शनं येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ३ स्व
धर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः इज्यमानो भक्तिमता नारदेनेरितः किल ४ यास्ता देवर्षिणा तत्र वर्णि
ता भगवत्कथाः मह्यं शुश्रूषवे ब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि ५ मैत्रेय उवाच ध्रुवस्य चोत्कलः पुत्रः पितरि
प्रस्थिते वनं सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ६ स जन्मनोपशांतात्मा निःसंगः समदर्शनः दद
र्श लोके विततमात्मानं लोकमात्मनि ७ आत्मानं ब्रह्मनिर्वाणं प्रत्यस्तमितविग्रहं अवबोधरसैकात्म्यमानं
दमनुसंततं ८ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः स्वरूपमवरुंधानो नात्मनोन्यं तदैक्षत ९
जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः लक्षितः पथि बालानां प्रशांतार्चिरिवानलः १०

सनेव अनिच्छाया हेतुमाह स इति चतुर्भिः ७ आत्मानं स्वरूपभूतं ब्रह्मावरुंधानः आत्मत्वेन जानन् आत्मनोन्यं न दैक्षत स्वयं
तु सर्वस्मादन्यः सन् कथंभूतं ब्रह्मनिर्वाणं शांतं प्रत्यस्तमितः संशांतो विग्रहो भेदो यस्मिन् अवबोधरसेनैकात्म्यं यस्य
८ कथंभूतः अव्यवच्छिन्नो यो योगः स एवाग्निस्तेन दग्धः कर्ममलः आशयो यस्य ९ जडादीनामिवाकृतिर्यस्य न तथाभू
तो लक्षितः अतन्मतिः न तेषामिव मतिर्यस्य सर्वज्ञत्वात् प्रशांतान्यर्चींषि ज्वाला यस्यानलस्य तद्वत्स्थितः १०

यवीयांसमनुकलांकनिष्ठं ११ इष्टाप्रियाभार्या १२ १३ निशिथःनिशीथः १४ ससर्वतेजाः चक्षुःसंज्ञंमनुंसुतमवापम
नोर्महिषीनड्वलाविरजान्अजानपुरुप्रमुखान्द्वादशसुतानसूत १५ १६ अंगहेविदुरवागेववज्रंवागेववज्रंयेषां १९
मथनेहेतुः अराजकइतिबाधःपुरग्रामादीनांतेनरक्षितत्वात् २० यद्यस्याःप्रजायाहेतोर्विमनाःसन्ययौ २१ किंवांअ॰

मत्वातंजडउन्मत्तंकुलवृद्धाःसमंत्रिणः वत्सरंभूपतिंचक्रुर्यवीयांसंभ्रमेःसुतं ११ स्वर्वीथिर्वत्सरस्येष्टा
भार्यासूतषडात्मजान् पुष्पार्णंतिग्मकेतुंचइषमूर्जंवसुंजयं १२ पुष्पार्णस्यप्रभाभार्यादोषाचद्वेबभूवतुः
प्रातर्मध्यंदिनंसायंइतिह्यासन्प्रभासुताः १३ प्रदोषोनिशिथोव्युष्टइतिदोषासुतास्त्रयः व्युष्टःसुतंपुष्करि
ण्यांसर्वतेजसमादधे १४ सचक्षुःसुतमाकूत्यांपत्न्यांमनुमवापह मनोरसूतमहिषीविरजान्नड्वलासु
तान् १५ पुरुंकुत्संत्रितंद्युम्नंसत्यवंतमृतंव्रतं अग्निष्टोममतीरात्रंप्रद्युम्नंशिबिमुल्मुकं १६ उल्मुकोजनयत्
सुतान्पुष्करिण्यांषडुत्तमान् अंगंसुमनसंख्यातिंक्रतुमंगिरसंगयं १७ सुनीथांगस्ययापत्नीसुषुवेवे
नमुल्बणं यद्दौःशील्यात्सराजर्षिर्निर्विण्णोनिरगात्पुरात् १८ यमंगशेपुःकुपितावाग्वज्रामुनयःकिल
गतासोस्तस्यभूयस्तेममंथुर्दक्षिणंकरं १९ अराजकेतदालोकेदस्युभिःपीडिताःप्रजाः जातोनारायणांशे
नपृथुराद्यःक्षितीश्वरः २० विदुरउवाच तस्यशीलनिधेःसाधोर्ब्रह्मण्यस्यमहात्मनः राज्ञःकथमभूद्दुष्टाप्रजायद्वि
मनाययौ २१ किंवांहोवेनउद्दिश्यब्रह्मदंडमयूयुजन् दंडव्रतधरेराज्ञिमुनयोधर्मकोविदाः २२ नावध्येयः
प्रजापालःप्रजाभिरघवानपि यदसौलोकपालानांबिभर्त्योजःस्वतेजसा २३ एतदाख्याहिमेब्रह्मन्सुनीथा
त्मजचेष्टितं श्रद्दधानायभक्तायत्वंपरावरवित्तमः २४ ॥

हः अपराधंवेनमुद्दिश्यप्राप्तवत्य २२ यतोयमधर्मइत्याह नावध्येयःअघवानपिनभवति २३ परावरविदांमध्येअ
तिश्रेष्ठः २४

अभावीपुत्रः काम्यकर्मणा बलाद्यापादितो न स्वस्वायभवेदिति ध्येनयज्ञेनस्य पुत्रोत्पत्तिक्रममाह अंगइत्यादिना २५
अयातयामानि अगतवीर्याणि २७ यजेत गृहीतमोनोपिवाचेविसृजत् अपृच्छत् २९ आहूता आहूताश्च ग्रहान्सोमपात्रा
णि इह यज्ञेन गृह्णन्ति ३० इहजन्मनि तावन्मनाक् ईषदपि अघं नास्थितं कथंचिज्ज्ञातस्याप्यवस्यस्य ध्यपद्प्रायश्चित्तैः
क्षालनात् किंतु प्राक्तनमेकमघमस्ति यद्यस्मात् ईदृक् गुणाधिकोपि त्वं प्रजारहितः ३१ अतो यथादेवा हविर्गृह्णंण

मैत्रेय उवाच अंगोश्वमेधं राजर्षिराजहार महाक्रतुं नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः २५
तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः हवींषि हूयमानानि न ते गृह्णन्ति देवताः २६ राजन्हवींष्य
दुष्टानि श्रद्धयासादितानि ते छंदांस्ययातयामानि योजितानि धृतव्रतैः २७ न विदामेह देवानां हेलनं वय
मण्वपि यन्न गृह्णन्ति भागान्स्वान्ये देवाः कर्मसाक्षिणः २८ अंगो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः
तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया २९ नागच्छंत्याहुता देवा न गृह्णन्ति ग्रहानिह सदसस्पतयो ब्रूत
किमवद्यं मया कृतं ३० सदसस्पतय ऊचुः नरदेवेह भवतो नाघं तावन्मनाक् स्थितं अस्त्येकं प्राक्तनम
घं यदिहेदृक्त्वमप्रजः ३१ तथा साधय भद्रं ते आत्मानं सुप्रजं नृप इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक्
३२ तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ३३ तांस्तान्का
मान्हरिर्दद्याद्यान्यान्कामयते जनः आराधितो यथैवैष तथा पुंसां फलोदयः ३४ इति व्यवसिता विप्रा
स्तस्य राज्ञः प्रजातये पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ३५
तिवथात्मानं सुप्रजं साधयेत् कथं साधनीयस्तदाह इष्ट इति ३२ तथा सति स्वभागान् ग्रहीष्यंति यद्यतो हरिः साक्षाद्वृ
तः स्यात् अतस्तेन सह सर्वे देवा आगमिष्यतीत्यर्थः ३३ न केवलं तावत्कामान् हरिः किंतु यद्यानेन तद्गहनाः सत्वान
ति ३४ प्रजातये पुत्रोत्पत्तये शिपिविष्टाय पशुयज्ञरूपेण प्रविष्टाय तथाच श्रुतिः यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव
पशुषु प्रतितिष्ठतीति ३५ ॥

श्रीः
भा.द.
टी.
४०

तस्मादितिपोग्यतयाश्रे: ३६ पत्नीश्चमाददात् ३७ ऋमांसेस्यतेनेनेतितथानस्पाप्यपन्नु:सकाशाद्गर्भमादधे ब्रम
ज्ञासुती ३८ मातामहेक्षुन्तुंमृत्योर्द्विपुत्रीसुनीथा ३९ मृगयुलुब्धक:सत्वनेदृष्ट्वावेनोसावागच्छतीतिजनै:सर्वो॰
पयोत् तुक्रोश ४० आक्रीडेक्रीडास्थानेबालानत्यघ्नन्निवामारयत् ४१ विवत्सयदृष्ट्वा ४२ दुर्मनसस्तस्यजगृ॰
हनिर्दाववाक्यान्याहप्रायेणेतितिभि:अप्रजा: येनैरभ्यर्चित:नदेहेत:कृत्यैनैवपरन्ये:सेभूतेष्टर्भरेधारयितुमशक्य

तस्मात्पुरुषउत्तस्थौहेममाल्यमलांबर: हिरण्मयेनपात्रेणसिद्धमादायपायसम् ३६ सविप्रानुम
तोवाजन्मगृहीत्वांजलिनोदनम् अवघ्रायमुदायुक्त:प्रादात्पत्न्याउदारधी: ३७ सातत्पुंसवनंराज्ञीप्रा
श्यवैपत्युरादधे गर्भंकालउपावृत्तेकुमारंसुषुवेप्रजा ३८ सबालएवपुरुषोमातामहमनुव्रत: अध
र्मांशोद्भवंमृत्युंतेनाभवदधार्मिक: ३९ सशरासनमुद्यम्यमृगयुर्वनगोचर: हंत्यसाधुर्मृगान्दीना॰
न्वेनोसावित्यरौज्जन: ४० आक्रीडेक्रीडतोबालान्वयस्यानपिदारुण: प्रसह्यनिरनुक्रोशपशुमारम
मारयत् ४१ तंविचक्ष्यखलंपुत्रंशासनैर्विविधैर्नृप: यदानशासितुंकल्पोभृशमासीत्सुदुर्मना: ४२
प्रायेणाभ्यर्चितोदेवोयेप्रजागृहमेधिन: कदपत्यभृतंदुःखंयेनविंदंतिदुर्भरम् ४३ यत:पापीयसी
कीर्तिरधर्मश्चमहान्नृणाम् यतोविरोध:सर्वेषांयतआधिरनंतक: ४४ कस्तंप्रजापदेशंवैमोहबंधन॰
मात्मन: पंडितोबहुमन्येतयदर्था:क्लेशदागृहा: ४५ कदपत्यंवरंमन्येसदपत्याच्छुचांपदात् निर्विद्ये
तगृहान्मर्त्योयत्क्लेशनिवहागृहा: ४६ एवंसनिर्विण्णमनानृपोगृहान्निशीथउत्थायमहोदयोदयात्
अलब्धनिद्रोनुपलक्षितोनृभिर्हित्वागतोवेनसुवंप्रसूमाम् ४७ ॥

दु:खंयेनविंदति ४३ सर्वेषांसर्वै:सहआधिर्मानसीव्यथा ४४ तंप्रजापदेशंपुत्रनाममात्रमपिआत्मनोमोहेनबंधनं
यदर्थायथिमिता:क्लेशदागृहाभवंति ४५ इदानींनिर्वेदहेतुत्वेनकृत्स्नमेवापत्यमभिनंदनीयमिति कदपत्यमिति शुचो॰
पदात् शोकानांस्थानात्वरंवेदहेतु:निर्विद्येतेतिनकुर्वन्स्यत:कदपत्याभृगृहा:क्लेशनिवहाभवंति महतामुदयानां

प्रजापुरोहितादयस्तु विविक्तुः अन्वेषितवंतः तेन्नतत्रवसंतपितायस्य त्रिनिर्दिष्टोतेनाहूयथेति ४८ सास्त्वतः समर्नं
विप्लवेनाशं प्रदर्शनमित्यर्थः ४९ इतिश्रीभावार्थेदशमस्कंधेत्रयोदशोध्यायः १३ वतुर्दशेतनहृत्रयाऽदेशगतेहि
जैः अभिविक्तस्यवेनस्यदोषात्रैर्वधउच्यते क्षेमदर्शिनः क्षेमादर्शिनः क्षेमचिंतकाः पश्यसमानरूपतोपश्यतः १ प्र

विस्तायनिर्विद्यमतंपतिप्रजाः पुरोहितामात्यस्वहृंगणादयः विविक्तुरुच्योमतिशोककातरायथ्यानिरू
ढेपुरुषेऊयोगिनः ४८ अलक्षयंतः पदवींप्रजापतेर्हतौजसाः प्रत्युपसृत्यतेपुरीं अथौस्तमेतानभिवेष्य
मास्त्वचोत्यवेदयन्पौरवभर्त्तृविप्लवं ४९ इतिभागवतेचतुर्थस्कंधेत्रयोदशोध्यायः १३ मैत्रेयउवाच भृ
ग्वादयस्तेमुनयोलोकानांक्षेमदर्शिनः गोप्तर्यसतिवैनृणांपश्यंतः पशुसाम्यतां १ वीरमातरमाहूयसु
नीथांब्रह्मवादिनः प्रकृत्यासम्मतंवेनमभ्यषिंचन्पतिंभुवः २ श्रुत्वानृपासनगतंवेनमत्युग्रशासनं नि
लिल्युर्दस्यवः सद्यः सर्पत्रस्ताइवाखवः ३ सआरूढनृपस्थानउन्नद्धोष्टविभूतिभिः अवमेनेमहाभागान्स
्तब्धः संभावितः स्वतः ४ एवंमदांधउत्सिक्तोनिरंकुशइवद्विपः पर्यटन्रथमास्थायकंपयन्निवरोदसी ५ नय
ष्टव्यंनदातव्यंनहोतव्यंद्विजाःक्वचित् यवंन्यवारयद्धर्मंभेरीघोषेणसर्वतः ६ वेनस्यावेक्ष्यमुनयोदुर्वृत्तस्य
विचेष्टितं विमृश्यलोकव्यसनंकृपयोचुःस्मसत्रिणः ७ अहोउभयतःप्राप्तंलोकस्यव्यसनंमहत् दारु
ण्युभयतोदीप्तेइवतस्करपालयोः ८
मात्यादीनामसंमतमपिपादोनरपप्रकृत्यासंभावेनासंमतं २ बिलाल्लीनावभूवुः ३ आरूढंनृपस्थानं राज्ञासनंयेनअष्टवि
भूतिभिर्लोकपालैः स्वैर्यैः ४ ५ ६ सत्रिणः मिलितास्तेनः ७ मूलतः चाग्रतश्चदीप्तेप्रज्वलितेकष्ठेतन्मध्यवर्तिना
पिपीलिकादीनांयथाउभयतोव्यसनंएवंतस्करेभ्यः पालकाचरः खेप्राप्तमित्यर्थः ८ मैत्रिणः अंरा
सर्वंदायनमः

श्री: भा॰ च॰ टी॰ ४१

तदेवाह अराजकभयादिति अतदर्हणः राज्यानर्हः ७ अस्माकमप्यनिष्टं जातमित्याह अहेर्यथा पयःपोषक
स्याप्यनर्थं यथा बिभर्ति पुष्णाति तदेवाह वेन इति निरूपितः नियुक्तोस्माभिः ९ सांत्वयेम उपपत्तिभिः प्रार्थयिष्यामः तस्य
पातकं स्वस्य न स्यात्त्वकस्य स्पर्शो हेतुः तदाह तद्विद्वद्भिः ११ गूढो मन्युर्येषां सामभिः प्रियोक्तिभिः १३ निष्कामाना

अराजकभयादेवं कृतो राजातदर्हणः ततोप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनां ८ अहेरिव पयः
पोषः पोषकस्याप्यनर्थभृत् वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ९ निरूपितः प्रजापालः स जि
घांसति वै प्रजाः १० तथापि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् यद्विद्वद्भिरसद्वृत्तो वेनोस्माभिः
कृतो नृपः ११ सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत् लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा
१२ एवमध्यवसायैनं मुनयो गूढमन्यवः उपव्रज्याब्रुवन्वेनं सांत्वयित्वा च सामभिः १३ मुनय ऊचुः
नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भोः आयुःश्रीबलकीर्तीनां तव तात विवर्धनं १४ धर्म आचरितः
पुंसां वाङ्मनःकायबुद्धिभिः लोकान्विशोकान्वितरत्यथानंत्यमसंगिनां १५ स ते मा विनशेद्वीर प्रजानां
क्षेमलक्षणः यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति १६ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृप
रक्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते १७ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः इज्यते स्वेन धर्मेण जनै
र्वर्णाश्रमान्वितैः १८ तस्य राज्ञो महाभाग भगवान्भूतभावनः परितुष्यति विश्वात्मा तिष्ठतो निजशास
ने १९ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः २० तं सर्व
लोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि

मानं त्वं मा विशेत् मा विनश्यतु १६ असाधवो ये अमात्याः तेभ्यः यथायथा शास्त्रे १७ २० सर्वो लोको देवा अन्या
मकान्यस्तेषां संग्रहं गच्छति यस्तं तेन यागैर्विचित्रैर्द्रव्ययज्ञादिभिः भवाय समृद्धये स्वदेशान् न हामि तो जनान् अनुरोद्धुं

रामरामः ४१

युष्मद्विषये त्वद्देशे हरेः कलांशाः सुराः तेषां सुराणां हेलनमवज्ञां २२ बालिशा अज्ञाः वृत्तिदं अन्नादिप्रदं भो॰
हित्वा २३ भर्तृस्नेहो विदूरो येषां २५ २६ देहे भवंति नृपतेः अतो नृपतिरेवेश्वरः इतरे न देवा इति भावः २७
बलिं करादिकं अग्रभुक् आराध्यः २८ २९ तेनासत्कृताः भग्नायां याञ्चायां ३० ३१ परिचक्षीत विनिंदेत् अशुभं

यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं तद्धे॰
लनं नार्हसि वीर चेष्टितुम् २२ वेन उवाच बालिशा बत यूयं वा अधर्मे धर्ममानिनः ये वृत्तिदं पतिं हित्वा
जारं पतिमुपासते २३ अवजानंत्यमी मूढा नृपरूपिणमीश्वरम् नानुविंदंति ते भद्रमिह लोके परत्र च
२४ को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी भर्तृस्नेहविदूराणां यथा जारे कुयोषितां २५ विष्णुर्वि॰
रिंचो गिरिश इंद्रो वायुर्यमो रविः पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः २६ एते चान्ये च विबुधाः
प्रभवो वरशापयोः देहे भवंति नृपतेः सर्वदेवमयो नृपः २७ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः
बलिं च मह्यं हरत मत्तोन्यः कोग्रभुक् पुमान् २८ मैत्रेय उवाच इत्थं विपर्ययमतिः पापीयानुत्पथं गतः
अनुनीयमानस्तद्याञ्चां न चक्रे भ्रष्टमंगलः २९ इति तेसत्कृतास्तेन द्विजाः पंडितमानिना भग्नायां भव्य
याञ्चायां तस्मै विदुर चुक्रुधुः ३० हन्यतां हन्यतामेष पापः प्रकृतिदारुणः जीवन् जगदसावाशु कुरु
ते भस्मसाद्ध्रुवम् ३१ नायमर्हत्यसद्वृत्तो नरदेववरासनं योधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ३२ को वै
नं परिचक्षीत वेनमेकमृतेशुभम् प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ३३ इत्थं व्यवसिता हंतुमृषयो रूढ
मन्यवः निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया ३४ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं सुनीथा पालया

वेनं विनाकृतं कुमारः यदनुग्रहविषयः सन्नीदृशमैश्वर्यं प्राप्तः ३३ पूर्ववद्रूढमन्यवः दृढकोपाः हुंकृतैः हुंकारैः ३४ स्वाश्रम
पदं प्रति ऋषिभिर्गते गमने कृते विद्यायोगेन मंत्रसहितया युक्त्या ३५ ऋषिः सरस्वत्याः सलिले आप्लुतास्तु

८५

पं॰ ३९

श्री:
भा॰ व॰
टी॰
४२

तदा उत्थाना वीत्यथुवो भट्टं न भवेदित्यान्वयः ३७ एवं मृषं न स्पर्षयस्तदा धावतां चौराणां भूरिः पांसुः समुत्थितः
३८ ततदा लोकस्य यत्नं लेपनां जिगीषुस्ततो चोपरत्वमाज्ञाय ३९ तथा चौरप्रायमराजके हीनसत्वं जनपदमाज्ञाय शा
स्त्रा स्वय्यवारणादोषदर्शिनोपि जनालेपनो लोकानावारयन्नित्यन्वयः ४० शङ्कानां तत्रियाणां प्रवारणादोषवुद्धिनि
किं वक्तुं यं समदृगपि यं नोपि ब्राह्मणोपि यद्दीनानां समुपेक्षकं भवेन्नहि तस्यापि ब्रह्मतपः स्ववति ४१ ४२
शत्रुयेत्ता दोषपरिहारायनो गस्यत्यादि विनिश्चित्य महीपते ऊरुं तरसा ममन्थुरित्यन्वयः संस्थान्ते नाशोगं तु यदा।

[illegible]

वीत्योस्थितानामहोत्पतानां हलौकभयंकरम् अप्यभद्रमनाथायाद्दस्युभ्यो न भवेद्ध्रुवः ३७ एवं मृशं
तस्य रक्षयो धावतो सर्वतोदिशा पांसुः समुत्थितो भूरिः चौराणामभिलेपनाम् ३८ तदुपरत्वमाज्ञाय
लोकस्यवसलेपनाम् ३८ तदुपरत्वमाज्ञाय लोकस्यवसलेपनाम् भर्तर्युपरते तस्मिन्नन्योन्यं वजि
घांसतां ३९ चौरप्राये जनपदे हीनसत्वमराजके लोका न्नावारयन्शक्ता अपि तद्दोषदर्शिनः ४०
ब्राह्मणः समदृक्शान्तो दीनानां समुपेक्षकः स्ववते ब्रह्मतस्यापि भिन्नभांडात्पयोयथा ४१ नांग
स्य वंशो राजर्षेरेष संस्थातुमर्हति अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ४२ विनिश्चित्यैवमृ
षयो विपन्नस्य महीपतेः ममन्थुरूरुं तरसा तत्रासीद्बाहुको नरः ४३ काककृष्णोऽतिह्रस्वाङ्गो ह्रस्वबा
हुर्महाहनुः ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ४४ तं तु तेऽवनतं दीनं किं करोमीति वादि
नं निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ४५ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः येनाह

[illegible]

स्त्वपप्रवलेपनो लोकान्नावारयन् कथंभूता हंकारैरेव वेनेनिवारयितुं शक्ता अपितु किं तस्मिन्निवारणे तन्मारणादिदो
षदर्शिनः न चोदासनत्वे दोषः पडुः नष्टो नोपेत्तायां तयोः स्वानि प्रसंगात् नवाप्यं न निवारके राजा नम[illegible]वेत्रप्रगवेशाक्वेदस्या
नद्दवात् [illegible] नमंथुरिति योन्यबाहुको वामनः ४३ ४४ ४५ गिरिकाननगोचरा [illegible] येनाहरत् [illegible]
तततस्य वंश्यः तथाभूतः ४६ इति भावार्थदीपिकायां [illegible] १४ ततः पंचदशोविषमेषु नाहेन वाङ्मनः जातस्तत्र [illegible] मभिषेकाद्यानादिकं १ २

किमोद्गुर्विमुनयआह एषइतिचतुर्भिः लक्ष्म्याःसंभूतिःकला ३ प्रथयेः पुमान्प्रततमहान्राजोभविष्यति ४ सुदतीशो
भनदंतवतीगुणानांभूषणानांचभूषणाद्गुणाअवरुंधती भर्तृत्वेनभजंतीभविष्यति ५ अत्रहेतुः एषइतिलोकस्यरिर

ऋषयऊचुः एषविष्णोर्भगवतःकलाभुवनपालिनी इयंचलक्ष्म्याःसंभूतिःपुरुषस्यानपायिनी ३ अयंतु
प्रथमोराज्ञांपुमान्प्रथयितायशः पृथुर्नाममहाराजोभविष्यतिपृथुश्रवाः ४ इयंचदेवीसुदतीगुणभू
षणभूषणा अर्चिर्नामवरारोहापृथुमेवावरुंधती ५ एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया इयंचतत्
पराहिश्रीरनुजज्ञेनपायिनी ६ प्रशंसंतिस्मतंविप्रागंधर्वप्रवराजगुः मुमुचुःसुमनोधाराःसिद्धानृत्यं
तिस्वःस्त्रियः ७ शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि तत्रसर्वउपाजग्मुर्देवर्षिपितॄणांगणाः ८ ब्रह्मा
जगद्गुरुर्देवैःसहासृत्यसुरेश्वरैः वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः ९ पादयोररविंदंचतंवैमेने
हरेःकलाम् यस्याप्रतिहतंचक्रमंशःसपरमेष्ठिनः १० तस्याभिषेकआरब्धोब्राह्मणैर्ब्रह्मवादिभिः आभि
षेचनिकान्यस्माआजह्रुःसर्वतोजनाः ११ सरितःसमुद्रागिरयोनागागावःखगामृगाः द्यौःक्षितिःसर्वभू
तानिसमाजह्रुरुपायनम् १२ सोभिषिक्तोमहाराजःसुवासाःसाध्वलंकृतः पत्न्यार्चिषालंकृतयाविरेजेऽ
ग्निरिवापरः १३ तस्मैजहारधनदोहैमंवीरवरासनं वरुणःसलिलस्रावमातपत्रंशशिप्रभं १४ वायुश्च
वालव्यजनेधर्मःकीर्तिमयींस्रजम् इंद्रःकिरीटमुत्कृष्टंदंडंसंयमनंयमः १५

त्ववयाश्वःस्त्रियःअप्सरसोनृत्यंतिस्म ६ ७ ८ देवैःसहासृत्यागत्यवैन्यस्यपृथोःचिह्नंरेखात्मकंचक्रं ९ अप्रतिह
तंरेखात्मकंतत्रैवतिष्ठतीतिचक्रंयस्यचिह्नंसपरमेष्ठ्यंशः १० आभिषेचनिकानिअभिषेकसाधनानि ११ हैमंवीरवरासनं
सलिलस्यस्रावोयस्मात् १४ हेवालव्यजने १५
राम

ब्रह्ममयं वेदमयं वर्म कवचं तत्पत्नी श्रीः अव्याहतां संपदं १६ दशचन्द्राकाराणि बिंबानि कोशे यस्य तमसिं खड्गं शतचन्द्र
वर्म रूपाश्रयं प्रतिसुंदरं १७ अजस्य गोः शृंगाभ्यां निर्मितं वा योगमय्यौ पादस्पर्शमात्रेण गमीष्टदेशप्रापके
१८ नाट्यादिकौशले खेचराः आत्मजं स्वप्रभवं १९ तस्य स्तोतुमुपस्थिताः २० स्तावकान् स्तोतुमुद्यतान् अभिप्रे
त्य ज्ञात्वा २१ लोके अस्पष्टगुणस्य मनो मे स्तुतिः स्यात् अधुना किमाश्रयो मे स्तवो युज्यतां अतो वो गिरोऽधुनाऽपि वित

ब्रह्मा ब्रह्ममयं वर्म भारतीहारमुत्तमम् हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियं १६ दशचन्द्रम
सिं रुद्रः शतचन्द्रं तथांबिका सोमोऽमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथं १७ अग्निराजगवं चापं सू
र्यो रश्मिमयानिषून् भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् १८ नाट्यं सुगीतं वादित्रमन्तर्धानं च
खेचराः ऋषयश्चाशिषः सत्याः समुद्रः शंखमात्मजं १९ सिंधवः पर्वता नद्यो रथवीथीर्महात्मनः
सूतोऽथ मागधो वंदी तं स्तोतुमुपतस्थिरे २० स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् मेघनिर्ह्राद
या वाचा प्रहसन्निदमब्रवीत् २१ पृथुरुवाच भोः सूत हे मागध सौम्य वन्दिँल्लोकेऽधुनास्पष्टगुणस्य मे
स्यात् किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः २२ तस्मात्परोक्षेऽस्मदुपश्रुतान्य
लं करिष्यथ स्तोत्रमपीच्यवाचः सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः २३

था मा भूवन् यद्वा लोके अधुना अस्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् अतः एवं क्रियमाणः स्तवः मे मदन्यस्य योज्य
तां न तु मयि वितथा अभिपद्मोरित्यर्थः २१ तस्मात्परोक्षे कालांतरे स्पष्टेषु गुणेषु सत्सु अस्माकमुपश्रुतानि यशांसि भविता लो
के अलमत्यर्थं करिष्यथ हे अपीच्यवाचः मधुरगिरः सभ्याः परितोषयंतीतामेव स्तुमर्हति वक्तव्यमाह उत्तमश्लोकस्य गु
णानुवादे कार्ये सति जुगुप्सितमर्वाचीनं नरं न स्तावयेति

॥ ४३ ॥

ननु संभाविते देवगुणैरात्मानं जनः स्तावयतीति चेत्तत्राह महतो गुणानात्मनि संपादयितुं शक्तः शक्तोपि सन्नतोपि गुणा
न् संभावनामात्रेण कः स्तावयति यद्वा श्रावेवसतोपि कः स्तावयते स्तव एव मम ख्यातिसिद्धेः अन्यस्तु मिथ्यास्तुतिश्लाघी
मेद इत्याह तत इति यद्ययेषामस्माभ्यासादिकमकरिष्यत् तर्ह्यस्यते विद्यादयो गुणा अभविष्यन्निति क्रियानि अपत्याविप्रलब्धो ज
नानामवहासं न वेद २४ किं च प्रभवोपि विश्रुता अपि ह्रीमंतो न जुगुप्संति वेति दृष्टांते यथा निस्तनौ क्रियमाणां विग
र्हितं आत्मगुणवर्णनादि पौरुषं वेति दंति तथा उचितामपि स्तुतिं न सहंत इत्यर्थः २५ वरीमभिरिति दीर्घमार्षं भवितव्य अथान्यस्या

महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेसतोपि तेस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमति
र्न वेद २४ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितं २५ वयं त्व
विदिता लोके सूताद्यापि वरीमभिः कर्मभिः कथमात्मानं गापयिष्याम बालवत् २६ इति श्रीभागवते चतु
र्थस्कंधे पृथुचरित्रे पंचदशोध्यायः १५ मैत्रेय उवाच इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः तुष्टुवुस्तु
ष्टमनसः तद्वागमृतसेवया १ नालं वयं ते महिमानुवर्णने यो देववर्योवततार मायया वेनांगजातस्य च पौरुषा
णि ते वाचस्पतीनामपि बभ्रमुर्धियः २ अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः यथोप
देशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ३

वरीमभिर्दीर्घाः वरिष्ठैः कर्मभिरविदिता इत्यर्थः २६ इति श्रीभावार्थदीपिकायां चतुर्थस्कंधे पंचदशमेध्यायः १५ षोडशेस्म
वेनलोकेषौः सत्कृतं भार्यया युतं मुनिप्रयुक्ताः सूताद्याः स्तवेतिस्मेति वर्णिते गायकाः सूतादयः १ नालं वयं समर्थाः पौ
भवाय अवतारेष्वस्याधिक्यमाहः वेनस्यांगाज्जातस्य ते पौरुषाणि प्रतिश्रवितर्कनया ब्रह्मादीनामपि धियो बभ्रमुः ऊनः
पुनर्वपुं तं दर्शनेन समर्था भवेम २ अथापि यावद्दर्शयितुमशक्ता अपि कथामृते सादराः मुनिभिरुपदेशो योगबलेन दृढिश
कांशिनं तदनतिक्रम्य वितन्महि विस्तारयामः ३ ॥

श्रीः
भा-व-
टी
४४

तनौस्वदेहेलोकपालानांतनूरंशाःकालेकालेबिभर्तियथाभागंपालनपोषणानुरंजनादिकार्यानुसारेणयज्ञादि-
प्रवर्तनेनस्वर्गस्यहितंवृष्ट्यादिनाचभूलोकस्यहितंभवतितथा ५ सूर्यादितनुधारणमेवाह वस्विति वसुधनंकरा-
दानकालेआदत्तेदुर्भिक्षादिकालेविमुंचति अष्टौमासान्सूर्योयथावसुजलमादत्तेविमुंचतिचवर्षासुतद्वत् ६
मस्तकेपादेनाक्रमतामप्यार्तानांभूतानामतिक्रमंसहिष्यते अत्रहेतुरसौ क्षितेर्वृत्तिःसर्वसहनंसावृत्तिर्यस्यास्ति
सतथा ७ देवेअवर्षत्येषकृच्छ्रगताःप्राणायासांताःस्वयंवृष्टिंकृत्वारक्षिष्यति अत्रहेतुरसौनरदेववपुःश्रीहरिरि-

एषधर्मभृतांश्रेष्ठोलोकंधर्मेनुवर्तयन् गोप्ताचधर्मसेतूनांशास्तातत्परिपंथिनां ४ एषवैलोकपालानां
बिभर्त्येकस्तनौतनूः कालेकालेयथाभागंलोकयोरुभयोर्हितं ५ वसुकालउपादत्तेकालेचायंवि-
मुंचति समःसर्वेषुभूतेषुप्रतपन्सूर्यवद्विभुः ६ तितिक्षत्यक्रमंवैन्यउपर्याक्रमतामपि भूतानांकरु-
णःशश्वदार्तानांक्षितिवृत्तिमान् ७ देवेवर्षत्यसौदेवोनरदेववपुर्हरिः कृच्छ्रप्राणाःप्रजाह्येषरक्षि-
ष्यत्यंजसेंद्रवत् ८ आप्याययत्यसौलोकंवदनामृतमूर्तिना सानुरागावलोकेनविशदस्मितचारुणा
९ अव्यक्तवर्त्मैषनिगूढकार्योगंभीरमेधाउपगुप्तवित्तः अनंतमाहात्म्यगुणैकधामापृथुःप्रचेताइवसं-
वृतात्मा १०

ति ८ वदनमेवामृतमूर्तिर्मूर्तिस्तयेदंस्नेनसानुरागोवलोकोयस्मिन्विशदेस्मितेतेनचारुणा अयमर्थः विद्यमानसामीप्येव-
र्तमानस्येदेनिभूतानिदृशश्चप्राशोमायांभूतवृद्धेतिद्रष्टव्यः ९ नव्यक्तंवर्त्मप्रवेशनिर्गमयोर्मार्गोयस्यनिगूढंकेनिष्पन्नेः
पर्वंअविज्ञातेकार्यंयस्यनतुकार्यंगंभीरंकिमर्थमेवंतत्कृतमित्यन्यैरज्ञातानाभिप्रायेविधत्तइतितथाउपगुप्तंसंरक्षितंतेनति
संवृतात्मासंयतात्मामूर्तिःसमुद्रवद्रत्नेनवरुणस्याप्येतेगुणाद्रष्टव्याः १०

दुरासदः श्रोत्रैर्मनसापि प्राप्तुमशक्यः दुर्विषहः पोत्रेः सोढुमशक्यः विदूरवन्तो रूपेणाभिभवितुमशक्यः वेनपवार॰
णीत्वमाङ्गुस्थितः ११ चारणैर्गुप्तलिंगैः पश्यत्स्वपि स्वपितेर्निद्रादीन्‌ उदासीनमववर्तिष्यते यथा देहिनामध्यक्षोथि कृतमात्म
भूतो वायुः स्वात्मान इव १२ आत्मद्विषाः सततमिति सततग्रहणं स्वात्मजन्मामर्थो धर्मपथेयमस्पष्टत्वेस्थितः १३ चक्रेआ
ज्ञा सेनावारथस्यवाचक्रमानसाचलमभिव्याप्य प्रवर्तते किंपर्यन्तमित्यत आह अर्केरश्मिगोगणैर्वर्तयतितावत् १४ यस्य

दुरासदो दुर्विषह आसन्नोपि विदूरवत् नैवाभिभवितुं शक्यो वेनारण्युत्थितोनलः ११ अन्तर्बहिश्च भूतानां
पश्यन्कर्माणि चारणैः उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् १२ नादंड्यं दंडयत्येष सुतमात्मद्विषामपि
दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः १३ अस्याप्रतिहतं चक्रं पृथुरामानसाचलात् वर्तते भगवानर्को याव
त्तपति गोगणैः १४ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः अथामुमाहू राजानं मनोरंजनकैः प्रजाः १५
दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः शरण्यः सर्वभूतानां मानदो दीनवत्सलः १६ मातृभक्तिः परस्त्री॰
षु पत्न्यामर्ध इवात्मनः प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनां १७ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदिवर्ध॰
नः मुक्तसंगप्रसंगोयं दंडपाणिरसाधुषु १८ मघदेश्यामहीवीरोगासतीमोजसौषधीः समांकविष्यते॰
वेमांपत्रको ध्यामसमास्तः १९ अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः यस्मिन्नवि
द्यारचितं निरर्थकं पश्यन्ति नानात्वमपि प्रतीतम् २० ॥

स्मात्‌रंजयिष्यति अयं येनस्मात् मनोरंजनैर्हेतुभिरमुं राजानमाहुः मनोरंजनकैरिति चेष्टितविशेषणं वा १५ मानदि च भ॰
क्तिर्भजनं यस्यात्मनो देहस्यार्ध इव पत्न्यां प्रीतिमान् १७ १८ अयं विनितत्वाष्टेन निरूपमवे दर्शयति कोसावात्मानमाहय
स्मिन्प्रतीतमपि नानात्वमर्थं पश्यन्ति २१ ॥ ओं श्रीरामाय नमो
नमः ॥ नमः नमः

श्रीः
भा-च-
टी-
४५

आउदयाद्रेरस्तमयपर्यंतं गोप्ता गोपायिष्यति पर्यसि दक्षिणीकरिष्यतीत्यर्थः २१ अस्मै नृपा बलिं हरिष्यंति मंस्यंते ज्ञास्यंति
अस्य यश उद्धरंत्यः कीर्तयंत्यः २२ इंद्र इवाद्रीन्विभिंदन् २३ लांगूलमुद्यम्य यथा मृगेंद्रः चरति पृथुर्वि-

अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथा
र्कः २१ अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः मंस्यंत एषां स्त्रिय आदिराजं चक्रायुधं
तद्यश उद्धरंत्यः २२ अयं महीं गां दुदुहेधिराजः प्रजापतिर्वृत्तिकरः प्रजानां यो लीलयाद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः २३ एषोश्वमेधान् शतमाजहार सरस्वती प्रादुरभावि यत्र अहार्षीद्यस्य
हयं पुरंदरः शतक्रतुश्चरमे वर्तमाने २४ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ तदा
निलिल्युर्दिशि दिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः २५ एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवंतमेकं
आराध्य भक्त्यालभतामलं तज्ज्ञानं यतो ब्रह्म परं विदंति २६ तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः
श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः २७ दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलो
कशल्यः सुरासुरेंद्रैरुपगीयमानो महानुभावो भविता पतिर्भुवः २८ इति श्रीभा० चतुर्थे षोडशोध्यायः १६

मैत्रेय उवाच एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः छंदयामास
तान्कामैः प्रतिपूज्याभिनंद्य च १ ॥

स्फूर्जयन् २४ यत्र प्रादुरभावि प्रादुर्भूता कर्मकर्तरि ... तन्नाहार्षीत् २५ विश्रुता विक्रमा यस्य गाथाः प्रवेशाः २७
उपगीयमानो महाननुभावो यस्य २८ चतुर्थे षोडशोध्यायः १६ ततः सप्तदशे लोकत्रयं प्रशासन्पृथुः प्र-
सर्वबीजां महीं हंतुं यतो भीत्यात यत्स्तुतः छंदयामास तोषितवान् ॥

भृत्यांश्च ग्रामामात्यान् पुरोधसः पुरोहितांश्च श्रेणीः तैलिकान्तोद्वलिकादींश्चोरविशेषान् प्रकृतीः नियोगिनः २
पृथ्व्याः स्वस्य च अपि दोहनं पात्रं ३ मैत्रेय यत्ताडुमविज्ञानमपरोक्षज्ञानसहित ४ पूर्वदेहः पृथुर्वतारः तत्कथा स्वयंभवः पृथुर्वो यस्य
दोहनं पात्रं ३ मैत्रेय यत्ताङ्गमविज्ञानमपरोक्षज्ञानसहितं ४ पूर्वदेहः पृथुवतारः तत्कथा स्वयं स्वदृष्टवो यस्य
ब्रह्म द्यानरूपथवान् ७ जनन्ताया: तेपालस्त्वामेविनोसियुक्ताः तदासिरब्रेदितिनिलेसतिदत्तथाल्लामाः क्षीणदे
हायासोताः प्रजापमापतिं पृथुमब्रुवन् ८ जाठरेणाग्निनातप्ताः यः साधितः विप्रैर्मखेनेन संपादितः तं त्वां शरणं

ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः पौराञ्जनपदान्श्रेणीः प्रकृतीः समपूजयत् २ विदुर उ
वाच कस्माद्दधार गोरूपं धरित्री बहुरूपिणी किं दोहम पृथुस्तत्र को वत्सो दोहनं च किं ३ प्रकृत्या विष
मा देवी कृता तेन समा कथं तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ४ सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्म
विदुत्तमात् लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ५ यच्चान्यदपि कृष्णस्य भवान्भगवतः प्रभोः श्रवः
सुश्रवसः पुण्यं पूर्वदेहकथाश्रयं ६ भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च वक्तुमर्हसि योऽदुह्यद्वैन्य
रूपेण गामिमां ७ सूत उवाच चोदितो विदुरेणैवं वासुदेवकथां प्रति प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभा
षत ८ मैत्रेय उवाच यदाभिषिक्तः पृथुरङ्ग विप्रैरामन्त्रितो जनतायाश्च पालः प्रजा निरन्ने क्षितिपृष्ठ एत्य
क्षुत्क्षामदेहाः पतिमभ्यवोचन् ९ वयं राजञ्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः त्वामद्य याताः
शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः १० तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव याव
न्न नश्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ११ मैत्रेय उवाच पृथुः प्रजानां करुणं निशम्य
परिदेवितं दीर्घं दध्यौ कुरूद्वह निमित्तं सोऽन्वपद्यत १२

याताः १० तत्तस्मात् नोस्माकमन्नं रातवे दातुं ईहतु यत्नं करोतु उज्झितोर्जाः त्यक्तोत्साहाः सन्तः वार्ताया जीविका
याः पतिः ११ परिदेवितं विलापं निमित्तं हेतुं अन्वपद्य
तज्ज्ञातवान् १२ ॥ १२ ॥

श्री: पृथिव्या ओषधीबीजानि ग्रस्तानीति व्यवसितो निश्चितवान् सन् १३ मृगयुना द्रुता मृगीव १४ १५ रोदसी द्यावा
भा· व· पृथिव्यौ तयोरन्तरं मध्यं तद्दिशो अनुदृष्टवान् उद्यतमायुधं येन तं १६ १७ यो धर्मज्ञ इति मतः स भवान् कथं योषां मां कथमह-
टी· निष्यन् हनिष्यन्निति १९ २० अजरां दृढां नावं अम्भसि धारयिष्यसि २१ बर्हिषि यज्ञे या भवती देवरूपेण भागं वृङ्क्ते भजते
८९

इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा १३ प्रवेपमाना धर-
णी निशाम्योदायुधं च तं गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता १४ तामन्वधावत्तद्वैन्यः कुपितोत्यरु-
णेक्षणः शरं धनुषि संधाय यत्र यत्र पलायते १५ सा दिशो विदिशो देवी रोदसी चान्तरं तयोः धावन्ती
तत्र तत्रैनं ददर्शानूद्यतायुधं १६ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः त्रस्ता तदा निववृते हृदयेन
विदूयता १७ उवाच च महाभाग धर्मज्ञापन्नवत्सल त्राहि मामपि भूतानां पालनेवस्थितो भवान् १८
स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषां अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः १९ प्रहरंति न वै स्त्री-
षु कृतागःस्वपि जंतवः किमुत त्वद्विधा राजन्करुणा दीनवत्सलाः २० मां विपाट्याजरां नावं यत्र विश्वं प्र-
तिष्ठितं आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि २१ पृथुरुवाच वसुधे त्वां वधिष्यामि मच्छासनप-
राङ्मुखीं भागं बर्हिषि या वृंक्ते न तनोति च नो वसु २२ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः त-
स्यामेवं हि दुष्टायां दंडो नात्र न शस्यते २३ त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा न मुंचस्यात्म-
रुद्धानि मामवज्ञाय मंदधीः २४ अमूषां क्षुत्परीतानामार्तानां परिदेवितं शमयिष्यामि मद्बाणैर्भिन्ना-
यास्तव मेदसा २५

वसु धान्यादिकं २२ गोरूपेण तृणयवसं तृणं जग्धि अत्सि औधस्यं पयः तत्रैव दोग्धि दुग्धं न स्रवति अपराधे २३
आत्मनि देहे रुद्धानि २४ मद्बाणैः सर्वथा भिन्नायास्तवेति वेदन
आहुः अमूषां मेदसा मांसेन २५ ॥ स्म

यदुक्तं येषां कथं हनिष्यतीति तत्राह पुमानिति तस्य वधो वध एव २६ यद्वोक्तं कथमेभमितो धास्यनीति तत्राह त्वामि
ति तिलशः तिलप्रमाणानि खण्डानीत्येवंभूतामवस्थाप्य नीत्वा २७ मन्युमयीं मूर्तिं बिभ्रतः कृतान्ततुल्यं च मृत्युमनेन तु कृतां
तस्य मन्युमयीं मूर्तिमिति २८ पुरुषमनन्तं देवमकस्मादिति दारुणं वीक्ष्यमाणा हृष्टपुष्टार्थीनष्टावककरणोक्तिभिः मा
यया विन्यस्ता विविधा नानातनवो याद्दितनवो येन गुणात्मने गुणमयत्वेन प्रतीयमानाय स्वरूपं तत्तत्त्वनिर्धूता निरस्ता द्रव्यक्रि
याकारकेषु प्रथितभूताध्यात्माधिदैवेषु विभ्रमोऽहंकारः तन्निमित्ता ऊर्मयो रागद्वेषादयश्च यस्मिन्तस्मै २९ सर्वजीवा

पुमान्योषिदुत क्लीब आत्मसंभावनोऽधमः भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः २६ त्वां स्तब्धां दुर्मदां नी
त्वा मायया गां तिलशः शरैः आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः २७ एवं मन्युमयीं मूर्तिं कृतान्तमिव
बिभ्रतम् प्रणता प्राञ्जलिः प्राह मही संजातवेपथुः २८ धरोवाच नमः परस्मै पुरुषाय मायया विन्यस्तनाना
तनवे गुणात्मने नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये २९ येनाहमात्मायतनं विनि
र्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ३० य ए
तदादावसृजच्चराचरं स्वमाययात्माश्रययावितर्क्यया तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघां
सति ३१ नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाकृतात्मभिः न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक
एकः परतश्च ईश्वरः ३२

अयमेव सृष्टानां कथं हन्तुं प्रवृत्तस्तत्राह येन विधात्रा आत्मनां जीवानां आयतनमहं निर्मिता यतः मयि गुणसर्गस्य चत
विधभूतग्रामस्य संग्रहो धारणं स्वराट् स्वतन्त्रः ३० सृष्टिसंहारकर्तृत्वे कोऽहमेवेति चेत् तथापि प्रजापालने प्रवृत्तस्य महद्यो
त्रुचितमेवेत्याह य एतदिति आत्माश्रयया जीवविषयया ३१ अतो दुर्ज्ञेयमीश्वरचेष्टितमित्याह नूनमिति अकृता
त्मभिः विदितं न विते यः ईश्वरः स्वतन्त्रः प्रकरोत् ब्रह्माणं तेन ब्रह्मणा चराचरमकारयत् यश्च स्वतन एकः परमोऽन्यपराश्र

श्री: भा॰ष॰ टी॰ ५२

तस्मात्तदचिंत्यशक्तये केवलेन म इत्याह सर्गादिजन्मस्थितिभंगमस्य जगतः अनुरुणद्धि अनुवर्ततेकरोतीत्यर्थः द्रव्याणि महाभूतानि क्रिया इंद्रियाणि कारका देवाः चेतना बुद्धिः आत्मा अहंकारः तैः शक्तिरूपैः समुन्नद्धाः समुत्कटा निरुद्धाः शक्तयो यस्य २३ प्राणिनां धारणार्थं मां वमात्तत्ता दुहृत्येतानीप्रजावत्सलः प्रवृत्तस्य मद्दोहनयुक्तं इति सकरुणमाह द्वाभ्या हे ग्रजयः स्त्रष्टवान् सत्वं भगवान् आत्मनिर्मितं चराचरं जगत् स्थापयितुं आदिसूकरः सन् मां अंभसोजहार २४ सत्वंयथ

सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे २३ सवै भवानात्मविनिर्मितं जगद्भूतेंद्रियांतःकरणात्मकं विभो संस्थापयिष्यन्नज मां रसा तलादभ्युज्जहार्थांभसआदिसूकर २४ अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि २५ नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः २६ इतिश्रीभागवतेचतुर्थ स्कंधे सप्तदशोध्यायः १७ ॥

रामकृष्ण

राधरोधराधरो भूधरोहि अपामुपस्थे उपरि मयि नाविनाव आधारभूतायामवस्थिताः प्रजाः रक्षितुमिच्छुः वीरमूर्तिः पृथुरूपः सम भूत् स एव त्वं भूतः पयसि निमित्ते मां जिघांससीति विचित्रमित्यर्थः २५ तस्मादीश्वरचेष्टितं दुर्ज्ञेयं इति कैमुत्यन्यायेनोपसंह रति नूनमिति तत्सेश्वरस्य गुणसर्गमायया मोहितं चित्तमेव वर्त्म येषां मोहितानि चित्तवर्त्मानि येषामिति वा तैर्जनैः ई श्वराणां हरिभक्तानामेव तावदीहितं न ज्ञायते किं पुनस्तस्य परमेश्वरस्य अतः परमेश्वरवत् तेभ्योपि नमः एवं केवलं वीराणां जितेंद्रियाणां यशः कुर्वंति ये तेभ्यः यथा वीराणां वर्धनेन तथा वैष्टं तेभ्यः न त्वयेष्टमिति भावः २६ इति चतुर्थे सप्तदशः १७ ५२

अष्टादशे महीवाक्याद्वत्सपात्रादिभेदतः दुग्धादिभिस्तत्सादृग्यास्ववडुग्धमितीर्यते १ हे अभिभो प्रभो यद्वा भो देव अ
भिभूय मन्युं यच्छ यथा भवत्येवं मन्युं संनियच्छ श्रावितं विज्ञापितं न मद्वाक्ये नादरः कर्तव्य इत्याह बुधो हि सर्वतः सारमादत्ते २
यदि जीर्णा ओषधीः सृष्टा ये न गृह्णासीति तत्राप्युपायेन सर्वं सिध्यति नान्यथेत्याह अस्मिन्निति त्रिभिः पुंसां श्रेयसः प्रसि
द्धार्थं स्वप्रसिद्धये अस्मिँल्लोके कृष्यादयः अमुष्मिंश्च लोके अग्निहोत्रादयो योगा उपाया दृष्टाः प्रयुक्ताः अनुष्ठिताश्च ३ पूर्वद

मैत्रेय उवाच इत्थं दृष्टम् अभिष्टूय ... दिनाथं पुनराह ... निर्भीना संस्तभ्यात्मानमात्मना १ धरो
वाच संनियच्छाभिभो मन्युं निबोध श्रावितं च मे सर्वतः सारमादत्ते यथा मधुकरो बुधः २ अस्मिँल्लोकेऽथ
वामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये ३ तानातिष्ठति यः सम्यगुपा
यान्पूर्वदर्शितान् अवरः श्रद्धयोपेत उपेयान्विन्दतेऽञ्जसा ४ ताननादृत्य योऽविद्वानर्थानारभते स्वयं तस्य
व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः ५ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते भुज्यमाना मया दृष्टा
असद्भिरधृतव्रतैः ६ अपालितानादृता च भवद्भिर्लोकपालकैः चोरभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोष
धीः ७ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा तत्र दृष्टेन योगेन भवानादातुमर्हति ८ वत्सं कल्पय
मे वीर येनाहं वत्सला तव धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनम् ९

र्शितान् अवरोऽर्वाचीनः ४ अविद्वान् विद्वानपीति वा यः अभिचरन्ति न सिध्यन्ति ५ सत्येन कमुपायमाह पुरेति द्वाभ्यां
६ भवद्भिरिति राजसामान्याभिप्रायेण अपालितानां चोराद्यनिवारणात् अनादृतानां यज्ञादिप्रवर्तनाभावात् ७ यज्ञार्थे
अग्रसमोषधीः अन्यथा अधृतव्रतैर्भुज्यमानत्वात् प्रसोष्ये नेनन ... यत्नादयो मम सिध्येरन्निति भावः ७ क्षीणाः जीर्णाः ८
वत्सादोहनं दोहनपात्रं ... कल्पय यथोक्तं प्रस्रविष्यामि ९ ॥

श्री॰
भा॰ चू॰
टी॰
५८

भूतानामभीप्सितमन्नं ऊर्जस्वत् बलप्रदं अपगतेऽपि वर्षणीयधामेममपि सर्वतो वर्तते ११ १२
असंख्यादर्थान्तरमाह नवेति यथा भूतानां सद्यः एवं सर्वत्र वाक्येऽपि सारमाददते वत्सं तत्
मनुवर्णयति ततोऽन्ये च ऋष्याद्यः पंचदशाद्दुदुहुः इत्युक्तो भाविनो वशीकृतानाम् १३ देवीष
द्यौर्वाञ्चनः श्रवणौ वेदत्यादिरूपाणां दिन्द्रियाणां पात्रत्वे १४ सोमसूनवीर्यमनः शक्तिः ओजइंद्रियश

दोग्धारं च महाबाहो भूतानां भूतभावन अन्नमीप्सितमूर्जस्वद्भगवान्वाञ्छते यदि ९ समं च
कुरु मां राजन्देववृष्टं यथा पयः अपर्तावपि भद्रं ते उपावर्तेत मे विभो १० इति प्रियं हितं वा
क्यं पृथुराादाय भूपतिः वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ११ तथा परे च सर्वत्र
सारमाददते बुधाः ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् १२ ऋषयो दुदुहुर्दे
वीमिन्द्रियेष्वथ सत्तम वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि १३ कृत्वा वत्सं सुरग
णा इन्द्रं सोममदूदुहन् हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः १४ दैतेया दानवा वत्सं
प्रह्लादमसुरर्षभम् विधायादूदुहन्क्षीरमयःपात्रे सुरासवम् १५ गन्धर्वाप्सरसोऽधु
क्षन्पात्रे पद्ममये पयः वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम् १६ वत्सेन पितरोऽर्यम्णा
कव्यं क्षीरमधुक्षत आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः १७ प्रकल्प्य वत्सं कपिलं
सिद्धाः संकल्पनामयीम् सिद्धिं नभसि विद्यां च ये च विद्याधरादयः १८ अन्ये च मायिनो मा

क्तिः बलं देहशक्तिस्तान् देवपयः १५ सुरां वासवं चनालादिमद्यं १६ १७ कव्यं पितृणामन्नं आम
पात्रे पक्वं मृण्मये श्रद्धया तान् दुदुहुः १८ संकल्पनामयीं अणिमादिसिद्धिं ये विद्याधरादयः ते कपिलं विपि
लमेव वत्सं प्रकल्प्य नभसि व पात्रे खेचरत्वादिरूपां विद्यां दुदुहुः १९ अन्ये च रूपधारादयः अन्तर्धानेनाद्भुता

शृङ्गेणोरुः सपक्षत्वस्तोयेषां तत्तज्जं स्थिरं तद्देवासवम् २१ अहयो निर्यासाः दंदशूका वृश्चिकादयः सर्पाः
सफणाः तथैव दुदुहुः सेन तिजातानां च बिलपात्रे सुवे २२ यवसं तृणं गोर्वृषं वत्सं कृत्वा हे वृषभे शृङ्गिणे दोह्यात्र
रात्रकाः यः २३ क्रव्यं मांसं स्वकरं क्षीरादिधरं पलादि २४ अवतान्नं सप्त ह माह सर्वे स्वजातेतो भवाः तेन च
स्विव २६ उपसंहरति स्वन्नमभीष्टमन्नं तमेव क्षीरभेदं दुदुहुः दोह्यपात्रे २७ इमां दृष्ट्वा २८ यथा योग्येन

यद्वा रक्षांसि भूतानि पिशाचाः पिशिताशनाः भूतेशवत्सा दुदुहुः कपाले क्षतजासवम्
२१ तथाहयो दंदशूकाः सर्पा नागाश्च तक्षकम् विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः
२२ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः
२३ क्रव्यादाः प्राणिनां क्रव्यं दुदुहुः स्वभाविनाम् २६ एवं पृथ्व्यादयः पृथ्वीमन्नादाः स्वन्न
मात्मनः दोह्यवत्सादिभेदेन क्षीरभेदं कुरूद्वह २७ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः
दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः २८ चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट्
भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः २९ अथास्मिन् भगवान्वैन्यः प्रजानां वृत्तिदः पिता नि
वासान् कल्पयांचक्रे तत्र तत्र यथार्हतः ३० ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च घो
षान् व्रजान् सशिबिरान् आकरान् खेटखर्वटान् ३१ प्राक् पृथोरिह नैवैषा पुरग्रामादिकल्पना
यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः ३२ इति श्रीभागवते चतुर्थे अष्टादशोऽध्यायः १८ ॥

गिरिशृङ्गाणि चूर्णयन् राजराट् राजा २९ ३० ग्रामान् इत्यादि पुरः पुरोहिता इत्यादि मल्यः तत एवमस्तु पत्त
नानि दुर्गाणि विविधानि यथा हस्त्यश्वस्यादि घोष पार्वतानि वाह्यानि मेरिणं यादृशं तेतानि घोषान् आ
भीराणां निवासान् व्रजान् गवां निवासान् शिबिरं सेनानिवासस्थानं तत्सहितान् आकरान् स्वर्णादि स्था
नानि खेटाः कर्षक ग्रामा खर्वटान् पर्वतप्रान्त ग्रामाः साक्षात् इति श्रीभावार्थदीपिकायां चतुर्थे अष्टादशः १८

श्री॰ भा॰ ४ टी॰ ५९

ऊनविंशेश्वमेधांगहयापहरणात्पृथोः इंद्रंहंतुंप्रवृत्तस्यधात्रावारणमुच्यते हयमेधशतेननिमित्तेन
अदीक्षतदीक्षितोभूत् शताश्वमेधमेकल्पमकरोदित्यर्थः ब्रह्मावर्तेसरस्वतीदृषद्वत्योर्देवनद्योर्य
दंतरंतंदेवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते आत्मनःस्वस्यकर्मातिशयेनइतिप्रतिशायसाद्यमभिप्रेत्यज्ञात्वा
नममृषेतिनेष्टपृथोर्यज्ञमहोत्सवंनममृषेनसेहे २ अतिशयमेवदर्शयति यत्रेतिसप्तभिः साक्षादन्वभूय
त प्रत्यक्षेणादृश्यत ३ ४ सिद्धादयः तेहरिमन्वीयुरित्युत्तरेणान्वयः ५ ६ धर्मदुघाभूमिर्दोग्ध्री

मैत्रेयउवाच अथादीक्षतराजातुहयमेधशतेनसः ब्रह्मावर्तेमनोःक्षेत्रेयत्रप्राचीसरस्वती
१ तदभिप्रेत्यभगवान्कर्मातिशयमात्मनः शतक्रतुर्नममृषेपृथोर्यज्ञमहोत्सवम् २ यत्रयज्ञ
पतिःसाक्षाद्भगवान्हरिरीश्वरः अन्वभूयतसर्वात्मासर्वलोकगुरुःप्रभुः ३ अन्वितोब्रह्मशर्वा
भ्यांलोकपालैःसहानुगैः उपगीयमानोगंधर्वैर्मुनिभिश्चाप्सरोगणैः ४ सिद्धाविद्याधरा
दैत्यादानवागुह्यकादयः सुनंदनंदप्रमुखाःपार्षदप्रवराहरेः ५ कपिलोनारदोदत्तो
योगेशाःसनकादयः तमन्वीयुर्भागवतायेचतत्सेवनोत्सुकाः ६ यत्रधर्मदुघाभूमिःसर्वका
मदुघासती दोग्धिस्माभीप्सितानर्थान्यजमानस्यभारत ७ ऊहुःसर्वरसान्नद्यःक्षीरदध्य
न्नगोरसान् तरवोभूरिवर्ष्माणःप्रासूयंतमधुच्युतः ८ सिंधवोरत्ननिकरान्गिरयोन्नंचतु
र्विधम् उपायनमुपाजह्रुःसर्वलोकाःसपालकाः ९ इतिचाधोक्षजेशस्यपृथोस्तुपरमोद
यम् असूयन्भगवानिंद्रः
प्रतिघातमचीकरत् १०

धेनुःसती: ७ ऊहुःवहंतिस्मसर्वरसान् इक्षुद्राक्षादिरसान् क्षीरंदुग्धंदधिचान्नंचपाक्वादिगोरसो
घृततक्रेच भूरीणि विस्तृतानिवर्ष्माणिशरीराणियेषांतेफलादिप्रासूयंत मधुच्युतः मधुस्राविणःसं
तः ८ चतुर्विधंभक्ष्यभोज्यंचोष्यंलेह्यंच ९ अधोक्षजईशोयस्यपरमउदयोभिवृद्धिर्यस्मिन् तंक्रतुम
सूयन् असहमानः प्रतिघातंविघ्नंचकारेत्यन्वयः १० ॥

राम ५९

यजमानेवैन्येयज्ञःपतिंविसृज्ययजमानेसतिस्वयंहुमानइंद्रस्तिरोहितःसन्नपहृतवान् ११ त्वरमाणंधावंतंमामुक्तः प्र
तिमुक्तस्वपिनद्ध स्वापिनद्धवत्सन्नद्धेवर्मितः सन्नयन्पमदसिंहनःपाखंडवेषंकवचमिवगृहीतवंतमित्यर्थः अथ
र्मेधर्मविभ्रमःधर्मोयमितिभ्रांतिकरोयः १२ १३ नमुंचतिस्म १४ हंतवेहिहंतुंयज्ञहनंयज्ञसंहृतवंतं १५ १६ तत

त्वरमेनाश्वमेधेनयजमानेयज्ञःपतिं वैन्येयज्ञपशुंस्पर्द्धन्नपोवाहतिरोहितः ११ तमत्रिर्भगवानैक्षत्
त्वरमाणंविहायसा आमुक्तमिवपाखंडंयोधर्मेधर्मविभ्रमः १२ अत्रिणाचोदितोहंतुंपृथुपुत्रोमहा
रथः अन्वधावतसंक्रुद्धःतिष्ठतिष्ठेतिचाब्रवीत् १३ तंतादृशाकृतिंवीक्ष्यमेनेधर्मंशरीरिणं जटिलंभ
स्मनाछन्नंतस्मैबाणंनमुंचति १४ वधान्निवृत्तंतंभूयोहंतवेत्रिरचोदयत् जहियज्ञहनंतातमहेंद्रंविबु
धाधमं १५ एवंवैन्यसुतःप्रोक्तःत्वरमाणंविहायसा अन्वद्रवदभिक्रुद्धोरावणंगृध्रराडिव १६ सोश्वं
रूपंचतद्धित्वातस्माअंतर्हितःस्वराट् वीरःस्वपशुमादायपितुर्यज्ञमुपेयिवान् १७ तत्तस्यचाद्भुतंक
र्मविचक्ष्यपरमर्षयः नामधेयंददुस्तस्मैविजिताश्वइतिप्रभो १८ उपसृज्यतमस्तीव्रंजहाराश्वंपुन
र्हरिः चषालयूपतश्छन्नोहिरण्यरशनंविभुः १९ अत्रिःसंदर्शयामासत्वरमाणंविहायसो कपालख
ट्वांगधरंवीरोनैनमबाधत २० अत्रिणाचोदितस्तस्मैसंदधेविशिखंरुषा सोश्वंरूपंचतद्धित्वातस्था
वंतर्हितःस्वराट् २१ वीरश्चाश्वमुपादायपितृयज्ञमथाव्रजत् तदवद्यंहरेरूपंजगृहुर्ज्ञानदुर्लभः
२२ यानिरूपाणिजगृहेइंद्रोहयजिहीर्षया तानिपापस्यखंडानिलिंगंखंडमिहोच्यते २३

तस्मैहित्वातद्दर्शनस्सृज्याविचक्ष्यदृष्ट्वा १८ उपसृज्यसृष्ट्वातेनछन्नःसन्चषालोयूपाग्रेनिहितःकाष्ठकेटकः तद्यु
क्तात् यूपात्हिरण्यनिर्मितारशनायस्यतंरशनायाद्दृढमेनच्छेदाद्यशक्यारशनामहितमेवोद्धृत्ययूपाश्रीतवानि
त्यर्थः विभुःसमर्थः १९ २१ अवद्यंरूपंमदप्रभाजयदः २२ खंडवामविरुक्ता यानियाभीनिवंद्यवचनेनयाप्यानि

श्रीः
भा॰ च॰
टी॰
५०

तत्प्रभृति पाखंडमार्गाः प्रवृत्ता इत्याह एवमिति तेन गृहीतेषु विसृष्टेषु नग्ना जैनाः रक्तपटा बौद्धाः प्रवि
द्धेन कापालिकादयः तेषु उपधर्मेषु अधर्मेषु धर्म एवायमिति मतिः सज्जत इति द्वयोरन्वयः पेशलेषु आपा
तरम्येषु वाग्मिषु हेतूक्तिचतुरेषु २६ शक्रवधे अभिसंधितं कृताभिप्रायं प्रचोदितात्पशोर्वध्यादन्यस्य वधस्त
त्र न युज्यते २७ तर्ह्यर्थं वयं करिष्याम इत्याहुः वयमिह यज्ञनाशनं त्वत्कीर्त्या प्रहतत्विषमिंद्रं आह्वयामहे कैः अया
तयामैः अगतवीर्यैः आह्वानमंत्रैः अनंतरं च तेन त्वाहितं त्वच्छत्रुं जुहवाम होष्यामः २८ अस्पष्टयोः स्रुक्हस्ते येषां तान्

एवमिंद्रे हरत्यश्वं वैन्ययज्ञजिघांसया तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणाम् २४ धर्म इत्युपध
र्मेषु नग्नरक्तपटादिषु प्रायेण सज्जते भ्रांत्या पेशलेषु च वाग्मिषु २५ तदभिज्ञाय भगवान्पृथुः पृ
थुपराक्रमः इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः २६ तमृत्विजः शक्रवधाभिसंधितं वि
चक्ष्य दुष्प्रेक्ष्यमसह्यरंहसं निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् २७ वयं
मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् अयातयामोपहवैरनंतरं प्रसह्य राजन्
जुहवाम तेऽहितम् २८ इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा स्रुग्घस्तान् जुह्वतोऽभ्येत्य स्वयंभूः प्र
त्यषेधत २९ न वध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ३०
तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ३१

२९ यमिंद्रं यज्ञेन जिघांसथ यज्ञेन इष्टाः सर्वे सुरा यस्य तनवः स इंद्रो भवतां वध्यो न भवति यस्मात् यज्ञो नामाय
मिंद्रो भगवतस्तनुः अवतारः ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायंभुवांतर
मित्युक्तत्वात् ३० अतो बलीयसा तेन सख्यमेव कर्तव्यं अथ भूयः पाखंडसृष्ट्यनुष्ठितं महदन्यायं वै पश्यत किमित्य
पेक्षयामाह धर्मस्य व्यतिकरं विपर्ययं पाखंडम् ३१ ॥

नहिकिंमवज्ञकर्माधिमिताननयाज्ञइष्टपृथुकीर्तिरिति एकेनोनंशतंयस्मिन् तादृशः क्रतुर्यस्यसः हयोर्भूयात् पृथुरि
तिपाठेएकोनशतक्रतवोयस्मात्तादृशोपिमहेंद्रात्पृथुकीर्तिर्भूयादित्यर्थः तदेवस्तुत्विजः ऋतुक्ताः येवा
हृ अलमिति आत्मनेवात्मनेमहेंद्रायरोषंकर्तुंनार्हसितत्रहेतुः उभावपीति ३३ तथापिक्रतुसमाप्ति ये
नेवत्याह अस्मिन्यज्ञेविघ्नचिंतांमास्मकृथाः यद्यस्माद्दैवहतंकार्यंकर्तुंध्यायतोमनः अतिरुष्टंसतिअतिरुष्टं
सदैवतमोमोहं विशतितनस्तंर्तिलभते ३४ अतएवक्रतुर्विरमत्वितिकिंमनिवर्तनेन तत्राह यतोदेवे
षुदुरवग्रहं भवतीतियतक्रतो ३५ इंद्रकृतानर्थनिर्माहकृतमनर्थ्यपश्येत्याह एभिरिंद्रेणोपसृष्टैरधिष्ठितैः हारिभि

पृथुकीर्तिर्यस्योर्भूयात्तवैकोनशतक्रतुः अलंतेक्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ३२ नैवा
त्मनेमहेन्द्रायरोषमाहर्तुमर्हसि उभावपिहिभद्रंतेउत्तमश्लोकविग्रहौ ३३ मास्मिन्महाराजकृ
थाः स्मचिंतांनिशामयास्मद्वचआदृतात्मा यद्ध्यायतोदैवहतंनुकर्तुंमनोतिरुष्टंविशतितमोंधं
३४ क्रतुर्विरमतामेष देवेषुदुरवग्रहः धर्मव्यतिकरोयत्रपाखंडैरिंद्रनिर्मितैः ३५ एभिरिंद्रोपसं
सृष्टैः पाखंडैर्हारिभिर्जनं ह्रियमाणंविचक्ष्वैनंयस्तेयज्ञध्रुगश्वमुट् ३६ भवान्परित्रातुमिहावती
र्णोधर्मंजनानांसमयानुरूपं वेनापचारादवलुप्तमद्यतद्देहतोविष्णुकलासिवैन्य ३७ सत्वंविमृश्या
स्यभवंप्रजापते संकल्पनंविश्वसृजांपिपीपृहि ऐंद्रींचमायामुपधर्ममातरंप्रचंडपाखंडपथंप्रभोजहि
३८ मैत्रेयउवाच इत्थंसलोकगुरुणासमादिष्टोविशांपतिः तथाचकृत्वावात्सल्यंमघोनापिचसंदधे

चिन्ताकर्षकैः पाखंडैरिंद्रः नेत्रसुखानीनितयायज्ञायद्रुह्यतितेनसृष्टैः ३६ ततोममकिमितिचेत् तत्रा
हभवानितिद्वाभ्यांसात्वयोगादिनासिद्धोनानुरूपंधर्मंयेनस्यान्यायात् लुप्तंपरित्रातुंतद्देहात्तिलोः कले
वत्त्वमवतीर्णोसि ३७ अस्यविश्वस्योद्भवविचार्यउत्पादितोसितेषांविश्वसृजांसंकल्पंपिपीपृहिप्रार्थः श
योगः दूरयेतधर्मः प्रचंडोयःपाखंडमार्गः सचेंद्रमायोपधर्मजननीतोजहि ३८ तथाकृत्वायसाम्यंहि ॥ ॥
त्वावात्सल्यंचक्रेत्तासहसंधानंचकृतवान् ३९ ॥

कृतमवभृथस्नानं येवैथिस्तानेवेनसततसे ४१ तद्यानो वाक्यं तवयेति ४२ इति श्रीभावार्थे चतुर्थस्कंधे एकोनविंश
१९ विंशे तु विलसन्नासाद्वात्सपृथोर्यज्ञानुशासने वरदानप्रसंगेन प्रीतिज्ञान्यो नामीर्यते १ मघवतासाकं
ईडेनासहवर्त्तमानः १ आत्मानेत्वोदमो कारयतोभ्यथा २ यर्हि यस्मात्किलेवरमात्मानं भवति अतस्तदि
भिमानेन भूतानि नाभिद्रुह्यंति ३ ४ अविद्यास्वरूपात्ज्ञानेन ततः कामः ततः कर्म तेनारब्ध इति विद्वान् अतएव
प्रतिबुद्धे आत्मसत्वसिद्धेवानुषज्यते ५ तथापि पुत्रादि ममत्वेन भूतद्रोहेणा च संयोभवन्नाह असक्त इति

कृतावभृथस्नानाय पृथवे भूरिकर्मणे वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ४१ विप्राः
सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः आशिषो युयुजुः क्षत्तरादिराजाय सत्कृता ४२ त्वया
हूता महाबाहो सर्व एव समागताः पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः इति श्रीभाग
वते चतुर्थस्कंधे एकोनविंशः १९ ऋषिरुवाच भगवानपि वैकुंठः साकं मघवता विभुः
यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत १ श्रीभगवानुवाच एष तेऽकार्षीद्भंगं हयमेधशतस्य ह
क्षमापयत आत्मानममुष्य क्षंतुमर्हसि २ सुधियः साधवो लोके नरदेव नरोत्तमाः नाभिद्रु
ह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ३ पुरुषा यदि मुह्यंति त्वादृशा देवमायया श्रम एव परं जातो ७
दीर्घया वृद्धसेवया ४ अतः कायमिमं विद्वानविद्याकामकर्मभिः आरब्ध इति नैवास्मिन्प्रति
बुद्धोऽनुषज्जते ५ असंसक्तः शरीरेस्मिन्नमुनोत्पादिते गृहे अपत्ये द्रविणे वापि कः कुर्यान्ममता
न्तु बुधः ६ एकः शुद्धः स्वयंज्योतिर्निर्गुणोसौ गुणाश्रयः सर्वगोनावृतः साक्षी निरात्मात्मात्म

८ प्रतिबोधक्रमे विद्वानवत् देहेऽनुषंगाभावमाह एक इति द्वाभ्यां असावात्मा आत्मानं —रोभिन्नः तत्र तव
पावेलक्षणो भेदे साधयति एक इति नवभिः पदैः देहादिबालयुवादिभेदादनेकः मतितस्तज्ज सगुणा
स्वस्वकारणाच्छुन्नेगुणाश्रितस्वपरिच्छिन्नस्वशरीरादिभिरावृतस्वदृश्यस्वसात्मा च आत्मानं नैव अतोभिन्नः ७

यात्मस्थं स्वस्मिन् स्थितिं शक्नोति स्थोपि देहस्थोपि तद्विकारैर्न लिप्यते यतः सामर्थ्ये स्वस्थाणि स्थितः ८
इयमवस्था कस्मोलभ्यत इत्यपेक्षायामाह यः स्वधर्मेणानिचयनर्भिः स यदि हि विषदाशयः प्रसन्नचेताः तदाप
रिमितगुणः सन् सम्यग्दर्शनो भूत्वा शान्तिमश्नुते शान्तिमाह ममसस्यगौदासीन्येनावस्थामेव ब्रह्यतदेवके
वल्यमश्नुते ९ सम्यग्दर्शनमेवाह उदासीनमेवात्मावेद्यज्ञानक्रियात्मनोदेहज्ञानकर्मेंद्रियमनसामध्यात्म
भिवस्थितमात्मानं योवेद १० संसारिणः कथं तुल्यस्य नमनयाह भिन्नस्य लिंगस्य देहस्य गुणप्रवाहः संसारः भिन्न
नेहेव इयात्मकस्य तत्र चेतनादिदाप्राभासः प्रतो दुःखासु शमासु हर्षशोकादिभिर्नविक्रियते ११ त्वयस्तु

यएवं संतमात्मानमात्मस्थं वेद पूरुषः नाप्यते प्रकृतिस्थोपि तद्गुणैः सामर्थ्ये स्थितः ८ यः स्वधर्मे
णामानितेनिराशः श्रद्धयान्वितः भजते शनकैस्तस्य मनोराजन्प्रसीदति स परिमितगुणः सम्य
ग्दर्शनो विशदाशयः शान्तिमेसमवस्थाने ब्रह्मकैवल्यमश्नुते ९ उदासीनमिवाध्यक्षं द्रव्यज्ञा
नक्रियात्मनो कूटस्थमिममात्मानं यो वेदाप्नोति शोभनं १० भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रि
याकारकचेतनात्मनः दृष्टासु संपत्सु विपत्सु पूरुषो नविक्रियेत ममयि बद्धसौहृदा ११ समः समा
नो नीचमममध्यमाधमः सविवेकः खेचजितेंद्रियाशयः मयोपक्लृप्ताखिललोकसंयुतो विधत्स्वचा
खिललोकरक्षणं १२ श्रेयः प्रजापालनमेवराज्ञोयत्सांपराये सुकृतात्सषष्ठमंशं हर्तान्यथाहृ
तपुण्यः प्रजानामरक्षिताकरहारोवमत्ति १३ ॥

रिः अतः सविवेकः सममसन् समानोउत्तममध्यमाधमायस्य जितानींद्रियाणि आशयश्चयेन सत्वमखिललोकरक्ष
णं विधत्स्व कथमेकेन मयावाकर्तुं शक्यं तत्राह मयेश्वरेणोपक्लृप्ताः सेवादिनायैरखिलालोकाश्रमास्तादृशः
मैर्युक्त १२ ननु देहरक्षणं पणं हेतोः रक्षणे सायेदमम तेन स्वयं सुखाउणकरिष्यामीति चेत्तत्राह श्रेय इति यस्मा
त्सांपराये परलोके प्रजाभिः कृतात्सुकृतात्षष्ठमंशं हर्ता हरति अरक्षणे दोषमाह अन्यथा प्रजाभि
र्हतपुण्यः सः प्रजानामरक्षिता यः करहारः सन्नरादि नाचेत्र १३ ॥ ॥

एवंचमोक्षोप्यनायासेनभविष्यतीत्याह द्विजाग्र्यानामनुमतस्त्वासावनुद्धतस्त्वपरंपराप्राप्तोयोधर्मः सएवपथा
नेत्र्यर्थकामौनप्रासंगिकौयस्यअन्यतमप्रातिशयेनात्यः धर्मादिष्वनासक्त इत्यर्थः एकपद्यपाठेधर्मप्रधानत्वान्न
नसौअर्थकामौयस्यइत्यर्थः अस्याः पृथिव्याः अविनाशन् अल्पेनकालेनगृहानागतान् सनकादीनुद्दासित्व
त्वत्क्रोलोकोयस्मिन्सः २५ मत्तत्वः सकाशात् किंचिदंहणीस्वगुणाश्रमादयः शीलेननिमित्तसंख्याहिसभा
वः नैरंहयत्रिनोवश्यीकृतः २६ नद्यद्दितैस्तनमखादिभिर्नाहंस्तलभः यतः समंचित्तंयेषांतेष्वेववन्निंतशी

एवंविद्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोतितमोविनास्याः क्षेत्रेनकालेनगृहोपयातान्द्रष्टा
सिसिद्धानतत्रकलोकः २५ एवंचमनुवचनमानवेंद्रहणीषहेतुणशीलयवितः नाहंसवेवे
स्तुलभस्तयोभिर्योगेनवायत्समवितवन्नी २६ मैत्रेयउवाच सइत्थंलोकगुरुणाविश्वक्सेनस्यावि
स्तुजित् अनुशासितआदेशाशिरसाजगृहहरेः २७ स्पृष्टनेपादयोप्रेमणाब्रीडितेस्वेनकर्मणा
सानन्दुकन्नेपरित्यज्यविद्वेषेविसस्हृर्जहृ २८ भगवानथविश्वात्माहप्युनोपदन्तनार्हणः सप्
जिहानयाभक्त्यागृहीतचरणोद्भजेः २९ पश्यानाभिमुखोप्येनमज्ज्रहविलेविनः पश्यपना
द्वापलाशादौनश्रनस्यसहृल्स्नौ ३० ॥

लेयस्यसोहं २६ २७ द्रूमापयितंपादयोस्स्पर्शेनतंस्वेनकर्मणाश्चापहरणेनव्रीडितेप्रेमणापरित्यज्य २८
भगवान्पश्यानाभिमुखोप्यनुग्रहेणाविलेभितः सनूश्रतस्योश्रयाणांहृतवानित्यनयोरन्वयः कथंभूतः उ
पहृतेश्रापितेश्रर्हणंयस्मैसप्रभुज्जिहानयासप्रक्षेकुमावर्द्धमानयाभक्त्यागृहीतेचरणोद्भजेयस्य २९
पद्मपलाशवद्दलिणीयस्यनयाभूतः सन् एवंप्रभुंपश्यन् ३१ ॥

राम
५२

भगवतस्तत्त्वमातिरेकस्तस्मात्तस्य भक्त्युद्रेकमाह सइतिद्वाभ्यां बाष्पविक्लवत्वेन तूष्णीमवस्थितः सन्
अमुं हरिं हृदोपगृह्याधात् धृतवान् २१ अतृप्तयोर्दृशोर्गोचरे विषये पदाक्षितिं स्पृशन्तमित्यपभा
वः नरवद्देवाः पदा भुवं स्पृशन्ति अतः कृपापरवशोनूनं हरिरात्मानं विस्मृतवान् अतएव खल
नपतिह्यायैवगरुडस्योन्नतेस्कंधे विन्यस्तहस्ताग्रं येनतं २२ वरं वृणीष्वेति यदुक्तं तत्सहमानस्त्वाह
हे विभो वरवदानां ब्रह्मादीनामीश्वराणां वरप्रदात् ततस्त्वत्तः सकाशात् बुधः कथं वरान् वृणीते की
दृशान् गुणविक्रियत्न इति गुणविक्रियो हंकारः स एवात्मा येषां ब्रह्मादीनां संबंधिनः देहाभिमानि

स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः न किंचनोवाच स बाष्पवि
क्लवो हृदोपगृह्यामुमधादवस्थितः २१ अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचर
माह पूरुषम् पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरंगविद्विषः २२ पृथुरुवाच
वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनाम् येनारकाणामपि संति दे
हिनां तानीश कैवल्यपते वृणे न चात २३ न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणा
म्बुजासवः महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः २४ ॥ ॥

नां भाग्यानीतिवा नयाचे कुतएवनभवतीत्यर्थः मुक्तिस्तत्वात्तदपीत्याह यइति कुतएवाहमपि नह्य
णाइति समुच्चयाय चकारः २३ कैवल्यपत इति संबोधनात्कैवल्यं वरिष्यामीति माशंकीत्याह महत्
तमानामंतर्हृदयात् मुखद्वारेण निर्गतो भवत्पादांभोजमकरंदो यशः श्रवणादिसुखं यत्र नास्ति तन्नाहं
कांक्षेत कैवल्यं तर्हि तत् कदाचिदपि न कामये तर्हि किं कामयसे तदाह यशः श्रवणाय
कर्णानामयुतं विधत्स्व नत्वेकोपि वेनहतवान् किमन्यस्तत्तयेत्याह एष मे वरः २५ ॥ ॥

श्री॰
भा॰ व॰
टी॰
५२

ननु तर्हि विवेकत्याभावे रागद्वेषाद्याकुलानां भक्तिस्तव कथमपि न स्यात् इत्याशंक्याह स इति भगवत्पदांभोज-
सुधायाः कणो लेशः तत्संबंधी योऽनिलः स एव दूरादपि किं विशेषः श्रवणमात्रमित्यर्थः विस्मृतं
तत्त्ववर्त्म यैः कुयोगिभिस्तेषामपि पुनः स्मृतिमात्मज्ञानं वितरतीति अतो न खलु भक्तानां रागादिसंभवः
अतोऽस्माकं सारग्राहित्वान्नान्यैर्वरैरलं भक्त्यैव मोक्षादेः सर्वस्याविनाभावादिति भावः २५ ननु भक्तिर्मुक्ति-
फलैव अतः फलं विहाय साधने भवतः कोऽयमाग्रह इत्याशंक्याह हे सुश्रवः मंगलकीर्ते शिवं यशः
सतां संगमे यः सकृदपि यदृच्छयापि उपशृणोति गुणज्ञस्तेन सः पशुं विनान्यः कथं विरमेत् गुणा-

स उत्तमश्लोक महन्मुखच्युतो भवत्पदांभोजसुधाकणानिलः स्मृतिं पुनर्विस्मृततत्त्ववर्त्म-
नां कुयोगिनां नो वितरत्यलं वरैः २५ यशः शिवं सुश्रव आर्यसंगमे यदृच्छया चोपशृणोति ते
सकृत् कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया २६ अथाभजे त्वाखि-
लपूरुषोत्तमं गुणालयं पद्मकरेव लालसः अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्च-
रणैकतानयोः २७ राम ॥

निश्चयं सूचयति श्रीर्यत् यद्यश एव प्रवव्रे वृतवती गुणानां सर्वपुरुषार्थानां संग्रहः स्वस्मिन्समाहार-
स्तदिच्छया २६ अतो लक्ष्मीरिवान्यवरत्यागेन त्वामेवाहं भज इत्याह अथेति लालसः उत्सुकः ननु कर्म-
णि क्रियमाणे यथैकेन सह कलिः एवं भक्तावपि किं लक्ष्म्या सह कलिः स्यादिति वितर्कयति अ-
कस्मिन्नस्मात्स्पर्धमानयोरावयोः अपि किं कलिर्न स्यादिति काक्वा वितर्कः ननु एकपत्यैव सेवा-
र्थासात् नैव कृतः त्वच्चरणयोरेकस्तानः मनोविस्तारो याभ्यां तयोः २७ ॥ ॥ राम
५२

भवतस्त्वाकलिः तयाभजेयमेवेत्याह जगज्जनन्यां वैशसं विरोधः स्यादेवेत्याह यस्याः कर्मणि नः समी-
हितं इच्छा भवति तयापीदृशविरोधेन मत्सद्रूपानव पितृवत्सद्रूपानयवस्यादित्याह फल्गु तुच्छमपि उरु ब-
हु करोषि यतो दीनेषु वत्सलः स्वस्वरूप एव रजस्य तया किं प्रयोजनं नो नाहं इयस्य तत्पर्यः यतस्त्वं दीनवत्स-
लः २८ अत एव साधवो निष्कामाः अथ ज्ञानानंतरमपि त्वां भजंति कथं भूतं मायाया गुणानां विभ्रमो वि

जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितम् करोषि फल्ग्वप्युरु दीनवत्सलः
स्व एव धिष्ण्येभिरतस्य किं तया २८ भजेत्यथत्वामत एव साधवो व्युदस्तमायागुणविभ्रमोद-
यम् भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे २९ मन्ये गिरं ते जगतां विमोहि-
नीं वरं वृणीष्वेति भजंतमात्थ यत् वाचा नु तंत्या यदि ते जनोसितः कथं पुनः कर्म करोति मोहितः
३० त्वन्मायया द्धा जन ईश खंडितो यदन्यदाशास्त ऋतात्मनो बुधः यथा चरेद्बालहितं पिता स्व-
यं तथा त्वमेवार्हसि नः समीहितुम् ३१ मैत्रेय उवाच इत्यादिराजेन नुतः स विश्वदृक् तमाह राजन्
मयि भक्तिरस्तु ते दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम् ३२ तत्त्वं
कुरु मयादिष्टमप्रमत्तः प्रजापते मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ३३ ॥ ॥

लासः तस्माद्वयः साक्षर्ये सनिरस्तो यस्मिन् तेने किमर्थं भजंतीत्यत आह भवत्पादानुस्मरणात् विनाश्रन्य
न्नैयानिमित्तं फलं न विद्मः २९ वरैः प्रलोभनं च त्वत्पादलोसलवाञ्छितमित्याशयेनाह मन्ये इ-
ति ग्रहोने वा वा तंत्या यदि जनोयं बद्धेनः अबद्धः स्यात् नहि पुनः पुनः फलैर्मोहि-
तः सन् कथं कर्म करोति ३० त्वन्मायया खंडितस्य त्वया पुनः पुनः खंड-
नेन कर्तव्यो किं तर्हि नेत्वेषितव्यमित्याह त्वन्मायया ऽस्मनादात्म-
नः तत्वः खंडितः पृथक् कृतः यतो न्यत् इत्यादि कमाशास्ते अतः स्वयं विचार्यापितएव हितं चेष्टितुमर्हसि ३१

श्री॰ भा॰ च॰ टी॰ ५५

वाग्वित्तांजलिभक्तिभिः पूजिताः संतः वैकुंठानुगताः पार्षदाश्च ३६ अदृष्टाय लोचनपथमतिक्रांता(
यसंदर्शितआत्मायेनतस्मै ३७ इतिभावार्थेचतुर्थेविंशः २० एकविंशेतुपृथुनाप्रजानामनुशासनम्
महासभीसदादीनांमहासदसिवर्ण्यते भूषयाविस्त्रनगरमत्रवर्णयति मौक्तिकैरितित्रिभिः चंद
नागुरुधूपैस्तोयैरार्द्रीरथ्यादयस्तेषुपत्रे नोक्मैर्हैरिति यवैरंकुरैरितिवार्चिभिर्दीपैः २ ३ संभृता(

मैत्रेय उवाच इति वैन्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः पूजितोऽनुगृहीत्वैनं गंतुं चक्रेऽच्यु-
तो मतिम् ३३ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः किन्नराप्सरसो मर्त्याः खगा भूतान्यने-
कशः ३४ यज्ञेश्वरधिया राज्ञा वाग्वित्तांजलिभक्तितः सभाजिता ययुः सर्वे वैकुंठानुगतास्त-
तः ३५ भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः हरन्निव मनोऽमुष्य स्वधाम प्रत्यगात्प्र-
भुः ३६ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने वासुदेवाय देवानां देवाय स्वपुरं ययौ ३७
इति श्रीभागवते चतुर्थे विंशोऽध्यायः २० मैत्रेय उवाच मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः
स्वर्णतोरणैः महासुरभिभिर्धूपैर्मंडितं तत्र तत्र वै १ चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गव-
त् पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् २ सवृंदैः कदलीस्तंभैः पूगपोतैः परिष्कृ-
तम् तरुपल्लवमालाभिः सर्वतः समलंकृते ३ प्रजास्तं दीपावलिभिः संभृताशेषमंगलैः
अभीयुर्मृष्टकन्याश्च मृष्टकुंडलमंडिताः ४ शंखदुंदुभिघोषेण ब्रह्मघोषेण चर्त्विजां वि-
वेश भवनं वीरः स्तूयमानो गतस्मयः ५ पूजितः पूजयामास तत्र तत्र महायशाः पौरान्जा-
नपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ६ स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्
महत्तमः कुर्वन्शशासावनिमंडलं यशः स्फीतं निधायारुरुहे परं पदं ७

नि अशेषाणि मंगलानि दध्यादीनि तैः सह स्वयमभिजग्मुः मृष्टाः उज्ज्वलाः कन्याश्च ४ गतस्मयो नि-
रहंकारः ५ प्रियान्वरान् प्रददातीति तथा ६ गुणैर्महान् अत एव महत्तमः पूज्यतमः ७ ॥ ॥ शुभ ५५

गुणैर्विजृम्भितं ऊर्जितं गुणवद्भिः सभाजितं सत्कृतं यशो गृणन्तं नमस्कुर्वन्नाह सदस्पते शौनक ८ ल
ब्धान्यशेषसुराणामर्हणानि येन सः किमकरोदिति शेषः ९ श्रवणोत्सुकतामाविः कुर्वन् प्रार्थयते
को न्विति यस्य विक्रमः उच्छिष्टो दोहनेन स्वोच्छिष्टं तं लोकाः मे न स्व कर्म वद प्राचीन कर्मभिः आरब्धानेव बु
भुजे न तु भोगार्थं कर्माणि करोति तदपि भोगेन पुण्यक्षयाय न तु स्वसुखासक्त्येत्यर्थः ११ अस्खलितः
अप्रतिहत आदेश आज्ञा यस्य स सप्तद्वीपेष्वेक एव दण्डं धारयतीति तथा किं सर्वत्र नेत्याह ब्रह्मकुलमित्यतिरे

सूत उवाच तदादिराजस्य यशो विजृम्भितं गुणैरशेषैर्गुणवत्सभाजितं क्षत्ता महाभा
गवतः सदस्पते कौषारविं प्राह गृणन्तमर्चयन् ८ विदुर उवाच सोऽभिषिक्तः पृथुर्विप्रै
र्लब्धाशेषसुरार्हणः बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गां ९ को न्वस्य कीर्तिं न शृ
णोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः लोकाः सपाला उपजीवन्ति काममद्यापि त
न्मे वद कर्म शुद्धं १० मैत्रेय उवाच गङ्गायमुनयोर्नद्योरन्तरा क्षेत्रमावसन् आरब्धानेव बु
भुजे भोगान्पुण्यजिहासया ११ सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् अन्यत्र ब्राह्मण
कुलादन्यत्राच्युतगोत्रतः १२ एकदासीन्महासत्रदीक्षा तत्र दिवौकसां समाजो ब्रह्मर्षी
णां च राजर्षीणां च सत्तम १३ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः उत्थितः सदसो म
ध्ये ताराणामुडुराडिव १४ प्रांशुः पीनायतभुजो गौरः कञ्जारुणेक्षणः सुनासः सुमुखः सौ

केण अच्युतगोत्रः वैष्णवस्तं वर्जयित्वेत्यर्थः कुलाद्ब्राह्मणात्तद्व्यतिरेकेण च एकदा तस्य महासत्रदीक्षा आसीत्
१२ तत्र च देवादीनां समाजोऽप्यासीदित्यर्थः १३ तस्मिन् पूजेषु स्वर्चितेषु सत्सु सदसो मध्ये उत्थितः
सन् समेतान् समेतान्निरीक्ष्य श्लोकेनान्वयः प्रांशुः उन्नतः पीनावायतौ भुजौ यस्य कञ्जवदरुणे ईक्षणे
यस्य शोभना द्विजाः स्मितं च यस्य १५ ॥

वा॰ व्यूढं विस्तीर्णं वक्षो यस्य वलीभिस्तिसृभिर्वल्गु सुन्दरं दलवत् अश्वत्थपत्रमिवोदरं विस्तृतमथ स्थूलं
च उचितमुदरं यस्य यथा आवर्तवन्निम्ना नाभिर्यस्य काञ्चनवदुज्ज्वलावूरू यस्य उदग्रौ उन्नतौ अग्रौ पादौ यस्य १६
सूक्ष्मा ह्रस्वा वक्रा कुटिला असिता स्निग्धाश्च मूर्धजा यस्य कम्बुवत् शिरोग्रीवा किंनाम कन्धरा यस्य परिधीय च
सित्वा उपवीय उत्तरीयं कृत्वा नियमे निमित्ते न्यस्तानि भूषणानि येन सः अत एव नैरन्ताहृतत्वात् व्यञ्जिता अशेषगात्रे
श्रीः स्वाभाविकी शोभा येन कृतानि उचितानि कर्माणि येन १८ शिशिरः स्नेहापहरः स्निग्धे वत्तारे यस्य

व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः आवर्तनाभिरोजस्वी काञ्चनोरुरुदग्रपात् १६
सूक्ष्मवक्रासितस्निग्धमूर्धजः कम्बुकन्धरः महाधने दुकूलाग्र्ये परिधायोपवीय च १७
व्यञ्जिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः कृष्णाजिनधरः श्रीमान् कुशपाणिः कृतोचितः
१८ शिशिरस्निग्धताराक्षः समैक्षत समन्ततः ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव १९ चारुचित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवं राजोवाच सभ्याः शृणुत भद्रं वः
साधवो य इहागताः सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितं २० अहं दण्डधरो राजा
प्रजानामिह योजितः रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् २१

योऽस्ते इति णीयस्य इदं वदमाणो वाक्यम् उक्तवान् चारु श्रोत्रप्रियं चित्राणि पदानि यस्मिन् श्लक्ष्णं
स्पष्टं मृष्टं शुद्धं गूढं गम्भीरार्थम् अविक्लवं अव्याकुलं २० भाषणे हेतुः धर्मजिज्ञासुभिः पुंभिः सत्सु स्व
मनीषितं मावेद्यं वक्तव्यं अतः प्रजानुशासनमिषेण जिज्ञासैव क्रियते न त्वनुशासनं सतां धर्मप्रवचनमिति
भावः २१ इदानीं प्रजारक्षणादिविषयं प्रजानुशासनमिषेण जिज्ञासैव क्रियते न त्वनुशासनमिति धर्मप्रवृ
प्रजाविहितरक्षणादिकं ममावश्यकमित्याह अहमिति त्रिभिः पृथक् स्वेषु सेतुषु स्थापयिता २२ ॥ ॥

दिष्टदक्. प्रावृक्कर्मसाक्षीईश्वरोयस्यइष्यति नस्यवेदवादिनोयान् लोकानाहुः पृज्ञारक्षणाय ब्रह्मानो ब्र
लोकामेस्युः क्रियेभूताः कामानांसम्यक् दोहः पुराणयेषु २२ अन्ययान्ति हि स्वादिन्याह यद्दतिश्रमलेवा
यावं भगवैपूर्वं २३ तस्मान्हेप्रजाः भर्त्रेममपिंइक्षानवत्सरलोकहिताथस्वकार्यमेवस्वधर्ममेवाज्ञनिष्ठन
अथोहतजेधीर्येषानादरणाः सेतः वासुदेवार्पणदक्षोन्तर्यः अनुग्रहः कृतोभवेदितिशेषः २४ शास्त्राःशिष्टि
पितः अनुज्ञातः अनुमोदितः प्रेत्यपारलौकियत्फलनतुल्यं २५ कर्मकर्तव्यमिति अनुमोदामहे नतुवासुदेवा
र्पणमितिवेनादिभिस्तदवेगीकारादित्येवेवादिनः शनैर्बोधयन्नाह हेअर्हत्तमाः यत्तपतिर्नीपरमेश्वरःकेषा
विन्मतेनावदस्ति तथापिविशतिपत्तेर्नतत्सिद्धिरित्याशंक्य वैविद्यान्ययाज्ञपपत्तिश्रमाणयति इहाअस्य

तस्यमेतदव्रह्मानाद्यदाहुर्वेस्ववादिनः लोकाःस्युःकामसंदोहाःयस्यतुष्यतिदिष्टदक् २२ यउद्व
रेतदेराजाप्रजाधर्मेष्वशिक्षयन् प्रजानांशमलेभुंक्तेभगंचस्वंजहातिसः २३ तत्प्रजाभर्तृपिंडार्थं
स्वार्थमेवानसूयवः ऊरुतायोदमधियःतर्हिमेनुग्रहःकृतः २४ यूयंतदनुमोदध्वंपितृदेवर्षयो
मलाः कर्तुःशास्तुरनुज्ञातुःतुल्यंयत्प्रेत्यतत्फलम् २५ अस्तियज्ञपतिर्नामकेषांचिदर्हसत्तमाः
इहामुत्रचलक्ष्यंतेज्योत्स्नावत्यःक्वचिद्भुवः २६ मनोरुत्तानपादस्यध्रुवस्यापिमहीपतेः प्रियव्र
तस्यराजर्षेरंगस्यास्मत्पितुःपितः २७ ईदृशानामथान्येषामजस्यचभवस्यच प्रह्लादस्यबलेश्चापि
कृत्यमस्तिगदाभृता २८ दौहित्रादीन्ऋतेमृत्योःशोच्यान्धर्मविमोहितान् वर्गस्वर्गापवर्गाणां

ज्योत्स्नावत्यः कांतिमत्यः भुवोभोगभूमयः शरीराणिवा २६ तन्विदं कर्मवैचित्र्यादेवसेत्स्यति तथापिविद्वद्
भवेनेश्वरसिद्धिरित्याह मनोरितित्रिभिः प्रसिद्धानामहत्स्वांगस्यकृत्यमस्ति अवश्यंकर्मफलदातृभावमितिते
षामतमित्यर्थः २८ मृत्योर्दौहित्रादीन्वेनादीन् धर्मविमोहितान् अतःशोच्यान्ऋते तन्नकर्मैवफलंदास्यति
विशुद्धेशानतावादेवताः किंपरमेश्वरेणतत्राहवर्गस्त्रिवर्गः स्वर्गोधर्मस्यफलंअपवर्गोमोक्षः तेषामेकात्म्ये
तपकत्वेन सर्वानुगतेनहेतुनानचापिशब्देनाहेतनाअयंभावः ननावज्जडस्यकर्मणःफलदातृत्वेघट
ते नवार्वाक्देवतानांस्वातंत्र्यंनतर्यामित्वात्तः नचैतदाकर्मसाम्येफलतारतम्येचाविनदक्षिदिः एवंसंभवतिअतः

किंच जीवानां मोक्षदः परमेश्वर एव नार्वाग्देवताः तासामपि जीववन्निर्विशेषादित्याशयेनाह यदि
तित्रिभिः यस्य पादयोः सेवायामभिरुचिः तपस्विनां संसारतप्तानां अशेषैर्जन्मभिः संचितं धियो मलं सद्यः
क्षपयति तमेव भजतेति तृतीयेनान्वयः कथंभूताग्रहन्वहमनिप् यमाना वर्धमाना सती साङ्गकीर्तत्या
दृ संबंधस्यैवैष महिमेति दृष्टान्तेनाह यथेति ३१ विनिर्हूताश्चशेषा मनोमला यस्यासंगा वैराग्येनेन

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः सद्यः क्षिणोत्यन्वहमेधती
सती यथा पदाङ्गुष्ठविनिःसृता सरित् ३१ विनिर्हूताशेषमनोमलः पुमानसंगविज्ञानविशे
षवीर्यवान् यदङ्घ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ३२ तमेव यूयं भजता
त्मवृत्तिभिर्मनोवचः कायगुणैः स्वकर्मभिः अमायिनः कामदुघाङ्घ्रिपंकजं यथाधिकारा
वसितार्थसिद्धयः ३३ ॥

विज्ञानस्य विशेषः साक्षात्कारः तदेव वीर्यं यस्य यस्याङ्घ्रिमूले कृताश्रयः सन् ३२ आत्मवृत्तिभिरा
धायनादिभिः मनोवचः कायानां गुणैः व्यापारैः स्वकर्मभिः परिचर्याभिः अमायिनः निष्कपटाः सन्तः नन्वेवमा
दिभिः सेवा किमस्माकं तत्त्वाभविष्यतीति तत्राह यथाधिकारमेवावसि
ताभिस्थिताः वार्या नो सिद्धयो येषां ३३

स्वकर्मभिर्योगादिभिर्भजनेनेत्युक्तं तत्त्वस्यार्थिणांवस्तुहविरितिन्यायेन सर्वेषु यागादितत्फलेषु भगवद्बुद्धा
कर्मकर्तव्यं न भिन्नं दृष्टोनिवर्तते तेषां च भगवद्रूपतामाह द्वाभ्यां अस्येति भगवानेव स्वरूपतो विशुद्धविज्ञानघनोपि
अगुणो निर्विशेषोप्ययं इह कर्ममार्गे अनेकगुणः नानाविशेषणवान् अध्वरो यज्ञः संपद्यते यज्ञो वै वि
ष्णुरिति श्रुतेः अनेकगुणत्वमेवाह पृथग्विधानि यानि द्रव्यादीनि तैः स्वरूपं द्रव्याणि व्रीह्यादीनि गुणाः शुक्ला
दयः क्रियावघातादयः उक्तयो मन्त्राः अर्थो योगसाध्य उपकारः आशयः संकल्पः लिंगपदार्थानां शक्तिः

अस्याविद्धानेकगुणोऽगुणाध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः संपद्यतेऽर्थाशयलिंगनामभि
र्विशुद्धविज्ञानघनः स्वरूपतः ३३ प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम्
क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मकः ३४ अहो ममामी वितरन्त्यनुग्र
हं हरिं गुरुं यज्ञभुजामधीश्वरम् स्वधर्मयोगेन यजन्ति मामकाः निरन्तरं क्षोणितले दृढव्रताः ३५

नाम ज्योतिष्टोमादिनैस्तैरध्वरः संपद्यते ३३ यागफलस्यापि भगवद्रूपतामाह प्रधानेति एष प्रभुः परमात्मा दे
ह एव शरीरे तेन तेन विषयाकारां बुद्धिं प्रतिपद्य तन्नभिव्याप्यानंदरूपः सन् क्रियाफलत्वेन प्रतीयते एतस्यैवानंदस्य
न्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः यथानलो दारुषु स्थित स्तद्गुणात्मकः दारुधर्मैर्दैर्घ्यवक्रत्वादिभिः मा
न् तद्वत् कथंभूते शरीरे प्रधानं अव्यक्तं कालः क्षोभकः आशयो वासना धर्मो अदृष्टं तैः संगृह्यते जन्यत इति
तथा तस्मिन् ३४ नन्वेवंभूतं भगवन्तं भक्त्या जनेषु वर्तयंस्त्वं ततः स्वधर्मान्तःप्रवृत्तानिमान् भवेत् नेनेज्यतां इत्याह अहो इति

विंतेविविं ५४ ॥

श्री॰ भा॰ वा॰ टी॰ ५०

इदानींहरिभक्तिदार्ढ्यायब्रह्मणभक्तिंविधत्ते माजात्विनिषड्भिः महत्यश्चताः ऋद्धयश्चताभिर्यद्राजकु
लस्यतेजः तत्तस्मात्सकाशात् द्विजानांकुलेप्रजितादेवतानां येषांवैस्ववाणांतेषांचकुलेमाजातुप्रभवे
त् कदाचिदपिप्रभावेनकरोतुवर्थभूतैर्महर्द्धिभिर्विनापिस्वयमेवतितिक्षादिभिर्देदीप्यमानेब्रह्मणा
त् स्वयंचाह यच्चरणाभिवंदनाद्धरिर्लक्ष्मीयशश्चावाप २९ यत्सेवयाचेश्वरस्तुष्यति तदेवब्रह्मकुलं
निषेव्यतामितिद्वयोरन्वयः हरेर्लोकसंग्रहरूपोयोधर्मः तत्परैः ३० तद्ब्रह्मकुलमेवनित्यंसेव्यमानेस

माजातुतेजः प्रभवेन्महर्द्धिभिस्तितिक्षयातपसाविद्ययाच देदीप्यमानेजितदेवतानांकु
लेस्वयंराजकुलाद्द्विजानाम् २९ ब्रह्मण्यदेवः पुरुषः पुरातनोनित्यंहरिर्यच्चरणाभिवंदना
त् अवापलक्ष्मीमनपायिनीयशोजगत्पवित्रंचमहत्तमाग्रणीः ३० यत्सेवयाशेषगुहाश
यः स्वराड्विप्रप्रियस्तुष्यतिकाममीश्वरः तदेवतद्धर्मपरैर्विनीतैःसर्वात्मनाब्रह्मकुलंनिषे
व्यतां ३१ पुमांल्लभेतानतिवेलमात्मनःप्रसीदतोत्यंतशमंस्वतः स्वयं यन्नित्यसंबंधनिषेव
याततःपरंकिमत्रास्तिमुखंहविर्भुजाम् ३२

वदेवतानांमुखभूतेश्रोत्रियज्ञाद्यनुष्ठानेनस्यान्नचैतेनविनाचित्तशुद्धिः नचतयाविनामोक्षः स्यादित्याशंका
ह् पुमानितिद्वाभ्याम् यस्यब्रह्मकुलस्यनित्यसेवयायेननिषेवयाअस्मात् स्वयमेवज्ञानाभ्यासादिकंविनापि
अत्यन्तमेशममोक्षंलभतेततः यत्सेवयास्वतएवअनतिवेलंशीघ्रंप्रसीदतः शुद्धान्तरात्मनः चित्तात्तः
पंब्रह्महदेवानांकिंसुखमस्तिब्राह्मणसेवयैवयागादिफलस्यानफलेनसर्वम
वस्तीतितत्त्वार्थः ३२ राम ॥

राम॰ ५०

हरेरपि नरदपि परं गुरुत्वमित्याह अध्यातीति इन्द्राणोर्मिंद्रादीनां नामभिर्यस्य गुरुत्वे अद्रबाहुनं हरिर्विरतोयर्थं
ध्यातिनयाचेतनारहितेन कुनाशनेन कुतेनाध्यातिवैर्हनमध्यातितन्नकोविदैः सर्वदेवमयः चैतन्यमूर्तिरनेनरह
नितनक्कोविदैः विदिद्भिः ऊन एवं भूतोसेनत्राह पारमहंसस्य ज्ञानेनतत्पदन् अंहेतिअधिकुर्वेतीति पारमहंसस्य
र्यः नागावोवाचो नस्मात्उपनिषद्भूतेनयनत्वेनोक्तः इत्यर्थः यद्वा पारमहंसानां ज्ञाननिष्ठास्यः पारमहंसः
परितो नगच्छतिगावोवाचो यस्मात् सपर्यगः इंद्रियनियतनसचासौसवपारमहंसस्यपर्यगः ज्ञानरूपः सर्वोतिया

अध्यातनेतनः खेलतन्नवोविदैः अद्रा कुनेयेगुरवे इन्द्रनामभिः नवेनयाचेतनयाबहिष्कुतेन कु
नाशनेपारमहंसपर्यगः ४॰ यद्भक्तिनिसविरजेमनातनेन्द्रज्ञानयोमंगलमौनसंयमैः समाधि
नाविभ्रतिचार्थदृष्टयेयज्ञेदमादर्शइवावभासते ४२ नेषामहे पादसरोजरेणमीयावहे यापिकिरी
टैमाधुः यनित्यदाविभ्रतध्यासुपावनअयस्मश्रेसर्वगुणाभजेति ४३ गुणालये शालथनकुतनसे
हदाश्रयंसंहृत्यनेव्रसंपदः प्रसीदनांवस्मकलेगवोचजनार्दनः सात्वचस्वमसं ४४ मैत्रेयडा
वाच इतिस्तुवाणं नृपतिंपितृदेवद्विजातयः नतुष्टुवर्हृष्टमनसः साधुवादेनसायवः ४५ पुत्रेण
जयतेलोकानितिसत्यवतीश्रुतिः ब्रह्मदंडहतः पापोयद्वेनोप्यानरत्नमः ४५ हिरण्यकशि
पुश्चापिभगवनिंदयातमः विविद्धरत्यगान्सूनोः प्रल्हादस्यानुभावतः ४६ वीरवर्यपितः पृ
थ्व्याः समाः संजीवशाश्वतीः यस्येदृश्यच्युतेभक्तिः सर्वलोकैकभर्तरि ४७ ॥ ॥
मीतार्थः ४॰ नकेवलेचेतनत्वेकुनाशनाद्विशेषः किंतुवेदज्ञानादपीत्याहयादिसम्वयं ये ब्रह्मवेदेनित्यंवि
भ्रतितेषामित्युत्तरेणान्वयः मंगलनामयशसावरणानित्यं गुरुशास्त्रस्यवर्जनं एतद्विमंगलशोन्नशुषिभिसन्न
दर्शिभिः मौनमध्ययनविरोधिवार्तात्यागः समाधिनाविभ्रस्थैर्येणश्रयीदृष्टयेवेदार्थमपिविचारयेतीत्यर्थः
यत्रवेदे इदंविश्वं ४२ हे आर्याः यात्रायावज्जीवं गृधिकिरीटैरुद्धटस्योपरि हे येतिप्रार्थनायांत्वि इदेरेण
४३ गुणाभजनस्यफलमाह गुणायनं प्रत्रसंपदः सेहृणानेसम्यक् भजंतितस्मात् प्रसीदतां प्रसीदतु भगवा
न्जनार्दनः ४४ साधुवादमाह पुत्रेणेतित्रिभिः यद्यतः वेनोपितमोनरकमत्यतरत् अतितार ४५ ॥

श्री॰
भा॰ स्कं॰
टी॰
४८

मुकुंदनाथः सः तवायत्तमेव मुकुंदनाथ तेषु पर्यवसितमित्यर्थः तत्र हेतुः यइति ४८ आजीवितं सेवका
नाम्याश्रयत्वासने प्रजास्वनुरागः प्रकृतिः स्वभावः ४९ उपसादितः प्रापितः कर्मभिः आत्मनो ईश्वरस्य
विप्राद्यो प्रणमंति नमइति ब्रह्माविश्य ब्राह्मणान्नातिमुपदिश्य यद्दत्तं दातीयं बिभर्ति तत्रयाविश्य ब्रह्म
बिभर्ति तत्र भयं चाविश्य यइदं विश्वं बिभर्ति इति वत्सर्थः एकविंशः २१ द्वाविंशे न्रपरस्तान्तत्प्रथवे हरिशा
सनात् सनत्कुमारो भगवानुपादिशत् दिनीर्यते १ अर्चिष्वालक्षितान् सनकादयइति ज्ञापितान् अचष्ट अप
श्यत् २ तेषां दर्शनेनोद्गतान्प्राणान्प्रत्यादित्सुरिव ग्रहीतुमिच्छुरिव अयं भावः ऊर्ध्वं प्राणो ह्युत्क्रामति स्थविर आयति

गृहीतं येय पितृवित्तकीर्तिं त्वयैव यो येन मुकुंदनाथाः यत्र न्नमहाश्लोक नमस्याविलोकस्मापदेव
स्य कर्थावनतिः ४८ नान्यत् कुन मिद् नाथ तवाजीवात शासने प्रजानुरागो महतां प्रकृतिः क
रुणात्मनां ४९ यत्र न त्वमसः पारः त्वयोपासादितः प्रभो भ्रमतो नष्टदृष्टीनां कर्मभिर्दैवसंज्ञि
तैः ५० नमो विवृद्धसत्वाय पुरुषाय महीयसे यो ब्रह्म क्षत्रमाविश्य बिभर्तीदं स्वतेजसा ५१
इति श्रीभागवते चतुर्थे एकविंशः २१ मैत्रेय उवाच जनेषु प्रगृणत्स्वेवं पृथुं पृथुलवि
क्रमं तत्रोपजग्मुर्मुनयः चत्वारः सूर्यवर्चसः १ तांस्तु सिद्धेश्वरान्राजा व्योम्नोवतरतोर्चिषा
लोकानपापान्कुर्वतः सानुगोचष्टलक्षितान् २ तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थि
तः ससदस्यानुगो वैन्य इंद्रियेशो गुणानिव ३ गौरवायंत्रितः सभ्य प्रश्रयानतकंधरः
विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ४ तत्पादशौचसलिलैर्मार्जितालकबंधनः तत्र शी
लवतां वृत्तमाचरन्मानयन्निव ५ हाटकासन आसीनान्स्वधिष्ण्येष्विव पावकान् श्रद्धासंयम
संयुक्तः प्रीतः प्राह भवाग्रजान् ६ पृथुरुवाच अहो आचरितं किं मे मंगलं मंगलायनाः य

पत्न्या यानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इति स्मृतेः प्राणास्तावत्त्रैव मे मत्प्रीतिमास्तान्प्रत्युत्कंठितत्वतः
स्वयमन्यक्षततः प्राणाञ्छनिः स्यादिव सप्रश्रयमुत्थानं चकारेति स इह सदस्यैरनुगेषु वर्तमानः इन्द्रियेशो
जीवः गुणाननुगंधादीन् प्रतिपद्यावक्षत्रीतोत्सवेषु इन्द्रियानः ३ यंत्रितो वशीकृतः गृहीतमर्ध्यर्हणमासनं
सनं येयैः तान् ४ ६ प्रीतः प्राहेत्यत्र अत्रैव प्रीतिमेवं वचनमाह अहोइति दशभिः हे मंगलायनाः

स्कं॰ ४
५८

दुर्दर्शत्वमाह सर्वदृशामात्मानं यथा सर्वेन दृशा लक्षयंते ये स्यविश्वस्य हेतवो महदादयो मन्वादयो वा यद्वा
कथंभूतान् ये स्य सर्वदृगात्मदर्शनस्य ये हेतवः स्यात् ९ येषां साधूनां गृहाः अर्हणोदकज्यानां वर्याः वरणीयाः
स्वीकारार्हाः प्रेष्ठादयो येषु ना दृशाः येषु च तृणं च भूमिश्च ईश्वरो गृहस्थस्य स्वामी च प्रवराः भृत्यादयश्च १० बाला
नामालया द्रुमा एवं ते प्रविज्ञाः दृशाः अखिलसंपदो येषु ना दृशा अपि येषां गृहाः तीर्थपादीया वैष्णवास्तेर
षां पादतीर्थेन विवर्जिताः ११ स्वागतं भद्रमानेदं जाने यद्यस्मात् बाला एव भवंतो गृहं हंति वनानि चरंति यद्वा

नैव लक्षयंते लोके लोकानन्यर्थदर्शनोपियान् यथा सर्वदृशः सर्व आत्मानं ये स्य हेतवः ९ अधना अपि
तेषां धन्याः साधवो गृहमेधिनः यद्गृहा ह्यर्हवर्योदतृणभूमीश्वरावराः १० बालालयद्रुमा वै ते यामि
त्राखिलसंपदः ये गृहास्तीर्थपादीयपादतीर्थविवर्जिता ११ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि
मुमुक्षवः चरंति श्रद्धया धीरा बाला एव बहूं हंति वै १२ कस्वित्रः कुशलं नाथा इंद्रियार्थार्थवेदिना
न् व्यसनावाप एतस्मिन्पतितानां स्वकर्मभिः १३ भवत्सु कुशलप्रश्नः आत्मारामेषु नेष्यते
कुशलाकुशला यत्र न संति मतिवृत्तयः १४ न दहेहत विस्रंभः सुहृदो नत पस्विनो संदृक्के भव
एतस्मिन् क्षेमः केनो भवेज्जसा भवेत् १५ व्यक्रमात्मवना मात्माभगवानात्मभावनः स्वानां मनुग्र
हायेषां सिद्धरूपीचरत्यजः १६

येषां वा व्रतानि श्रद्धया बाला आचरंति १२ इंद्रियार्थमेवार्थं पुरुषार्थं ये वदंति तेषां यतः व्यसनान्युपायाने यस्मिं
स्तस्मिन्संसारे १३ ननु भागवतानां कुशलप्रश्नो लोके न त्वात्मत्वात्मन स्तत्राह भवत्स्विति १४ नत्वस्मात्तान
विस्रंभः सन् तपस्विनां सन्मानां सुहृदो यस्मात् हरामि १५ न केवलस्य योनित्वात् किंतु साक्षाद्भ
गवानेवेत्याह व्यक्तं निश्चितं आत्मवतां धीराणामात्मत्वेन स्वात्मत्वेन प्रकाशमानः आत्मानं भावयति प्र
काशयतीति तथा इमां पृथ्वी चरति १६

सूक्तं शोभनं वचनं सारं न्याय्यं सुष्ठु गंभीरार्थं मितं अल्पाक्षरं मधु श्रोत्रप्रियं प्रश्नेष्वसन्नतया स्मयमान इव प्रतीय
मानः १७ १८ उभयमपि इष्टयोः संगममभिनन्दति संगम इति उभयेषां वक्तॄणां च येषां संभाषणसहितः संप्रश्नः
सर्वेषां शं सुखं विस्तारयति १९ तदेवं संगमं प्रश्नं चाभिनन्द्यानुवादरूपेणैव मोक्षसाधनमुपदिशति अ
स्त्येवेति गुणानामनुवादेन श्रद्धाद्वारेणानुवादः प्रवर्तते श्रवणे इत्यर्थः आत्मनो मनसोऽन्तःस्थं कामात्म
कं विधुनोति कषायं वा रागवदनिवर्त्यं २० विनश्येदेव बहिर्वैराग्यमात्मनि रतिश्च भवति स च न तु नाधिकं साधनम
स्तीत्याशास्त्रेषु नयोरेव मोक्षहेतुत्वनिश्चयादित्याह शास्त्रेष्विति सध्र्यग्विमृशेषु सम्यग्विचारवत्सु

मैत्रेय उवाच पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह
१७ सनत्कुमार उवाच साधु पृष्टं महाराज सर्वभूतहितात्मना भवता विदुषा चापि साधूनां मतिरीदृ
शी १८ संगमः खलु साधूनामुभयेषां च संमतः यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शं १९ अ
स्त्येव राजन् भवतो मधुद्विषः पादारविन्दस्य गुणानुवादने रतिर्दुरापा विधुनोति नैष्ठिकी कामं क
षायं मलमन्तरात्मनः २० शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः असंग
आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या २१ सा श्रद्धया भगवद्धर्मचर्यया जिज्ञा
सयाध्यात्मिकयोगनिष्ठया योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च २२ ॥

क्षेमस्य हेतुः एतावानेव सुनिश्चितः कोऽसावात्मव्यतिरिक्तेऽसंगो वैराग्यं आत्मनि रतिः आत्मनो विशेषणं
निर्गुणे ब्रह्मणीति २१ नन्वेतद्देवातिदुर्लभमित्याशंक्य उत्तमाधिकारिणः श्रवणमात्रेण भवति अन्यस्य तु
चित्तशुद्ध्यनुसारेण साधनान्तरं तस्याभिवर्द्धमानया भक्त्येत्यभिप्रेत्याह सेति चतुर्भिः साऽसंगादिरतिः संपाद्य
श्रद्धादिभिः स्यादिति चतुर्थेनान्वयः जिज्ञासया तत्त्वविशेषप्रश्नेन
पुण्यं श्रवो यशो यस्य तस्य हरेः पुण्यया कथया च २२

अर्थारामा अर्थनिष्ठास्तामसाः इंद्रियारामाः कामनिष्ठा राजसाः तैः सहगोष्ठी तत्र अतृष्णया तेषां चा
येसंमता अर्थाः कामाश्च तेषामपरिग्रहेण विविक्ते विजने या रुचिः तया आत्मन्येव परितोषे च मतिः स्यात्
किंतु हरेर्गुणपीयूषपानादि विना तस्मिन् संति विविक्तरुचिर्न कार्या न वात्मनि परितोषः कार्य इत्यर्थः
२२ पारमहंस्यचर्यया उपशमादिरूपया तया हत्वा स्मृत्या आत्मस्फूर्त्या उत्सेधानेन मुकुंदचरितमेवाग्र्यं शीधु
श्रेष्ठमधु तेन तच्चरित्रस्मृतिश्रवणेनेत्यर्थः मार्गांतरस्यानिंदया अनिरीहया योगेनोपार्थक्रियाराहित्येन शीतोष्णादि
द्वंद्वसहनेन २४ अर्थयेत्तया एकं येन भक्त्या वर्धनं गतत्वेन उच्यते तत्परा हरिभक्ताः तेषां कर्णपूरः

अर्थेंद्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेण च विविक्तरुच्या परितोष आत्मन्वि
ना हरेर्गुणपीयूषपानात् २२ अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यशीधुना
यमैरकामैर्नियमैश्चाप्यनिंदया निरीहया द्वंद्वतितिक्षया च २४ हरेर्मुहुस्तत्परकर्णपूर
गुणाभिधानेन विजृंभमाणया भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा
रतिः २५ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा दहत्यवीर्यं हृ
दयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः २६

कर्णालंकारभूताः ये हरेर्गुणाः तेषामभिधानेन सदसती कार्यकारणरूपे २५ भवतस्तत्र असंग आत्मरा
तिश्च ततः किमत आह यदा निष्ठा अमा रतिर्भवति तदा आचार्यवान् सन् ज्ञानवैराग्ययोर्वेगेन अवीर्यं ति
वीसनं सत् जीवस्य कोशमावरकं हृदयं लिंगशरीरं उपाधिं दहति कथंभूतं पंचभूतप्रधानं यद्वा अविद्या
स्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः तदात्मकं उत्थितः प्रज्वलितो अग्निर्निमरणिमि
व यद्वा यदा रतिराचार्यानुग्रहस्तेन तदा ज्ञानवैराग्ययोर्वेगेनोत्थितः सात्विका
रः अवीर्यं पुनः प्ररोहसामर्थ्यरहितं अभावे हृदयं दहति शेषसमाने २६ ॥

श्री॰
भा॰ च॰
टी॰
८॰

ततः किमतआह देहयोगाभावोयोरुदयस्तपार्थिवस्यगुणप्रवमुक्ताः समस्तास्तल्लक्षणाः कर्तृत्वादयोयेनआ
त्मनः सकाशाद्बहिर्देहादिस्थिता। सखेदुःखादिनैव विचक्षेन पश्यत्येन ज्ञानेनेत्यपेक्षायां दृष्टान्तः पश्यतीति
देतेः कारणहेतुत्वादित्याह परोक्षवत्स्वः आत्माहत्यतयोर्यथावथानेदृष्टमासीन्नस्यविनाशोसतियथास्वमे
राजाहमित्यारोपितेसेन्यादिक्षेत्ररिहएस्सैन्यंवसमावस्यानाशेनस्वभावस्यानाशेनपश्यतितद्वत्
२० दृष्टहदृश्यभेददर्शनीतस्तेनः कारणहेतत्वमन्वयव्यतिरेकाभ्यांप्रपादयतिआत्मानेद्दष्टारेइंद्रियाणेदृश्यं
उभयोस्तयोः परस्बेवेथहेतुमहंकारंचसमाश्रयेतः करोतिसतीवजाग्रत्स्वमयो पश्यतिसुषुप्तदास्तुमोनद्र
ष्टादृष्टानरोजितेदृष्टदृश्ययोदृष्टग्रंजितेग्रहंहुतोभयोरन्नतनाशेहनात्मनइति २८ एकस्मिन्नात्मनिदृश्या

दृश्यारोपेत्रुक्तसमस्तलक्षणोनैवात्मनोबहिरन्तर्विचक्षेत् एतात्मनोर्यथायथानेपुरस्तात्स्व
मेयथास्वस्वतहिनाशे २९ आत्मनेइंद्रियार्थैचपरेयदुभयोरपि आत्माश्रयउपायोवेशमा
न्यपश्यतिनान्यदा २८ निमित्तेसतिसर्वत्रजलादावपिदूरयः आत्मनश्चपरस्यापिभिदाएवं
श्यतिनान्यदा २९ इंद्रियैर्विषयाकृष्टेराक्षिप्तंध्यायतांमनः चेतनांहरतेबुद्धेःस्तंबस्तोय
मिवहृदात् ३० भ्रश्यत्यनुस्मृतिश्चित्तेज्ञानभ्रंशःस्मृतिक्षये नद्योर्थंकवयःप्राहुरात्मापह्नव

दिभेददर्शनीतितेप्रोपाधिकीतिदृष्टान्तेनसमर्थयतिनिमित्तइमलोके सूर्यजलदर्पणादौभेदनिमित्तेसत्येव
आत्मनोबिंबभूतस्यपरस्यप्रतिबिंबस्यचभेदपश्यतिसत्तन्नजलाद्यभावे २९ ननहिद्वैचनैर्भिरसंगात्म
स्वामीदहहेतत्वमुक्तं इदानीमनात्मरतेः संसारहेतत्वमाहइंद्रियैरितिचतुर्भिः ध्यायतेगुणान्बुधे स्मरतो
पुंसोइंद्रियाणिसत्वेनेविषयेराकृष्टानेतेमनआक्षिप्यतेविषयासक्तिः प्रापितिः नचबुद्धेः सकाशात्नहं
मंचेतनचबारमासयाआहरति एतच्चाविवेकिनोनलद्धानइतिदृष्टान्तोनाहतीरजः ज्ञानादिस्तंबेयथाष्टू
लेस्तोयेकृषयदयहरतितत् ३० चित्तेचेतनानामतुतस्याममपस्तनायोस्मृतिःपूर्वापरानुसाधाभ्रश्यतिएवेना

एवंभूतो नाशो भवति ततस्तु किमित्यत आह यदधि यमधिकृत्यान्यस्य विषयस्य प्रेयस्त्वमतं आत्मनस्तत्का
माय सर्वं प्रियं भवतीति श्रुते तस्यात्मनः स्वेनैव यो व्यतिक्रमोपद्रवः तस्माद्यः स्वार्थनाशः अतः परतरः
स्वार्थनाशो नास्ति ३२ कुत इत्यत आह अर्थस्य विषयस्याभिध्यानं इंद्रियार्थं वा मनसाभिध्यानं स
र्वार्थनाशः ज्ञाने विज्ञाने परोक्षापरोक्षे येन ध्यानेन भ्रंशितः स्थावरतां ३३ अतोत्यंतमनर्थहेतुत्वमज्ञेत्से
तस्याप्याह नेति यदत्यंतं धर्मादीनां विघातकं तस्मिन् संगं तमः संसारे ३४ तत्वार्थनिर्देशात् पुरुषार्थसाम्य
भ्रांतिं निवारयति तत्रापीति कृतांतः कालः ३५ भयहेतुत्वमेवाह परे ब्रह्मादयः अवरे स्थावर

नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ३२
अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यताम्
३३ न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः धर्मार्थकाममोक्षाणां यदत्यंतविघातकम्
३४ तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते त्रैवर्ग्योर्थो यतो नित्यं कृतांतभयसंयुतः ३५ परे
वरे च ये भावा गुणव्यतिकरादनु न तेषां विद्यते क्षेममीशविध्वंसिताशिषां ३६ तत्त्वं नरेंद्र
जगतामथ तस्थुषां च देहेंद्रियासुधिषणात्मभिरावृतानां यः क्षेत्रवित्तपतया हृदि वि
श्वगाविः प्रत्यक्चकास्ति भगवांस्तमवेहि सोस्मि ३७

यः गुणक्षोभादनु पश्चादुत्पत्तिः ईशः कालस्तेन विध्वंसिता आशिषो येषां यस्मादनात्मरतिरनर्थहेतुः
तत्तस्माज्जगतां जंगमानां तस्थुषां स्थावराणां च देहादिभिरात्मनाहंकारेण चावृतानां हृदि यश्चकास्ति
प्रकाशते तमवेहि कथं सोस्मीति सोस्मीति पाठे स एवाहमस्मि ततो नान्यदस्तीत्यर्थः ननु जीवो हृदि
चकास्ति नाहमित्यत आह परतयेत्याद्ययाति नत्र कर्मजीवे नियच्छति तत्राविः प्रत्यक्षः तर्हि बुद्धिः नश्वत्य
वृ. प्रतिलोमे च चकास्ति परात्विषयकारेणांतर्यहंकारः ततो विश्वक् आत्मत्वेन सतत परिच्छिन्नः एवंभूतोभ

भागवत स्कंधटी ७६ =

श्री॰
भा॰ ४॰
टी॰
८९

स्थावरजंगमादीनां हृदि स्फुरतीत्युक्ते तेषां सत्त्वेन तत्संबंधादीश्वरस्य मालिन्यं प्रसक्तं निराकुर्वन् उद्दिष्टभक्त्या तं शरणमेति यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टनिकृष्टभावेन कार्यकारणभावेन वा मायैव विभाति । तं प्रपद्ये माया यत्त्वहेतुः विवेकेन विधुतिर्निराकृतिर्यस्य तत् स्रजि वेति वा शब्दो दृष्टान्ते तेनित्यमुक्तं यतः परिशुद्धं तत्त्वं ज्ञानं विशुद्धं तत्त्वं सत्त्वं यत्र अत एव प्रत्यूढा अभिभूता कर्मभिः कलिला मलिना प्रकृतिः तं ३८ तमेव हीनित्यानमुपदिशति तस्य दुष्प्राप्यत्वेन भक्तिं दिशति द्वाभ्यां यस्य पादपंकजयोः पलाशानि अंगुलयः तेषां विलासः कान्तिः तस्य भक्त्या सन्तः कर्माशयं अहंकाररूपं हृदयग्रंथिं कर्मभिरेव संग्रथितं रिक्तानि

यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुति स्रजि वाहिबुद्धिः तं नित्यमुक्तपरिशुद्धविशुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ३८ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति सन्तः तद्वन्न रिक्तमतयो यतयोपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवं ३९ कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयंति तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णं ४० मैत्रेय उवाच स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृप ४१ ॥ ॥

विषया मतिर्येषां रुद्धः प्रत्याहृतः स्रोतोगणः इंद्रियवर्गो यैः अरणं शरणं ३९ तत्र ब्रह्मविदामेतीति परमिति स्फुटतेः कथयतयो नोत्तरंतीत्युक्ते तत्राह कृच्छ्र इति अप्लवेशां नस्य वक्तृणां हेतुः इंद्रईशा येषां तेषां महानिह तरणे कृच्छ्रः क्लेशः तेहि प्रयत्नेन योगादिना इंद्रियषड्वर्गग्राहं भवार्णवं तितीर्षंति तत्तस्मादुडुपं प्लवं दुस्तरार्णवमित्यर्थः यद्वा अर्णं अर्णवशब्देव काराभावस्त्रार्षः दुस्तरार्णं दुरूपं व्यसनमित्यर्थः ४० आत्ममेधसा ब्रह्मविदा दर्शिता आत्मनो गतिस्तत्त्वं यस्मै सः ४१

राम॰
८९

वस्याश्रितिर्निसंबोधनं प्राधान्यादेकस्य पृथग्मिस्त्रिः सर्वौश्रति ४१ आत्मना देहेन सह सर्वं राज्यादिकं मदीयं सा
धूच्छिष्टं साधुभिः स्वीयं सत्स्वप्रसादरूपेणादत्ते अतस्तत्र ममत्वाभावात् गुरुदक्षिणायां किं ददे नहि पि
त्रादत्तं सैव दानरूपेणार्पयते ४२ निवेदनेन तदीयस्यैव समर्पणं यथा भृत्यो राज्ञे सेवारूपेण ताम्बूलादि समर्प
यति तथा मयापि सर्वं निवेदितं स्त्रीनन्दसाकुरं ते न्याहृ प्राणा इति ४४ आत्मनः स्वत्वाभावं प्रपञ्चयति सेनापत्यं
चेति द्वाभ्यां ४५ वस्तिपरिधत्ते अन्नमात्रं केवलं भुञ्जते ते न तदा नेस्व तेजः ४६ सत्यपि स्वत्वे सर्वस्वदानापि न

श्रीराजोवाच कृतो मे नुग्रहः पूर्वं हरिणार्तानुकम्पिना तमापादयितुं ब्रह्मन्भगवन्यूयमागताः
४३ निष्पादितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ४४
प्राणा दाराः सुता ब्रह्मन्गृहाश्च सपरिच्छदाः राज्यं बलं मही कोश इति सर्वं निवेदितं ४५ सेना
पत्यं च राज्यं च दण्डनेतृत्वमेव च सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ४६ स्वमेव ब्राह्म
णो भुङ्क्ते स्वं वस्ते स्वं ददाति च तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः ४७ यैरीदृशी भगवतो
गतिरात्मवाद एकान्ततो निगमिभिः प्रतिपादिता नः तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं को ना
म तत्प्रतिकरोति विनोदपात्रं ४८ मैत्रेय उवाच त आत्मयोगपतय आदिराजेन पूजिताः शीलं
तदीयं शंसन्तः खेऽभूवन्मिषतां नृणां ४९ वैन्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया आप्तकाम

रोः प्रत्युपकर्तुं शक्यमित्याह यैरिति आत्मवादे अध्यात्म निर्विकारे एकान्ततो निश्चयेन निगमभिः वेद
विद्भिः ते नित्यमनल्पकरुणाः स्वकृतेनैव तुष्यन्तु नोऽस्माकं कर्मणा तेषां तत्को नाम तत्प्रत्युपकारं प्रतिस्वयं प्र
त्युपकरोति उदपात्रेणाञ्जलिं विना मया जलमिव तेभ्यो बद्धं इत्यर्थः यद्वा विनोदपात्रं उपहासास्पदं प्रत्यु
पकारं प्रदद्यो जनानाम् उपहासास्पदं भवेदित्यर्थः खेऽभूवन् आकाशमार्गेण गताः ४९ धुर्यः श्रेष्ठः
अध्यात्मशिक्षया याऽनेस्थितिरेकाग्रता तया आत्मन्येव स्थितः सन्नेव ५०

श्री॰ भा॰ च॰ टी॰ ८२

ब्रह्मसात्कृतं ब्रह्मण्यर्पितं यथा भवति तथा ५० निर्विषंगः कर्मस्वनासक्तः कर्माध्यक्षं कर्मसाक्षिणमुदा
सीनं मन्वानो न करोमीति निरहंकारेण वा अन्वयः नासज्जतेत्यत्र हेतुः एवं ५१ अर्चिषि भार्यायां ५३ सोमवत्प्रकाशो राजा प्रत
पंश्च भुवो वसु धनं गृह्णन् विसृजंश्च सूर्यवत् राज्ञः प्रतपनमाज्ञाकरणं ५६ अग्निरिव दुर्धर्षः द्यौस्तरा

कर्माणि च यथाकालं यथादेशं यथाबलं यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतं ५० फलं
ब्रह्मणि विन्यस्य निर्विषंगः समाहितः कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परं ५१ गृहेषु वर्त
मानोऽपि स साम्राज्यश्रियान्वितः नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ५२ एवमध्यात्मयो
गेन कर्माण्यनुसमाचरन् पुत्रानुत्पादयामास पंचार्चिष्यात्मसंमतान् ५३ विजिताश्वं धूम्र
केशं हर्यक्षं द्रविणं वृकं सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् ५४ गोपीथाय जगत्सृ
ष्टेः काले स्वे स्वेऽच्युतात्मकः मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरंजयन् प्रजाः ५५ राजेत्यधान्नाम
धेयं सोमराज इवापरः सूर्यवद्विसृजन् गृह्णन् प्रतपंश्च भुवो वसु ५६ दुर्धर्षस्तेजसेवाग्निर्महेंद्र इ
व दुर्जयः तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणाम् ५७ वर्षति स्म यथाकामं पर्जन्य इव तर्प
यन् समुद्र इव दुर्बोधः सत्वेनाचलराडिव ५८ धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव कुवेर इ
व कोशाढ्यो गुप्तार्थो वरुणो यथा ५९ मातरिश्वेव सर्वात्मा बलेन महसौजसा अविषह्यतया
देवो भगवान्भूतराडिव ६० कंदर्प इव सौंदर्ये मनस्वी मृगराडिव वात्सल्ये मनुवन्नृणां प्रभुत्वे भग
वानजः ६१ बृहस्पतिर्ब्रह्मवादे आत्मवत्वे स्वयं हरिः भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु
ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ६२ ॥

दुईव ५० समुद्रो यथा गांभीर्येण तावानिति तेन दुर्ध्यानेन तथा सोऽप्यभिप्रायेण दुर्बोधः अचलराट् मेरुरिव
५८ ५९ सर्वात्मा सर्वत्र संचारशक्तिर्बलादिभिर्मातरिश्वेव भूतराट् श्रीरुद्रः ६० अजो ब्रह्मेव आत्मवत्वे
जितेंद्रियत्वे भक्त्यादिभिः परोद्यमे चात्मनेव तुल्यः ६२ ॥ ॥ राम॰ ८२

पुंभिः सम्प्रहृष्टैः रामः सीतापतिर्यथा सन् कार्णिर्म्येषु प्रविष्टः ६३ इति भावार्थे चतुर्थस्कंधे द्वा
विंशोध्यायः २२ त्रयोविंशे सभार्यस्य वने नित्यसमाधिना विमानमधिरुह्यार्थ वैकुंठगमनिरूच्यते दृष्ट्वा
संहृष्टे दृष्ट्वात्मानं तपोवनमगादिति निरूनीयेनान्वयः स्वरक्षितो ऽनुसर्गः पुरग्रामादिसर्गस्य वृत्तिनः प्रशोष्यस्यानुसर्गो
येन निष्पादितेश्वरादेशः प्रजापालनादि येन जज्ञिवान् जातः २ आत्मजाः पृथ्वी विमनस्कां विंतावस्त
सदारः सभार्यः ३ अदाभ्याविच्छिन्नानीशायितमशक्यानियमा यस्य वैखानसस्यानोस्तुसमते उग्रे तपसि आरब्धः

कर्तार्ध्वगीनयापुंभिस्त्रैलोक्ये नरतत्रह प्रविष्टः कार्णिर्म्येषु स्त्रीणां रामः सत्रामिव ६३ इति
श्रीभागवते चतुर्थे द्वाविंशोध्यायः २२ मैत्रेय उवाच दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्म
वान् आत्मनावर्धिताशेषस्वानुसर्गः प्रजापतिः १ जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सतां
निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् २ आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिव प्रजा
सु विमनःस्वेकः सदारोगात्तपोवनं ३ तत्राप्यदाभ्यनियमो वैखानससुसंमते आरब्ध उग्रत
पसि यथा स्वविजये पुरा ४ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित् अब्भक्षः कतिचित्प
क्षान्वायुभक्षस्ततः परम् ५ ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः आकण्ठमग्नः शिशि
रे उदके स्थंडिलेशयः ६ तितिक्षुर्यतवाग्दान्त ऊर्ध्वरेता जितानिलः आरिराधयिषुः कृष्णम
चरत्तप उत्तमम् ७ तेन क्रमानुसिद्धेन ध्वस्तकर्ममलाशयः प्राणायामैः सन्निरुद्धषड्वर्गश्छिन्नबंधनः

कर्तारिक्तः स्वस्य जयधरामंडलस्य विजये पूर्वं यथा महता यत्नेन प्रवृत्तः ४ उग्रं तपो दर्शयति कंदमूले
तित्रिभिः क्वचित् कदाचित् ५ वर्नादिक्षु चत्वारोग्नयः उपरि सूर्य इति पंचतपाः संतापो यस्य स पंच
तपाः आसारं सहत इत्यासारषाट् शिशिरे जलेस्थंडिलेशयः भूमिशयः सर्वदा ६ ७ तेन तपसा
क्रमानुसिद्धेन शनैः शनैः ध्वस्तानि कर्माणि यस्य ततः अमल आशयो यस्य छिन्नानि बंधनानि वासना यस्य

परिकर्मणा परिचर्यया शुद्धसत्त्व आत्मा मनो यस्य तस्य ज्ञानमभूत् कीदृशं येन निजं उपाधिं जीवकोशं अहंकारं संशयग्र-
थिं संशयानामास्पदं भवादीनां पदमाश्रयं चिच्छेद कीदृशेन अनया भक्त्या निशितेन कथंभूतया तस्य भगवतः
अनुसंस्मरणं अनुपूर्तिर्यस्याः तया निशितेन ११ किंच छिन्नान्यधीर्देहात्मबुद्धिर्यस्य यतो अधिगता
आत्मगतिः अत एव निरीहः आत्मारामसिद्धिवृत्तिस्पृहः येन वयुनेन ज्ञानेन इदं संशयपदं छिन्नं चिच्छेद तत् ज्ञानमपि तत्य-
जे त्यक्तवान् तत्र यत्नाधिक्यमेवेत्यर्थः तत्र योगसिद्धिष्वपि निस्पृहत्वं भक्तेरेवेत्याह तावदिति अप्रमत्तः किं
तु प्रमत्तो भवति तस्य श्रीकृष्णस्य कथासु रतं यावन्नास्ति लोभो जायते इत्यर्थः १२ देहस्योत्सर्गप्रकारमाह सं

सनत्कुमारो भगवान्यदाहाध्यात्मिकं परम् योगं तेनैव पुरुषमभजत्पुरुषर्षभः ९ भगवद्धर्मि-
णः साधोः श्रद्धया यततः सदा भक्तिर्भगवति ब्रह्मण्यनन्यविषयाभवत् १० तस्यानया भगवतः
परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या ज्ञानं विरक्तिमदभून्निशितेन येन चिच्छेद संशया-
पदं निजजीवकोशं ११ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन
न तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् १२ एवं स वीरप्रवरः
संयोज्यात्मानमात्मनि ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरं १३ संपीड्य पायुं पार्ष्णिभ्यां वा-
युमुत्सारयंस्ततः नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकंठशीर्षणि १४ उत्सर्पयंस्तु तं मूर्ध्नि क्र-
मेणावेश्य निःस्पृहः वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत् १५ ॥ ॥

पीड्येति त्रिभिः पायुं गुदं संपीड्य निरुद्धासनं बद्धवता सूचितं संपीड्य सीवनीं सूक्ष्मां गुल्फेनैवमथातः सव्येन दक्षिण-
गुल्फेन सञ्चाभ्यासनमिति रीतिं मूलाधाराद्वायुमुत्थापयन् नाभ्यामवस्थाप्य ततः कोष्ठेष्ववस्थाप्य अयूयुजत्
इत्यन्तरेणान्वयः कोष्ठानेवाह हृदादीनां देहदेशेषु शीर्षं भ्रूमध्यं तस्मिन् १४ तं वायुं षाडान्तरे ब्रह्मरन्ध्रे
क्रमेण उत्सर्पयन् क्रमेणासन्नाधिष्ठानं ब्रह्मरन्ध्रे प्रवेश्य ततो देहारम्भकं पञ्चभूतानि समष्टिभूतेषु विलापयन्
तदाह वायुं वायावयूयुजत् एकीकृतवान् कथं देहगतकठिनांशं क्षितौ १५ ॥ ॥

एवानिइंद्रियकिलाणिइवांशोनोये तदेवं देहं प्रविलाप्य द्वितीयात्स्थितियत्वार्थे महाभूतानामपि लयमाह
क्षितिमिंगस्येकीदृत्तवान् देभः अदस्तेजः असंवायु १५ तदेवतामसाहंकारकार्यस्याकाशस्यं तदेवलक्ष
णासात्विकराजसाहंकारकार्याणांलयमाहेंइंद्रियाणांहि चरतोयन्मनोनुविधीयतइति येषुमनइतिदे
वानामप्युपलक्षणांसविकल्पकस्थानेनमनसइंद्रियैराकार्षणान्तेभलयाभिधानेनतुकार्यत्वात् तडेवतागी
नासइंद्रियाणांहिचरतोयन्मनोनुविधीयतेइति इंद्रियैर्विषयाहृष्टैराक्षिप्त्यावमनइतिइंद्रियेषु
इतिपाठेप्ययमर्थः महदादीनामनेनभंश्याह्वषेकेषाविन्मानसस्थ्ररमानिकत्वमनेपिइंद्रियव्यापारोसीवन
भोगुणास्वग्राह्यः श्रोत्रग्राह्यः अतइंद्रियग्राह्यत्वादिंद्रियषुनभोविभावितमिति तानींद्रियाणियथोद्भवं
उद्भवोहिशब्दत्रिलाभः सवविषयाधीनइति श्रोत्रादीनांविषयेषुशब्दादिषुलयः यद्वातन्मात्रकार्याणिएवं

रूपान्याकाशइवंतोयेयथास्थानंविभागशः क्षितिमंभसितत्तेजस्यदोवायौनभस्यमुं १६ इं
द्रियेषुमनस्तानितन्मात्रेषुयथोद्भवं भूतादिनामून्युत्कृष्यमहत्यात्मनिसंदधे १७ तंसर्वगुण
विन्यासंजीवेमायामयेन्यधात् तंचानुशयमात्मस्थमसावनुशयीपुमान् १८ ज्ञानवैराग्यवीर्ये
णास्वरूपस्थोजहात्प्रभुः अर्चिर्नाममहाराज्ञीतत्पत्न्यनुगतावने सुकुमार्यतदर्हाचयत्पद्भ्यां
स्पर्शनेभुवः १९

इंद्रियाणिमनीच्यपंचाहत्ततपंचतन्मात्रकार्याणिअहंकारोवत्वाभिधानेनतदधीनत्वविवक्षयेत्यविरोधः भूतादि
नाहंकारेणाग्रगवशिष्टनमः सहितानींद्रियाणिउत्कृष्यपरतोनीत्वा भूतादोदिप्सानेनसहत्वेनसंद
धइत्यर्थः १७ सर्वेषांगुणानांकार्याणांविन्यासः स्थितिर्यस्मिन् तंमहांतंमायामयेमायाम्याउपाधिप्र
धानेजीवे तंचानुशयमुपाधिर्यः पूर्वमनुशयीपुमान् जीवः असौप्रभुः स्वरूपस्थितः सन्नजहादि
त्यर्थः १८ ववृषेवेशामारभ्यराज्यः कथामाह अर्चिर्नामेतिचतुर्भिः अनुगतानुगमनगा
मयातदर्हातदपिनार्हेतिया किंपद्भ्यांभुवः स्पर्शनमितियत् १९

श्री: भा: स्क: टी: ८४

मर्तर्व्रतं यद्भूमिशयनादि तस्मिंधर्मे योनिष्ठा तया आशीर्णाभियमांघी देहयात्राकंदमूलादिवृत्तिः तया वा
आर्तिर्दुःखं न आपनये हेतवः श्रेयसः करोणास्पर्शनं माणास्नानाभ्यां निवृत्तिर्निर्यस्याः २० पृथिव्यापस्तःइहि
न्द्रियत्वं न स्यादेव नाद्रूपेण विषयत्वेन स्पर्शाविलक्षेचेतनादिकं यस्मिन् तथा भूतं देहं मालक्षयन्ती देहं विनामा
रोपयत २१ कृतात्मना लोचितानि विधाय कृत्वा देन्याजले आप्लुता माना सती भर्तृदेहके दग्धादि विग्रहमेरोते स्थिा

अनीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चारषदेहयात्रया नाविंदतार्तिं परिकर्शितापि सा प्रेयस्क
रस्पर्शनमाननिर्वृतिः २० देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्यायदिनसवात्मनः
आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि २१ विधाय कृत्यं ह्रदिनीजला
प्लुता दत्त्वोदकं भर्तुरुदारकर्मणः नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्याय
ती भर्तृपादौ २२ विलोक्योत्रगतोसाधीष्ट सुवीरपवरे पति नहष्टे द्वेवरदादेवैर्देवपत्न्यास
ह स्वशः २३ ऊर्वैत्यः ऊस्त्र मासारं तस्मिन्संहरसात्तुति नहन्त्वमरन्तूर्यैषु शृणोति स्म परस्परं
देव ऊचुः अहो इयं वधूर्धन्या या चैवं भूभुजां पति सर्वात्मना पतिं भजेय यज्ञेशं श्रीर्वधूरिव २४
सैषा नूनं व्रजत्यूर्ध्वमनु वैन्यं पतिं सती पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा २५ तेषां
दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदं भुवि लोलायुषो ये नैष्कर्म्यं साधयन्त्युत २६ स वै विज्ञातवात्मा आत्मकृत् हन्तु
णामहता भुवि लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते २७ ॥

नान नत्वा वह्निं विविः प्रदक्षिणीकृत्य २२ देवैः सहिताः २३ शृणोति स्म अभाषेतेते २४ भगवानायाने
गम्यतेनेनेति तथा नत्वैष कर्म्म सानयेचैवला युषोपि साधयंतिनितेषां अन्यद्देवादिपदं किमुदुर्लभं न किं
विदित्यर्थः २५ अभक्तशोचंतिसर्वं तियतआत्मनेडुहानियोपवर्गसाधनेमनुष्यं लब्ध्वा विषयेषासक्तिया

३८ श्री
स्क: ८४

विप्राशांपश्यादीनां वा पतिः स्यात् ३२ यद्वा निबद्धानि फलानि भिन्नंति नयापि सुरक्तान्यसेगपवश्रव
णादि कुर्यात् महतो भवतो माहात्म्यस्य सूचकं पार्थिवी पृथुसेवे थिनी पार्थिवीमिति पाठः ३७ अथ
यत् कीर्तयन् भवसिंधोः पोतः पारेयस ३८ इति श्रीभावार्थे त्रयोविंशोऽध्यायः २३ एकादशभिरध्या

मैत्रेय उवाच एवंवतीघसरस्त्रीश्चपतिलोकं गतावधूः यत्रात्मविदां धुर्यो वैन्यः प्रापाच्युताश्र
य २९ इत्थंभूतानुभावोऽसौ पृथुः स भगवत्तमः कीर्तितं तस्य चरितमुद्दामचरितस्य ते ३० य इदं
सुमहत्पुण्यं श्रद्धयावहितः पठेत् श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात् ३१ ब्राह्म
णो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः वैश्यः पठन् विट्पतिः स्यात् शूद्रः सत्तमतामियात् ३२
त्रिः कृत्व इदमाकर्ण्य नरो नार्यथवादृतः अप्रजः सुप्रजतमो निर्धनो धनवत्तमः ३३ अस्पष्ट
कीर्तिः सुयशा मूर्खो भवति पण्डितः इदं स्वस्त्ययनं पुंसाममङ्गल्यनिवारणं धन्यं यशस्यमायुष्यं स्व
र्ग्यं कलिमलापहं ३४ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः श्रद्धयैतदनुश्राव्यं च
तुर्णां कारणं परं ३५ विजयाभिमुखो राजा श्रुत्वैतदभियाति यान् बलिं तस्मै हरन्त्यग्रे राजा
नः पृथवे यथा ३६ मुक्तान्यसङ्गो भगवत्यमलां भक्तिमुद्वहन् वैन्यस्य चरितं पुण्यं शृणुयात्
श्रावयेत्पठेत् ३७ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकं अस्मिन्कृतमतिमर्त्यः पार्थि
वीं गतिमाप्नुयात् ३८ अनुदिनमिदमादरेण शृण्वन् पृथुचरितं प्रथयन्विमुक्तसङ्गः भगवति भ
वसिंधुपोतपादे स च निपुणां लभते रतिं मनुष्यः ३९ इति श्रीभागवते चतुर्थे त्रयोविंशः २३

यैः श्रुपृथ्योः चरितमीरितं प्रचेतसां यथा सामभिस्तन्मध्ये पंचभिः पितुः चतुर्विंशे प्रपौत्रस्य पृथोः प्राची
नबर्हिषः प्रचेतसां जनिस्तेभ्यो रुद्रगीतं च वर्ण्यते ॥

श्री·
भा·४·
टी·
८५

धिराजासीदितिस्पष्टः यवीयोभ्यः कनिष्ठेभ्यः काष्ठादिशः निरूपितवन्तौ १ शक्राल्लब्धं
पृथोरश्वमेधेऽश्वविजयावसरेऽप्यन्तर्धानमेवाहूय नावधीदिति पूर्वोक्ताः शापस्तस्मान्मत्तद्योद्पुत्त्रत्रः सुसं
योगगतिमाश्रितवेशाम्रः नभस्वत्यामन्यस्यां भार्यायां अन्तर्धानविशेषणेयमिति एतेन शक्रादन्तर
र्धानगतिलाभे कारणमुक्तं ५ सर्वोऽन्तर्धानो राज्ञो वृत्तिं करादानादिभिर्दारुणां परपीडात्मिकां मन्या

मैत्रेय उवाच विजिताश्वोऽधिराजासीत्पृथुपुत्रः पृथुश्रवाः तस्मैबलिं हरिते स्वे राजानः
पृथवे यथा १ यवीयोभ्योऽददत्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः हर्यक्षायादिशत्प्राचीं धूम्र
केशाय दक्षिणां २ प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः अन्तर्धानगतिं शक्राल्लब्ध्वा
न्तर्धानसंज्ञितः अपत्यत्रयमाधत्त शिखण्डिन्यां सुसंमतं ३ पावकः पवमानश्च शुचिरित्य
ग्नयः पुरा वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ४ अन्तर्धानो नभस्वत्यां हविर्धानम
विंदत य इन्द्रमश्वहर्तारं विद्वानपि न जघ्निवान् ५ राज्ञां वृत्तिं करादानदण्डशुल्कादिदारु
णां मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ६ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक्
यजंस्तल्लोकतामाप कुशलेन समाधिना ७ हविर्धानाद्धविर्धानी विदुरासूत षट्सुतान्
बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतं ८ बर्हिषत्सुमहाभागो हाविर्धानिः प्रजापतिः
क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह ९ यस्येदं देवयजनमनुयज्ञं वितन्वतः प्राची

मानो विससर्ज ६ हंसं निस्त्रानो ज्ञेयाभिनिर्हसः तेषु रूपं ते पुरुषं कुशलं गुणेन रूपेण समाधिना ७
८ हविर्धानिः हविर्धानस्य पुत्रः योगेषु च प्राणायामादिषु ९ क्रियाकाण्डेषु निष्णातत्वमाह यस्य
ति इति वस्तथा ततं देवयजनं यज्ञावाटं वितन्वतः यज्ञैकोयज्ञः कृतः ततस्मात्मीय ज्ञानरंकुर्वतः सतः

समुद्रस्य कन्यां देवदेवेन ब्रह्मणा उपदिष्टां शतद्रुतिं नाम किशोरीं बालां परिक्रमन्तीं पश्यन् दिशां गच्छन् नीशुकीमिवे
ति पर्वत्या व्याख्यायते सम्बन्धीणां सचैतद्भार्यादर्शनेनाग्निः कामसन्नमोऽभूत् तेन च तद्भार्या स्वाहा नाम सप्तर्षि
भार्यारूपधारिणी सती रमयामास रमयित्वा च तद्देहेतः शुकीरूपेण आशा रक्षंस्तमेनि धायाय गच्छन् तायथा सम्म(?)
र्षिभार्या भ्रान्त्याग्निः कामितवान् तद्वदिति स्वकीमिवेति श्लोकस्य तथा राभियेत्यर्थः ११ सूर्ययान्वे

सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिं यां वीक्ष्य वारु सर्वाङ्गीं किशोरीं सुष्ठलंकृतां परिक्रम
न्तीमुद्वाहे चकमेऽग्निः शुकीमिव विबुधासुरगन्धर्वमुनिसिद्धनरोरगाः विजिताः सूर्ययादिश
द्वयक्वणायन्त्यैव नूपुरैः १२ प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् तुल्यनामव्रताः सर्वे धर्म
स्नाताः प्रचेतसः १३ पित्रादिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् दशवर्षसहस्राणि तपसार्च
स्तपसाम्पतिं १४ यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता तद्ध्यायन्तो जपन्तश्च पूजयन्तश्च संयताः
१५ विदुर उवाच प्रचेतसां गिरित्रेणाऽयथाऽऽसीत्पथि संगमः यदुताह हरः प्रीतस्तन्नो ब्रह्म
न्वदार्थवत् १६ संगमः खलु विप्रर्षे शिवेनेह शरीरिणां दुर्लभो मुनयो दध्युरसङ्गाद्यमभी
प्सितं १७ आत्मारामोऽपि यस्त्वस्य लोककल्पस्य राधसे शक्त्या युक्तो विचरति घोरया भगवान्
भवः १८

दृश्येव विबुधयो विजिता अभिभूताः तत्र नूपुरैः पादौ क्वणयन्त्येव क्षणिमात्रेणेत्यर्थः १२ तुल्यं नामव्रतं मा
चारश्च येषां धर्मस्नाताः धर्मपारगाः १३ तपसा तपसांपतिं हरिं अर्चयन्तः अर्चयामासुः १४ अन्वयोऽपि संग
त्यागेनात्मनि स्थितं दध्युरेव केवलेन तपसा तेन शिवेन १७ मनुमुनीनां किं
तज्ज्ञानेन घोरत्वादित्याशंक्याह आत्मारामोऽपि लोकार्थ
नायपालनाय १८ ॥

श्री॰ गुर्वीत्याकारिणां शिवदर्शनं स्वतएव भवतीत्याशयेनाह प्रचेतस इति १९ समुद्रमुपसमुद्रमिति किं विस्तृ
भा॰च॰ तं उपांथिके तिकर्मप्रवचनीयः प्रसन्नाशयः मत्स्यादयो यस्मिन् २० नीलोत्पलादीनामाकरं जन्म
टी॰ स्थानं उत्पलानी लांभोजं कल्हाराणि रात्रिंदिनं संविकासीति इंदीवरं नीलोत्पलं नत्वेवं पुनरुक्तिः श्रा
९९ द्धेयं ज्ञापनार्थं हंसादिभिः कूजिते २१ मत्तानां भ्रमराणां स्वसौस्वर्येणाशोभनस्वरेण याहृष्टरोमाणो

मैत्रेयः प्रचेतसः पितुर्वाक्यं शिरसाधाय साधवः दिशं प्रतीचीं प्रययुस्तपस्याहितचेतसः
१९ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः महन्मन इव स्वच्छं प्रसन्नसलिलाशयं २० नीलां
रक्तोत्पलांभोजकल्हारेंदीवराकरं हंससारसचक्राह्वकारंडवनिकूजितं २१ मत्तभ्रमर
सौस्वर्यहृष्टरोमलतांघ्रिपं पद्मकोशरजोदिक्षु विक्षिपत्पवनोत्सवं २२ तत्र गांधर्वमाक
र्ण्य दिव्यमार्गमनोहरं विसिस्म्यू राजपुत्रास्ते मृदंगपणवाद्यनु २३ तर्ह्येव सरसस्तस्मान्निष्क्रामं
तं सहानुगं उपगीयमानममरप्रवरं विबुधानुगैः २४ तप्तहेमनिकायाभं शितिकंठं त्रिलोच
नं प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः २५ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः
धर्मज्ञान्शीलसंपन्नान्प्रीतान्प्रीत उवाच ह २६ रुद्र उवाच यूयं वेदिषदः पुत्रा विदितं वश्चिकी
र्षितं अनुग्रहाय भद्रं व एवं मे दर्शनं कृतं २७ ॥ ॥

लता अंघ्रिपा यस्मिन् पद्मकोशरजो दिक्षु विक्षिपता पवनेनोत्सवो यस्मिन् २२ तत्र मृदंगपणवादि =
वाद्यमनु पश्चाद्दिव्यो मार्गो गमो यस्य तन्मनोहरं गांधर्वं गानमाकर्ण्य विस्मयं प्रापुः पाठांतरे मृदंगपणवादिव ९
वत् रद्भुतात् तेषां ध्वनिं तिरस्कृत्य वेदिसर्गाः २३ तेविबुधलोचनैर्वीज्यमानाश्चर्याः प्रणेमुः इत्युत्तरेणान्वयः
२४ तप्तहेमराशिसदृशा कांतिः शितिनीलः कंठो यस्य तं २५ वेदिषदः चिकीर्षितं भगवदाराधनं विदितं राम॰ ९९

सर्वगुह्यकारणमाह यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतं रंहसः सूक्ष्मात्त्रिगुणात्प्रधानात् जी
वसंज्ञितात्पुरुषाच्च परं श्रेष्ठं प्रकृतिपुरुषयोर्नियंतारमित्यर्थः २८ ततः किं तस्य महत्त्वमन्वादिश्याह स्वधर्मनिष्ठः
पुमान् बहुभिः जन्मभिर्विरिंचितामाप्नोति ततोपि पुण्यातिशयेन मामेति भगवतस्त्वथ देहांते अव्याकृ
तं प्रपंचातीतं वैष्णवं पदमेति यथाहं रुद्रो भूत्वा आधिकारिकदेहवर्तमानः विबुधा देवाश्चाधिकारिकाः कला
त्यये अधिकारांते लिंगभंगे सत्येवेति २९ अथ भागवता वासुदेवं प्रपन्ना यूयं मे प्रियाः स्थ भवद्भिरपि मयि

यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे २८ स्वध
र्मनिष्ठः शतजन्मभिः पुमान्विरिंचितामेति ततः परं हि मां अव्याकृतं भागवतोथ वैष्णवं पदं यथा
हं विबुधाः कलात्यये २९ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा न मद्भागवतानां च प्रेया
नन्योस्ति कर्हिचित् ३० इदं विविक्तं जप्तव्यं पवित्रं मंगलं परं निःश्रेयसकरं चापि श्रूयतां
तद्वदामि वः ३१ मैत्रेय उवाच इत्यनुक्रोशहृदयो भगवानाह तान् शिवः बद्धांजलीन् राज
पुत्रान्नारायणपरो वचः ३२ रुद्र उवाच जितं त आत्मविद्वर्य स्वस्तये स्वस्तिरस्तु मे भवता
राधसा राद्धं सर्वस्मा आत्मने नमः ३३

प्रीतिः कार्येत्याशयेनाह मद्भागवतानां च प्रेयान्नास्ति ३० अत इदं जप्यं श्रूयतामिति विविक्तम
संकीर्णं यथा भवति ३१ स्वयमाद्ये बद्धांजलिभ्यः प्रोक्तमिदं स्तोत्रं प्राह प्रचेतोभ्यः कृपया भग
वान् शिवः ते जितं तव उत्कर्षः आत्मविद्वर्याणां स्वस्तये शोभनसत्तायै स्वानंदलाभायेत्यर्थः अतो मे स
स्तिः स्वानंदसत्तास्तु ननु ममोत्कर्षो मदधीन एव किं न स्यात् तत्राह भवता राधसा स्वानंदरूपेणाराधं सिद्धं
तं परमानंदरूपेणैव निमिस्थितं इत्यर्थः अत एवं भूताय आत्मने तुभ्यं नमः सर्वस्मै सर्वरूपाय च ३३ ॥ ॥

श्री॰
भा॰ वे॰
टी॰
८॰

सर्वरूपत्वंप्रपंचयतिप्रणामितिसार्द्धैर्द्वादशभिः पंकजंलोकात्मकंनाभौयस्यतस्मैकारणात्मनेनमः कार
णत्वादेवसूक्ष्माणांप्राणानांयेउपाधयः भूतानिसूक्ष्माणितन्मात्राणिइंद्रियाणिचतेषामात्मनेनियंत्रे
अंतः करणचतुष्टयाधिष्ठातृत्वेनप्रणामितिचतुर्भिः श्लोकार्धैः वासुदेवायचित्ताधिष्ठात्रेकूटस्थाय
निर्विकारायचित्तस्यैकरूपत्वात् ३४ संकर्षणायअहंकाराधिष्ठात्रेसूक्ष्माय अव्यक्तायदुरंताय अंत
कायमुखाग्निनालोकदाहकायविश्वस्यप्रबोधोयस्मात् अंतरात्मनेबुद्ध्यधिष्ठात्रे ३५ हृषीका
णामिंद्रियाणामीशायदिंद्रियमनः तदात्मनेसर्वरूपेणप्रणमति परमहंसायपूर्णायतेजसावि

नमः पंकजनाभायभूतसूक्ष्मेंद्रियात्मने वासुदेवायशांतायकूटस्थायस्वरोचिषे ३४ सं
कर्षणायसूक्ष्मायदुरंतायांतकायच नमोविश्वप्रबोधायप्रद्युम्नायांतरात्मने ३५ नमोनमोनि
रुद्धायहृषीकेशेंद्रियात्मने नमः परमहंसायपूर्णायनिभृतात्मने ३६ स्वर्गापवर्गद्वारा
यनित्यंशुचिषदेनमः नमोहिरण्यवीर्यायचातुर्होत्रायतंतवे ३७ नमऊर्जइषेत्रय्याः
पतयेयज्ञरेतसे तृप्तिदायचजीवानांनमः सर्वरसात्मने ३८ ॥ ॥

श्चव्यापिनेनिभृतात्मनेतदयह्यद्विश्रुत्याय ३६ स्वर्गापवर्गद्वारायच शुचिनित्यंतः करणेषीदतीतितस्मैहं
सः शुचिषदितिश्रुतेः हिरण्यंवीर्यंयस्यतस्मैअग्निरूपायचातुर्होत्रंकर्मतस्मैतत्साधनायेत्यर्थः ज्ञतः
नेनवेनद्विस्तारकाय ३७ सोमत्वमाहऊर्जेपितृणामन्नाय इषेदेवानामन्नाययज्ञरेतसेसोमाय सा
हिपितृणांदेवानांचान्नं पदंरूपायत्रय्याः पतयेहृदयेनमः सूर्याग्निसोमत्वेनैवतेजस्त्वमुक्तं ३८ ज्व
लनमहसर्वसात्मनेजलरूपाय ३८ ॥

राम॰
८९

एवंनमस्कृत्यतद्दर्शनंप्रार्थयते दर्शनमितिनवभिः भागवतैः सत्कृतंदर्शनंदेहीतितत्सविवरणरूपेऽस्यादिश्य
पूर्वोयेतत्यंनेस्वानांभक्तानांप्रियतमंरूपंप्रदर्शयेतिनवमेनान्वयः सर्वेषामिंद्रियाणांयेगुणाविषयास्तेषां
मंजनंव्यंजकं सर्वेंद्रियविषयरूपेऽस्यर्थः सर्वेंद्रियाणांस्वगुणैरंजयतीतिवा ४५ स्निग्धःप्राविषियोघनः
तद्वत् श्यामं सर्वेषांसौंदर्याणांसंग्रहोयस्मिन् चारवः आयताश्चत्वारोबाहवोयस्मिन् सुजातंयथो
चितंसर्वावयवरुचिरमाननंयस्मिन् पद्मस्यकोशमध्येयानिपलाशानि तद्वदक्षिणीयस्मिन् ४७ स्फु
रत्किरीटादीनियस्मिन् उत्तमर्द्धिलक्ष्मीः यद्वापतेरुत्तमाऋद्धिः उत्कर्षोयस्यास्तितत् ४८ सिंहस्यस्क

दर्शनंनोदिदृक्षूणांदेहिभागवतार्चितं रूपंप्रियतमंस्वानांसर्वेंद्रियगुणांजनं ४४ स्नि
ग्धप्रावृड्घनश्यामंसर्वसौंदर्यसंग्रहं चार्वायतचतुर्बाहुसुजातरुचिराननं ४५ पद्मकोश
पलाशाक्षंसुंदरभ्रुसुनासिकं सुद्विजंसुकपोलास्यंसमकर्णविभूषणम् ४६ प्रीतिप्रहसिता
पांगमलकैरूपशोभितम् लसत्पंकजकिंजल्कदुकूलंमृष्टकुंडलम् ४७ स्फुरत्किरीटवलय
हारनूपुरमेखलं शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ४८ सिंहस्कंधत्विषोबिभ्र
त्सौभगग्रीवकौस्तुभं श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ४९ पूररेचकसंवि ॥
ग्नवलिवल्गुदलोदरम् प्रतिसंक्रामयद्विश्वंनाभ्यावर्तगभीरया ५० ॥

धेमस्त्विः प्रसरतः केसराएवत्विषः ताहशीः सर्वतस्त्विषोबिभ्रच्चासौसौभगग्रीवः कौस्तुभोयस्मिन्
यद्वासिंहस्यवयोस्कंधोनयोस्त्विषः कुंडलहारादिदीप्तीर्बिभ्रदितिदृष्टयग्विशेषणंसौभगयुक्ताग्रीवा
येनसकौस्तुभोयस्मिन् श्रियाहेतुभूतयात्विमः निरस्तानिकषाश्मास्वर्णरेखांकितोनिकषपाषा
णोयेनतादृशेनोरसाउल्लसत्शोभमाने ४९ पूररेचकाभ्यांश्वासोच्छ्वासाभ्यांसंविग्नाश्चंचलावलय
स्ताभिर्वल्गुदलवदश्वत्थपत्रसदृशमुदरंयस्मिन् प्रतिसंक्रामयत् यतोनिर्गतंविश्वंतेनैवद्वारेणपुनःप्रवे

रुद्रगी ७

श्री॰
भा॰ च॰
टी॰

प्रयामश्रोणिपथिवं रोचिष्णुपत्रनं दुकूलं तत्र स्वर्णमयी मेखला यस्मिन् अंघ्री च जंघे च ऊरू च तानि शु
द्धतराणि जानुनी च समे सुष्ठु आरूढाभिरेतैः शोभनं दर्शनं यस्य समासप्राख्या श्चादयो यस्मिन् निम्नजानुनेय
स्मिन् शोभनं दर्शनं यस्येति पदत्रयं वा ५१ पदानि यस्यातिशयेन यद्वा एवंभूतेन पदोपलक्षितेन रू
पेण परं शारण्यं प्रदर्शयेत्यर्थः शरदि यत्पद्मं तस्य पलाशं तद्वद्रोचिर्यस्य तेन नखदीप्तिभिरन्तर्भवमज्ञा
नं विधुन्वता स्वीयं रूपं पदं शारण्यं प्रदर्शयेत्यर्थः अपास्तं यस्मात्तादृशं दीनानां साध्वसं येन नत् हे गुरो यत
स्त्वमेव तमोजुषामज्ञानां मार्गप्रदर्शको गुरुः ५२ अतिदुर्लभमिदं मया प्रार्थितमिति स्तौत्येवाह

प्रयामश्रोणिपथिरोर्विम्लस्त्रगूलस्वर्णमेखलम् समन्तार्वेत्रिजंघोरुनिम्नजानुसुदर्शनम्
५१ पदाशरत्पद्मपलाशशोचिषा नखद्युभिर्नोन्तरघं विधुन्वता प्रदर्शय स्वीयमपास्त
साध्वसं पदं गुरो मार्गगुरुस्तमोजुषां ५२ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सताम् यद्भक्ति
योगोऽभयदः स्वधर्ममनुतिष्ठताम् ५३ भवान्भक्तिमता लभ्यो दुर्लभः सर्वदेहिनां स्वारा
ज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः ५४ तं दुराराध्यमाराध्य सतामपि दुरापया एका
न्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः ५५ यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते वि
श्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ५६

एतद्रूपमनुध्येयं ध्यानार्हमेव न तु प्रत्यक्षतः प्राप्यमित्यर्थः ५३ नर्हि किं केनापि नाप्यत इत्यत आ
ह भवानिति दुर्लभत्वमेवाह स्वर्गराज्यस्य स्वस्याप्यभिमतः स्पृहणीयः किं च एकान्तेन यस्य
आत्मवित् तस्यापि गतिर्गम्यः ५४ अतो भवद्व्यतिरेकेण न किंचिदाकाङ्क्षामीत्याह तं त्वामेकान्त
भक्त्याराध्य बहिः स्वर्गादिसुखं न वृहेनतः ५५ यत्र पादमूले शरणं प्रविष्टं कृतान्तः कालो मया यं
वश्य इति नाभिमानं करोति किं कुर्वन् वीर्यं प्रभावः शौर्यमुत्साहः ताभ्यां विस्फूर्जितया भ्रुवा विश्वं वि

५८ रुद्रगीता पृ॰ ५८

------- सर्वेषामज्ञानां प्राणिनां ये आत्मानस्तद्देहाय स्थवीयसे विराजदेहाय च त्रैलोक्यपालाय वा यद्वे-----
यस्मात् प्राणरूपेण त्रैलोक्यं पालयति महत् आदि धर्माय च ३९ नभसे आकाशाय अर्चीनां लिंगाय स्तायकाय-----
तान् अंतर्बहिरात्मने अंतर्बहिर्व्यवहारालंब----एवं महाभूतरूपत्वमुक्तं अमुष्मै स्वर्गीयभूरिवर्चसे यद्वै ज्योतिष्मंते
पुण्यलोकं यान्तीतिश्रुतेः ४० प्रवृत्ताय निवृत्ताय च कर्मणे पितृदेवाय यथाक्रमं पितृदेवप्राप्तिफलरूपाय च अधर्मफ

सर्वभूतात्मदेहाय विशेषाय स्थवीयसे नमस्त्रैलोक्यपालाय सहओजोबलाय च ३९ अर्थलिंगाय नभ
से नमोंतर्बहिरात्मने नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ४० प्रवृत्ताय निवृत्ताय पितृदेवाय क
र्मणे नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च ४१ नमस्ते आशिषामीश मनवे कारणात्मने नमो धर्मा
य बृहते कृष्णायाकुंठमेधसे ४२ पुरुषाय पुराणाय सांख्ययोगेश्वराय च ४३ शक्तित्रयसमेताय मीढुषे
हंकृतात्मने चेतिआकूतिरूपाय नमो वाचो वि
भूतये ४४

लरूपाय च मृत्यवे ४१ हे ईश आशिषां कारणात्मने सर्वकर्मफलदाय मनवे सर्वज्ञाय मंत्रात्मकाय ये निवा विसुतेनम
णामनि बृहते धर्माय परमात्मने कृष्णाय ४२ रुद्ररूपेण प्रणमति मीढुषे सर्वज्ञाय मंत्रात्मकाय निवाजुषे रुद्राय
अहंकृते अहंकारः तदात्मने सर्वकर्तृकरणकर्मशक्तित्रयसमेत स्तस्मै ब्रह्मत्वेन प्रणमति चेतिर्लीनं आकूतिः क्रियात
द्रूपाय वाचो विविधा-- सृष्टिर्यस्मात्तस्मै ४४

तस्मादस्मत्प्रविष्टस्य कृतोन भयाभावः किं यानयं लाभः तदेवाह त्वद्भक्तसंगएव सकलपुरुषार्थश्रेणीशिर-
सि वर्ततीत्याह क्षणार्धेनेति भगवतस्तव संगिनां संगस्य क्षणार्धेनापि स्वर्गं न तुलये समं न गणयामि न वा
पुनर्भवं मोक्षं मर्त्यानामाशिषो राज्याद्याः किमुत ५७ अथ अनघांघ्रेर्हेतोर्हेतोः अनघावघहरावंघ्री यस्य तस्य तव कीर्ति-
यशः तीर्थं गंगा च तयोः क्रमेणान्तर्बहिः स्नानाभ्यां विधूतः पाप्मा तेषां अत एव भूतेष्वनुक्रोशः कृपा सुसत्वं च
रागादिरहितं चित्तं शीलं चार्जवादि विद्यते येषां तेषां संगमोऽस्माकं स्यात् एवमेष नस्तवानुग्रहः ५८ नन्वस्ताने

क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ५७ अथानघां-
घ्रेस्तव कीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनां भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमो-
नुग्रह एष नस्तव ५८ न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् यद्भक्तियोगा-
नुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते गतिं ५९ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् त‥
------निराकाशमिव विस्तृतं ६० यो माययेदं पुरुरूपयासृजद्बिभर्ति भूयः क्षपयत्यविक्रियः
-------सदिवात्मदुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि ६१ ॥

वयद्भक्तिसंगादेव भवतीत्याह न यस्येति येषां सतां भक्तियोगेस्मिन गृहीतं शुद्धं स यस्य चित्तं बाह्यार्थविक्षिप्तं
न भविष्यति तमोरूपायां गुहायां च नाविशत् तस्येन प्राप------नव गतिं तत्त्वं पश्यति ५९ कीदृशं तत्त्वं तदाह
यत्रेति ६० जगत उपादानत्वेन तत्त्वं लक्षितं नि---------तथ आह यो माययेदमिति यद्इदं विश्वं सदि-
वयत्मार्यमिवासृजत् कथं भूतया यया भेद---------तया आत्मनि तवाविद्याः स्थया कयं च कतैमस्समर्थया ।
तं त्वामिस्त्रभेदं प्रतीमहि जानीम ६१ ॥

यद्यपित्वमेवंनिर्भेदंब्रह्मतथापिशक्त्यंशसंस्कारेणतद्रूपंइत्यजंतितएववेदागमतत्त्वज्ञाइत्याह क्रियाकला
पैर्यैवाययोगिनः पूजयंति तएवकोविदातत्त्वेनज्ञानात्केवलानशक्ताः तेत्रेश्वाराधनमेवकथंभूतमिदं भूतें
द्रियांतः करणैरत्वनेश्वैयदुपलक्ष्यतेनेनियंतरूपेतत् ६२ ननुभिन्नभेदेदूर्वतः सेनानकोविदानहितैर्भे
दः क्रियतेत्वयावक्तीराणेचेतनात्मकोभेदः कुतइत्याह त्वमिति अद्यस्त्वमेवसम्मायाख्याशक्तिर्यस्य
तयाशक्त्यारजः सत्त्वतमसोहेतुकं यतेरजआदेः महानहंकारः खंचमरुतएवअग्निर्वार्धराः उदकंपृथ्वीच सुरा
श्चऋषयश्चभूतगणाश्चएवमिदंजगद्यतोभवति तद्विभिद्यतइत्यन्वयः ६३ यदुपपादयतिसृष्टमिति ज

क्रियाकलापैरिदमेवयोगिनःश्रद्धान्विताःसाधुयजंतिसिद्धये भूतेंद्रियांतःकरणोपलक्ष
णंवेदेचतंत्रेचतएवकोविदाः ६२ त्वमेकआद्यःपुरुषःसुप्तशक्तिःतयारजःसत्त्वतमोविभिद्य
ते महानहंखंमरुदग्निवार्धराःसुरर्षयोभूतगणाइदंयतः ६३ सृष्टंस्वशक्त्येदमनुप्रविष्टश्च
तुर्विधंपुरमात्मांशकेन अथोविदुस्तंपुरुषंसंतमंतर्भुंक्तेहृषीकैर्मधुसारघंयः ६४ सएषलो
कानतिचंडवेगोविकर्षसित्वंखलुकालयानः भूतानिभूतैरनुमेयतत्त्वोघनावलीर्वायुरिवावि
षह्यः ६५ ॥

रायुजांडजस्वेदजोद्भिज्जरूपेणचतुर्विधंस्वांशेनप्रविष्टः अतोयोऽयमितिहेतोः अंतस्थितः संतमंशंसंवि
दाभासंपुरिशयनात्पुरुषंविदुः तद्विविमीश्वरस्येवसंसारित्वंविदुः नेत्याह सरघामधुमक्षिकास्ताभिः
सृष्टंमधुतद्वद्भक्ष्यविषयसारंयोभुंक्तेतंजीवंविदुः तथाचश्रुतिः द्वासुपर्णासयु
जासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीति तिरीणीतेव
गृहांप्रविष्टावात्मानौहिनरद्दर्शनादित्यत्र अथ तवतुसर्वनियंतुः कुतः संसारइत्याह यःस्वशक्त्याइदंसृष्टवा
न् सएषलोकान्खलुभूतैरेवभूतानिमेघपंक्तीर्वायुरिवकालयन् विकर्षस्यप्रमेयतत्त्वः ६५ ॥ ॥

श्री॰
भा॰ १२॰
टी॰
११॰

विकर्षणप्रकारमाह प्रसन्नमिति हे कृष्ण एवमेवमिदं कर्तव्यमिति चिंतयोच्चैः प्रसन्नेन तव हेतुर्विषयेषु ला
लसं प्रलितिकाम कं अमायि विषये अहं दुर्लोभं अंतकः त्वमभिपद्यसे अक्रमसि सुद्धा दृष्टा लेलिहानः जिह्व
यास्वान्नोस्य सहसा सर्पो मूषकमिव ९८ अतः कस्तव पदाङ्घ्रिं त्यजेत् पंडितश्चेत् कथंभूतः यस्त्वं वान् मा
नो नारदरस्तेन व्ययमानं नेश्वरीरं यस्य सः यदस्माकं गुरुब्रह्मा वर्तति सर्वेषां लोकानां णोवा कं विशोकयाशोक

प्रमत्तमुच्चैरिति कृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्ले
लिहानोऽहिरिवाखुमन्तकः ९८ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेऽवमानव्ययमानकेतनः
विशोकयास्मद्गुरुरर्चति स्म यद्विनोपपन्निं मनवश्चतुर्दश ९० अथ त्वमाश्रितोऽस्मन्य‥‥ त्वि
पश्चितो विश्वसृजश्च भयध्वस्तमजं तत्त्वं विद्धि यागतिः ९७ इदं जपन्तमद्वैवो विशुद्धात्मपने दन्ताः
स्वधर्मेन‥‥ हेतोभगवत्पर्यन्ताशयाः ९९ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितं पू
जयध्वं गृणतश्चैव ध्यायन्तश्चासकृद्धरिं ११ योगादेशमुपासाद्य धारयन्तो मुनिव्रताः समाहित
धियः सर्वे प्रतदभ्यसनादृताः १२ इदमाह पुरास्माकं भगवान् विश्वसृक्पतिः भृग्वादीनामात्म
जानां सिसृक्षुः संसिसृक्षतां १३ ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः अनेन ध्वस्ततमसः
सिसृक्ष्मो विविधाः प्रजाः १३ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान् अचिरा‥‥‥ श्रामो
तिवासुदेवपरायणः १४ श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परं सुखं तरति दुष्पारं ज्ञान
नौर्व्यसनार्णवं १५ ॥ ॥

यावन्नोपपन्निं इति दृढविश्वासो वर्धार्वतिस्म ९० उपसंहरन्नेव अथेति रुद्रमयेन ध्वस्तां ज्ञातानजं तत्त्वं विद्ध
येयस्यो नादर्शिनोऽतिरसि ९७ योगानामेतस्योत्तमुपासाद्य पाठतः धायमनसा धारयत अभ्यासेन जप
न ११ विषयसृजेयानि वैस्या १२ सिसृक्षवः स्रष्टवंतः १३ युक्तपकाग्रचित्तः १४ ज्ञानमेव नौर्यस्य १५ ॥ राम
११॰

योधीयानोभवति ७९ असारसुष्मादृतेः अस्तवरास्थितःरः सन्मद्गीतस्तोत्रेतेन गीतात् एकएववल्लभैःशिव
आश्रयस्तस्मात् ११ कल्येउषसि ७८ नपस्वरनतपसांतेईप्सितशमर्थः ७९ इतिश्रीभावार्थेचतुर्थे
चतुर्विंशः २४ प्रचेतसस्तपस्यत्सुनतिष्ठेनारदोनृपणी प्राचीनबर्हिषेध्यात्मपारोक्षेणाहपंचभिः
१ पुरंजनकथाख्यातात्येचविंशेतनारदः आत्मनोबुद्धिसंगेनविविधामाहसंसृतिं प्रचेतसस्तपस्तीव्रं

यइदंत्वनुद्रयायुक्तोमद्गीतंभगवस्त्ववं अधीयानोद्दगाणांहरिमाराधयत्यसो ८० विंदनेपुरु ४
षोघ्मायायदिच्छत्यसत्वरः मद्गीतगीतात्सुप्रीतात्श्रेयसासेकवल्लभात् ७० इदंयःका
ल्यउत्थायप्रांजलिःश्रद्धयान्वितः शृणुयाच्छावयेन्मर्त्योमुच्यतेकर्मबंधनैः ७८ गीतंमयेदं
नरदेवनंदनाःपरस्यपुंसःपरमात्मनःस्तवं जपंतएकाग्रधियस्तपोमहत्चरध्वमंतेततआप्स्य
थेप्सितं ७९ इतिश्रीभागवतेचतुर्थेरुद्रगीतंनामचतुर्विंशः २४ मैत्रेयउवाच इतिसंदिश्य
भगवान्बार्हिषदैरभिपूजितः पश्यतांराजपुत्राणांतत्रैवांतर्दधेहरिः १ रुद्रगीतंभगवतःस्तो
त्रंसर्वप्रचेतसः जपंतस्तेतपस्तेपुर्वर्षाणामयुतंजले २ प्राचीनबर्हिषंतत्रकर्मस्वासक्तमानसं
नारदोध्यात्मतत्त्वज्ञःकृपालुःप्रत्यबोधयत् ३ श्रेयस्त्वंकतमद्राजन्कर्मणात्मनईहसे दुःखहा
निःसुखावाप्तिःश्रेयस्तन्नेहचेष्यते ४ राजोवाच नजानामिमहाभागपरंकर्मापविद्धधीः
ब्रूहिमेविमलंज्ञानंयेनमुच्येयकर्मभिः ५ गृहेषुकूटधर्मेषुपुत्रदारधनार्थधीः नपरंविंदतेमू

नापमानेषुनारदः पुरंजनकथाकृष्टंप्राहप्राचीनबर्हिषे २ प्रचेतसस्तपः चरत्सुनारदःप्राचीनबर्हिषंबो
धितवान् अथःप्रचेतसांकथामसमाप्यैवतत्पित्रर्हितमाह प्राचीनबर्हिषमिति ३ श्रेयःफलंईहसेउक्तंसि
इहकर्मणातदभयंनेष्यतेविचारकैः परंश्रेयः मोक्षः कर्मभिरपविद्धाविक्षिप्ताधीर्यस्य ५ किंचगृहेष्वि
तिःपुत्रादिष्वेवपुरुषार्थधीर्यस्य ९ राम ॥

श्री॰
भा॰ व॰
टी॰
७१

वर्मप्राले भुवैराग्यमन्याद्यव्रस्यविद्याश्रयदेहंयोगानुभावेनयज्ञजयन्नूत अन्यद्देशदृश्यादि भोभोइतिसंज्ञापि
तान्मारिनान् ७ पतन्त्वोसपरेतेभूतसंप्रतीहेनवेशसत्कृनापीडसंस्मरेनः नतत्स्त्रायः कूटैर्लोहृयेत्रमयेः
शृंगाक्लिदंस्यौति ८ अत्रत्रसिन्नेसकटेनिस्तारकमसुमितिह्मासेकथयिष्यामि ९ नत्रजीवस्यविषयास
क्त्यासंसारः सवेषराजग्रहेणानिवर्ततइतिवक्त्रं विपर्ययगृहीतस्यसाक्षात्त्वेथयितमसक्तोराजदृष्ट्वोतमि
वाह आसीदिति पुरंजनादीन् स्वयमेवेतः पंचमेध्यायेव्याख्यास्यतितयापिस्त्रागवाहणायपयोपयो।

श्रीनारदउवाच भोभोप्रजापतेराजन्नत्पश्रुत्यश्रुत्वाथरे संज्ञापितान्जीवसंघान्निर्घृणेनस
हस्रशः ७ पनेतेसंप्रतीक्षते स्मरंतोवैशयसंतव संपरेतमयःकूटैः छिंदंत्युत्थितमन्यतः
८ अत्रतेकथयिष्येहमितिहासंपुरातनं पुरंजनस्यचरितंनिबोधगदतोमम ९ आसीत्पुरं
जनोनामराजाराजन्बृहच्छ्रवाः तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १० सोन्वे
षमाणःशरणंबभ्रामपृथिवींप्रभुः नानुरूपंयदाविंदद्भूत्सविमनाइव ११ नसाप्रुमेना
नाःसर्वाःभूतलेयावतीःपुराः कामान्कामयमानोसौतस्यतस्योपपत्तये १२ ।। ।।

गवि॰ विनि॰ विद्याव्याख्यास्यामः तत्रस्वकर्मभिः पुरंजनोजीवः नविज्ञातेनामयस्यनचविज्ञातंचेष्टितंय
स्यसईश्वरस्तस्यसखा यद्वाविज्ञातेचेष्टितेजीवस्यलरणादिलव॰॰ यस्यजीवपारतंत्र्यस्याजभवसिद्धत्वा
त् १० शरणंभोगायतनंदेहं ११ यावत्यःपुरःताः तस्यकामोपपत्तोरप्राप्तोसाधुतमेने गवादिदेहाना
महिकपारलौकिकभोगभोग्यत्वाभावात् तथाचश्रुतिः ताभ्यागांमनयन्नाअब्रुवन्नवैनोयमलमिति
ताभ्योश्वमानयन्ताअब्रुवन्नवैनोयमलमिति १२ ।। ।।

पुरं
७१

हिमवतो दक्षिणेषु सानुषु कर्मक्षेत्रे भारतवर्षे पुरं मनुष्यशरीरं लक्षितानि दृष्टानि सर्वाणि लक्षणानि यस्य
श्रवणपंगुत्वादि रहितमित्यर्थः २३ तामेव वर्णयति त्रिभिः अत्र च किंचित्किंचित्सादृश्यं भवेत् व्यक्तकथा
मेदं यो यथा प्रकारादीनि वर्णयति प्राकारो रक्षितृत्वसामर्थ्यं उद्यानानि गवाक्षाः त्वगादयः शरीरावयवाः प्रका
रादिषु पदावयवत्वेन रूपणे स्वर्णादिशृङ्गैः शिखरैः युक्तायै गृहाख्यैः संकुलामिति प्रायशः दिव्यकाणि गृहाः
शृङ्गाणि वा राजसादिस्वभावा विवक्षिताः २४ नीलादिभिः क्लृप्ता हर्म्यस्थलीयस्याः अरुणो माणिक्यस्थली
हृदये नाड्यो नीलादिभावेन रूप्यन्ते तत्तद्विषयवासनावाभोगवतीं नागानां पुरीमिव २५ सभाः सभाजस्था

स एकदा हिमवतो दक्षिणेष्वपि सानुषु ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणां २३ प्राका
रोपवनाट्टालपरिखैरक्षतोरणैः स्वर्णरौप्यायसैः शृङ्गैः संकुलां सर्वतो गृहैः २४ नीलस्फटि
कवैदूर्यमुक्तामरकतारुणैः क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव २५ सभाचत्वररथ्या
भिराक्रीडायतनापणैः चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः २६ पुर्यास्तु बाह्योपवने
दिव्यद्रुमलताकुले नदद्विहंगालिकुलकोलाहलजलाशये २७ हिमनिर्झरविप्रुष्मत्कुसु
माकरवायुना चलत्प्रवालविटपनलिनीतटसंपदि २८ ॥

ने चत्वरं चतुष्पथः रथ्या राजमार्गाः आक्रीडायतनं द्यूतादिस्थानं आपणो हट्टः चैत्यध्वजानां विश्राम
स्थानं ध्वजेषु पताकाः ताभिस्तु युक्तां अत्र च विषयतो देहबुद्धियोगेन जीवस्य देहसंबंधि इति विवक्षया वि
षयवर्गो बाह्योपवनत्वेन रूप्य विशेषान् सकुंचदनादीन् विद्रुमलताभावेन शेषः कथालेका
दः २६ बाह्योपवने प्रमदो ददर्श इति वक्ष्यमाणेनान्वयः नदद्विहंगालिकुलानां कोलाहलो येषु ते जला
शया यस्मिन् २७ हिमनिर्झराणां विप्रुषो बिंदवः तद्वता कुसुमाकरस्य वसंतस्य बोधिना वायुना चलैः प्रवा
लविटपाः शाखा यत्र येन तद्देन नलिनीनां सरसीनां तटेषु संपत्समृद्धिर्यस्मिन् २८

श्री॰
भा॰ च॰
टी॰
११

सुनाबाधेतत्कृतबाधरहिते मुनिव्रतैरहिंस्रैः आत्मानमाहूतं मन्यते यत्र १९ तत्र प्रमदोत्तमां विवीक
वर्तीवृहिदंददर्श यदृच्छयागतां नामिनितयोः सेवेयस्यदुर्निरूपत्वे दर्शयति तामत्रवर्णयति सार्धैश्चत
र्भिः दशभिर्ज्ञानकर्मेंद्रियैः एकैकशतवृत्तिशाने अनंतानांपर्वज्ञानयासौ तासां नायकैः पतिभिः स
द्वपाडोयमेवनायिकाः स्त्रियोर्येषां तैः २० पंचशीर्षाणि वृत्तयो यस्य तेनाहिना प्राणेन प्रतीहारेण पाल
केन ऋषभं भर्तारं २१ गंधर्वज्ञानादिभिरवयवैः सुनासत्वादिरूपेण समैर्विन्यस्तैरविनो
कर्णौ नाभ्यां कुंडलशोभा स्थिता २२ अन्नमयेहिमनमः इति यत्स्वमनः दत्तस्यत्यादिश्रुत्यन्तसारेणश्यामा

नानारण्यपशुव्रातैरनाबाधे मुनिव्रतैः आहूतं मन्यते यत्र पान्थः कोकिलकूजितैः १९
यदृच्छयागतां तत्र ददर्श प्रमदोत्तमां भृत्यैर्दशभिरायांतीमेकैकशतनायकैः २० पंचशी
र्षाहिना गुप्तां प्रतीहारेण सर्वतः अन्वेषमाणामृषभमप्रौढां कामरूपिणीं २१ सुनासां
सुदतीं बालां सुकपोलां वराननां समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडलश्रियं २२ पिशंगनी
वीं सुश्रोणीं श्यामां कनकमेखलां पद्भ्यां क्वणद्भ्यां चलंतीं नूपुरैर्देवतामिव २३ स्तनौ व्यं
जितकैशोरौ समवृत्तौ निरंतरौ वस्त्रांतेन निगूहंतीं व्रीडया गजगामिनीं २४ तामाह ललि
तं वीरः सव्रीडस्मितशोभनां स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा २५ का त्वं कंज
पलाशाक्षि कस्यासीह कुतः सति इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे २६ कथं नेत्रपथा

भिसत्वं रूपैः कोणावद्यापादाभ्यां तालीयकानामपुपलक्षणाहरूपवचने २३ व्यंजितकैशोरं यौवनी
पकं याभ्यां समौ वृत्तौ च २४ तामाह जितयोः सेवादोक्तैः सवेपदार्थीयप्रपागयवचेखो मूला
प्रानेयस्य कटाक्षस्य बाणस्य तेन स्पृष्टो विद्धः प्रमणोऽवर्ग्भ्रमती भ्रूः यस्या नीयायस्मिन् २५ कुतः
स्थानादिहागतासि इह सतिपुर्याः समीपस्थाभूः तामालक्ष्य किं कर्तुमिच्छसीत्यर्थः २६ नवयेन
पयायप्रवर्तितकेपकाशमहाभराहहहलन्तेनवद्यमाणियभ्रदशस्तेनवृद्धेर्मनसः पृष्टुग्रणादाने

त्वं ह्रीः किं पतिं धर्मं विचिन्वतीश्च यथा भवानी पतिं शिवं विचिन्वती किं वा क। सरस्वतीव ह्यास्यां विरमापतिं वि
सं शुनिरिव सेयं ना सती कथं भूते पतिं त्वं देशिका मेने वत्वत्हतयात्व देशिका मेने मन्मनः ये वशप्रापाः समस्तका
मयेनतो २८ हे वरोरु आसीमयोत्वमन्यत्र मापि न भवसि यतो भुवि स्पष्टं न हि देवताश्चवेस्याशोभति वीरवरेण्यम
यानं तत्त्वमकर्मीकथं त्वया महालेवा रोमातिवेनबाह श्रश्रुव कर्मण्याश्च द्रव्यमनत्यकर्मनतस्य पाद्ये यस्यानेन स्वतोक
मत्वेन वन्तं गात्मका माभवाभीमर्थः २९ पवे वेद्वंडं यद्यस्माद्योगेन विशिवेन विवेविडिने शिदियेमनोयस्य तमनो
भवो बाधने ग्रथ तस्माद्वन गृह्णाण सर्वी इय ज्ञावेन शेमाणास्थिते तेन विश्रमेतीयाज्ञः तया उपसृष्टः शरितः ३०

त्वं ह्रीर्भवान्यस्य घवाग्र मापतिं विचिन्वितीकिं शुनिव द्दृष्टोवने त्वदेशिकामाश्र समस्तकामश्च पद्य
कोशः पतितः करानात् २८ नासावरो धन्यतमा भुवि स्पष्टं गौरिभिमो वीरवरो गणसाके श्रहेस्यलेक
तेमद्रव्यकर्मणां लोकेपरे श्रीरिवयज्ञेडसो २९ यवेषमायो गविवेडिने इंये सर्वी इभाविसिमविश्र
मद्रुवा तयोपसृष्टो भगवत्तामनो भवः पश्चाथ ते पाञ्च गृह्णाण शोभने ३० त्वमानने सार्ध भुसला
लोचने व्याले विनीलालकहेदसहने उत्तीयमेदर्शय वल्गुवावकं यद्वीडया नाभिसमुखं शुचिस्मि
ते ३१ इत्येवं चोदने नारीं याचमानमधीरवत् शभ्भनेः ततवीरं हसती वीरमोहिनी ३२ नविदाम
वयं सम्यक् कर्तारं पुरुषर्षभ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतं ३३ इहाद्य संतमात्मानं वि
दाम न ततः परं येनेयं निर्मिता वीर पुरी शरणमात्मनः ३४ पतिः सखायः सख्यश्च नरा नार्यश्च

यद्वीडया संमुखं न भवति तदा तत्र मुत्तीय मे दर्शय शोभने भ्रुवौ यस्मिन् स्मारदेशो भनकनीति केवलोचनेयया
स्मिन् वाले विनादीर्घा येनीलाश्चलका स्तेषां हेदेन संहते वल्गुनि वाचकानि यस्मिन् ३१ हे वीर स्मापिते इति
मोहिनी सतीतमाह यत्सृष्टं कस्यासीत् पनेन कस्य पुरी गोत्र जेति का त्वमिति च किं नामासीतितत्राह आत्मनो
मम परस्यापि कर्तारं सम्यक् न विद्मः गोत्रं नाम च यत्कृतं भवति तेच न विद्मः ३३ आत्मनो मम शरणमियं पुरीये
न निर्मिता न वेन विद्मः ३४ यत्सृष्टं कर्पते तत्र पथ्या इति तत्राहयन इति ३५ ॥

श्री॰
भा॰ चं॰
टी॰
७१

ग्रास्तां नाम यो ग्राहियहत्वागतो हि सपत्नहिंसोनावन् भद्रं ग्राम्यान् इंद्रियग्राम्यान् उद्वहिष्यामि संपाद
यिष्यामि स्वबंधुभिः सखीभिस्सु ३९ समाः संवत्सरान् मनुष्यदेहप्रवेशात् ज्ञानमित्युक्तं ४० अरतिज्ञ
भावत्वाच्चिरंनिर्निंद्राप्पूर्वकं तत्संयमपिनेदतिपंचभिः त्वत्तोन्यं कं रमये अरतिज्ञेनोपिका अकोविद
अनिषद्धिस्तवत्यागेन संपरायोऽमृत्युस्तदभिमुखं ते परलोकचिंताशून्य अश्वस्तनविदं वः इदं कर्तव्यमिति
लोकचिंताशून्यं पशुतुल्यं ४० अत्र गार्हस्थ्यं प्रजानंदः पुत्रलाभप्रभृतिमोदः केवलिनाशुनयः ४१

दिष्ट्यागतोसि भद्रं ते ग्राम्यान्कामानभीप्ससे उद्वहिष्यामि तांस्तेहं स्वबंधुभिररिंदम ३९
इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो मयोपनीतान्गृह्णानः कामभोगान् शतं समाः ४०
कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदं असंपरायाभिमुखमश्वस्तनविदं पशुं ४१ धर्मोह्य
त्रार्थकामौ च प्रजानंदोमृतं यशः लोका विशोका विरजा यान्न केवलिनो विदुः ४२ पितृदेव
र्षिमर्त्यानां भूतानामात्मनश्च ह क्षेम्यं वदंति शरणं भवेस्मिन्यद्गृहाश्रमः ४३ का नाम वीर
विख्यातं वदान्यं प्रियदर्शनं न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिं ४४ कस्या मनस्ते भुवि
भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज योनाथवर्गाधिमलं घृणोद्धतस्मितावलोके
न चरत्यपोहितुं ४५ श्रीनारद उवाच इति तौ दंपती तत्र समुद्य समयं मिथः तां प्रविश्य पुरीं
राजन्मुमुदाते शतं समाः ४६ उपगीयमानो ललितं तत्र तत्राथ गायकैः क्रीडन्परिवृतः स्त्रीभि
र्ह्रदिनीमाविशच्छुचौ ४७

गृहाश्रम इति सपत्न्मोद्वेमाहेशरणमाह इति ४४ भोगिभोगयोः सर्पदेहाकारयोस्तव भुजयोर्यत्र सज्जे
त एवंभूतं कस्याः स्त्रियः मनः स्यात् न कस्या अपि यो भवान् अनाथवर्गाः दीनास्तेषामाधिमलं
अत्यर्थं अपोहितुं सर्वत्र चरति केनापोहितुं घृणया उद्धतः अतिशयितो यः स्मितपूर्वकेवलोकस्तेन ४५ स
मुद्य समयं कृत्वा समाः संवत्सरान् ४६ तत्र तत्र देहस्य संदेहेनाह उपगीयमान इति सुषुप्त्यवस्थामाह ह्र

द्रिमीः दयाकां फ्रंसापस्यानंसुचौनिराबे ४४

इदानींनवद्वारपुरदर्शनपूर्वक जाग्रदवस्थांदर्शयति सप्तेतियावदध्यायसमाप्तिस्तस्याः पुरउपरिस्थिताद्वा
राः सप्तइतिपाठेसेवनाः नेत्रनासिकेश्रोत्रमुखंचेतिसप्त अधोद्वेद्वारेगुदलिंगेयः कश्चनेत्यात्मनः
सम्यगविज्ञानादितियन्तत्वाच्च ४५ तासुसप्तसुपंचद्वाराः पौरस्त्याः पूर्वदिग्भवः ४६ खद्योतनवहस्तप्रकार
णावामनेत्ररूपा आविःमुखेकटेसखंयस्याः साभाजूप्रकाशादक्षिणेनेत्रलक्षणंतस्याः दक्षिणोश्रद्धेयात्मनोवीर्य
वन्नरश्मिरात्मनः सानुभावान्वितत्रप्रकाशायिकंयएकत्वसंलग्नविभ्रंजितेरूपंपश्यमत्सरवेः वक्तुः सहितः ४७ नलना
लपात्रौम्लिकिरवाचिनौ तदाति नलिनीनालिनीवामदक्षिणनासिकेश्रद्धापिसंज्ञाभेदादेवकार्यत्वनाथिकांश
र्ववत ज्ञेये अवधूतोवात्मथितिमितेयाणाः सौरभंगंधं ४८ मुख्यामुख्यनामाम्यप्राणोभाषणेवहूदनछिद्रं

समीपस्थितनाद्वाराः पुरस्तस्यास्तदेश्यः मुख्यविषयगार्थतस्यांयः कश्चनेश्वरः ४५ पंचद्वार
स्तुपौरस्त्याद्दक्षिणेकानयोनरा पश्चिमेद्वेअमूर्घातेनामानिरूपवर्णये ४६ खद्योताविभ्राड्
वशाग्द्वारावेकत्रनिर्मिते विभ्राजितंजनयरंयातिनाभ्यांद्युमत्सरवेः ४७ नलिनीमेनालिनीवशा
ग्द्वारावेकत्रनिर्मिते अवधूतसखस्ताभ्यांविषयंयातिसौरभं ४८ मुख्यानामपुरस्तद्वास्तयापण
बहूदनौ विषयोयातिपुरस्तद्रसज्ञविपणान्वितः ४९ पितृहूर्दयपुर्यांद्वाराईदक्षिणेनपुरंजनः
राष्ट्रदक्षिणपांचालेयातिश्रुतधरान्वितः ५०

बहूदनहस्तचक्रिः पराेक्तवादत्वात रसज्ञेरसनेंद्रियविपणोवागिंद्रियंताभ्यामन्वितः ४९ दक्षिणेनचना
नीयोविकिंतदक्षिणास्योदिशीतस्मिन्नर्थे तद्विरोयमेतपस्योवायसेजयः पुवश्चतेरेणेतिश्रयसर्थः पं
चानांविषयाणांअन्यतोनवगतानांप्रकाशनायाभिरुपवालश्रास्त्रंश्रवणकालेचबालाधिकारादक्षिणक
र्णः प्रथमंप्रवर्तनेशास्त्रेचप्रथमेश्रोतव्यंकर्मकांडमितितावतासाम्यनप्रवृत्तिसंज्ञस्यकर्मकांडस्यदक्षिण
कर्णेनश्रवणमित्याते ततस्तत्प्रथमंप्रहितपितृभिराहूतः पितृलोकप्रापकंपितृयानप्रपद्यते तदनेनप्रका
कर्णेनश्रवणमित्याते ... पवेतदेपरीत्येनोत्तरः कर्णोदेवहूःनयावा
रेणपितृणामाह्वानमनेनभवतीतिपितृहूर्दक्षिणकर्णः एवंतदेपरीत्येनोत्तरः कर्णोदेवहूःतथावा
आवास्यति पितृहूर्दक्षिणः कर्णोउत्तरोदेवहूः सतः प्रवृत्तेचनिवृत्तेचशास्त्रेपंचालसंज्ञितेपितृय ५१

श्री॰ भा॰ च॰ टी॰ १४

अस्ता इंद्रियाणामास्तेषामिमा आसुरीः पश्चाद्द्वाः ग्रामके ग्रामस्य जनानां कं सुखं यस्मिन् व्यवाये दुर्मदेन ग्राम्येंद्रियेण
५२ निरृतिर्नाम गुदः मृत्युद्वारत्वात् वैशसं मलविसर्गं लुब्धकेन पायुनाम्नेन्द्रियेणोत्क्रान्तस्यात् तद्गतः श्वभ्रो लुब्धका
साम्यं ५३ अमीषामन्धौ निर्वाक् पादः पेशस्कृत् हस्तः तद्भावे यो क्रियाभावात् स्वतो ज्ञानक्रियाशू
न्यभावाच्च यद्दृष्टवतीन्द्रियवतां देहानामधिपतिः पुरंजनः त्वगिन्द्रियस्याग्निः सर्वेषु तद्भावित्वात् ५४

देवहूर्नाम पुर्या द्वा उत्तरेण पुरंजनः राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः ५१ आसुरी नाम
पश्चाद्द्वास्तया याति पुरंजनः ग्रामकं नाम विषयं दुर्मदेन समन्वितः ५२ निरृतिर्नाम पश्चाद्द्वा
स्तया याति पुरंजनः वैशसं याति विषयं लुब्धकेन समन्वितः ५३ अंधावमीषां पौराणां निर्वा
क्पेशस्कृतावुभौ अक्षण्वतामधिपतिः ताभ्यां याति करोति च ५४ स यर्ह्यंतःपुरगतो विषूची
नसमन्वितः मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवं ५५ एवं कर्मसु संसक्तः कामात्मा वंचितो
ऽबुधः महिषी यद्यदीहेत तत्तदेवान्ववर्तत ५६ क्वचित्पिबंत्यां पिबति मदिरां मदविह्वलः
अश्नंत्यां क्वचिदश्नाति जक्षत्यां सह जक्षिति ५७ क्वचिद्गायति गायंत्यां रुदत्यां रोदिति क्वचित्
क्वचिद्धसंत्यां हसति जल्पंत्यामनु जल्पति ५८ क्वचिद्धावति धावंत्यां तिष्ठंत्यामनु तिष्ठति अ
नु शेते शयानायामन्वास्ते क्वचिदासतीं ५९ क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनु पश्यति
क्वचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित् ६० क्वचिच्च शोचतीं जायामनु शोच
ति दीनवत् अनु हृष्यति हृष्यंत्यां मुदितामनु मोदते ६१

अंतः पुरं हृदयं गतः विषूचीनेन सर्वतोमुखेन मनसा मोहप्रसादहर्षास्तमःसत्त्वरजःकार्याणि जायात्म
जैः जायात्मजा इंद्रियपरिणामास्तदुद्भवं ५५ ईहेत ईहते अन्ववर्तत चकार ५६ तदेवाह क्वचिदि
ति जक्षत्यां भक्षयंत्यां ५७ आसतीं आसीनां ५९ ६० ६१ ॥

राम १४

सर्वाः प्रसंगत्वादिलक्षणाः प्रकृतिस्वभावा वंचिता यस्य सर्वया प्रकृत्या वंचित इति वा नेच्छन् अनिच्छन् क्लैब्यात्
पारवश्यात् ६२ इति श्रीभावार्थचतुर्थे पंचविंशोऽध्यायः २५ षड्विंशे मृगयाव्याजात्स्वप्नो जागरणोद्भि-
नः तदुच्छिष्टस्य योगो भोगाभ्यासस्मृतिः सा प्रपंच्यते तदेवमात्मनि उपाधिकृतो स्वप्नभावस्योक्तत्वात् इदा-
नीं स्वप्नावस्थामाह स एकदेति दशभिः महेष्वासो धन्वी कर्तृत्वभोक्तृत्वाद्यभिनिवेशो यस्य स रथमा-
रुह्य पंचप्रस्थं वनमगादिति तृतीयेनान्वयः रथं तदानीमेव विरचितं स्वप्नदेहं जाग्रद्देहस्य शान्तसंकल्पमेयभो-
गप्रवृत्तेर्नेतृत्वात् पंचज्ञानेंद्रियाण्यश्वा यस्य आशुगं शीघ्रगतिं द्वे ईषे अहंताममते ईषे द्वे इवे यस्य द्वे पुण्य-
पापे चक्रे यस्य एकं प्रधानमक्षो यस्य त्रयो गुणा वेणवो ध्वजा यस्य पंच प्राणा बंधुराणि बंधनानि यस्य १ एको

हेषाः

विप्रलब्धो महिष्यैवं सर्वप्रकृतिवंचितः नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ६२ इति
श्रीभागवते चतुर्थे पुरंजनोपाख्याने पंचविंशः २५ नारद उवाच स एकदा महेष्वासो रथं पंचा-
श्वमाशुगं द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरं १ एकरश्म्येकदमनमेकनीडं द्विकूबरं
पंचप्रहरणं सप्तवरूथं पंचविक्रमं २ हैमोपस्करमारुह्य स्वर्णवर्माक्षयेषुधिः एकादश-
चमूनाथः पंचप्रस्थमगाद्वनं ३ ॥

मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्दमनः सूतो यस्य तं चेतनं च एकं हृदयं नीडं रथिनं उपवेशस्थानं यस्मिन्
द्वौ शोकमोहौ कूबरौ युगबंधनं यस्य पंच शब्दादयो विषया प्रक्षिप्यंते प्रक्षिप्यंते यस्मिन् अस्राणि प्रहरणानि भवि-
ष्यंति पंचेंद्रियार्थप्रक्षेपइति सप्त धातवो वरूथा आवरणानि यस्य पंच कर्मेंद्रियाणि विक्रमाग-
तिप्रकारा यस्य २ हैमोपस्करे सौवर्णाभरणा स्वर्णवर्मा वर्म कवचं रजोगुणाहंतः अक्षय्येषुधिः इषुधि-
र्निषंगः अनंतो वासनैः हंकारो येषाधिः एकादश चमूनाथः सेनापतिर्यस्य मनसः प्रग्रहत्वात् सं-
कल्पविकल्पात्मकस्य दश इंद्रियाणि नवदश मात्रा स्य चमूनाथत्वमिति विभागः पंचप्रस्थाः शब्दादयो विषया प्रस्थाः
सानवो यस्मिन् तद्वनं भजनीयं देशमगात् ३ ॥

श्री॰ आज्ञाया हीनाः स्वैरा रागद्वेषादिदृष्ट्याः कार्मुकं च भोगाद्यभिनिवेशात्तत्पर्येन जायां विवेकवतीं बुद्धिं विहाय
भा॰ च॰ अनर्हात्मानं हात्मारामे हेनः शृगानइति शृगा विषयास्तेषु असनं भोगासक्तिः तेन लालसा स्पृहा यस्य
टी॰ स बालः रागादिभिः वनेषु भजनीयदेशेषु वनचरान् भजनीयदेशविषयान् हनन् आत्मसात्कुर्वन्
१५ व्यापदेतावद्गार्हस्थ्यविहितेनैव सा अथात्मपदेशो जीवस्य विषयभोगो विहितभोगो विहितएवेत्याशंक्याह
तीर्थेष्वितित्रिभिः अयमावः नहि सर्वथा विषयविधीयते रागप्राप्तत्वात् किंतु नियमेनैव तत्र तत्र संकोच्यते
नियममेव षड्विधं दर्शयति यद्यपि सर्वथा त्यागोगीरसत्त्व नहि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिदृष्टेषु

वचारः शृगयां न तत्र हिंस्यास्तेषु कार्मुकः विहाय जायाममदहां शृगवासनलालसः ४ आ
त्मनीहत्रिमाश्रित्य यो रात्मानिरवग्रहः न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ५ तीर्थे
षु प्रतिदृष्टेषु राजा मेध्यान्पशून्वने यावदर्थमलं लुब्धो हन्यादिति नियम्यते ६ एवं का
र्मनियतं विद्वान्कुर्वीत मानवः कर्मणा तेन राजेन्द्र ज्ञानेन स न लिप्यते ७ अन्यथा कर्म कुर्वा
णो मानारूढो निबध्यते गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः ८ तत्र निर्भिन्नगात्राणां
चित्रवाजैः शिलीमुखैः विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनां ९

त्वा तेष्वेव न तु नित्यं श्राद्धादिषु तत्रापि मेध्यानेव न त्वन्यान् एवं यावदर्थं न बहून् इति
यावदपयोगमेवेति एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एवेत्यर्थः ८ अतो नावश्यं एतत्त्वमित्याह यइति एवं नियतं कर्म विद्वा
न् तेन तेन स्वपत्नदण्णेनेनान्येनवा कर्मणा वमत्राहितेन ज्ञानं भवति तेन ज्ञानेन स्वेन नासौ अज्ञानेन लिप्य
ते ७ अन्यथा नियमोल्लंघनेन स्वैरतः करणेषु अहं भावात्कर्तृत्वाभिमानमारूढः कर्मभिर्बध्यते
न च गुणप्रवाहे पतितो धो व्रजति ८ प्रासंगिकं परिसमाप्य प्रकृतं शृगयामेवानुवर्णयति तत्रेति चित्रवा
जाः पक्षा येषां तैः विप्लवो नाशः करुणात्मनां कृपालूनां दुःसहः ९ ॥ ॥ राम॰ १५

तदेवं समावस्या दर्शिता इदानीं पुनरपि विवेकवन्मातुर्व्यापारमभाणस्य पुत्रादिसंततिं प्रपंचयिष्यन् कथा
शेषं द्योतयन् तस्यात् प्रणायकूपिताया अत्र तनयनश्लोकसहितमाह ततइत्यारभ्ययावदध्यायसमाप्ति १०
गृहमेयिवान् अग्रतः कृतस्नानप्रचितग्राह्याहारस्त्रयेण संविवेशशय्यामाश्रितः ११ गृहमेधिनीसान्निकीव
आवर्तमानोतापशयन् १२ वेदिषत् हे प्राचीनबर्हिः अन्तःपुरस्त्रियः ततस्तावीः सेश्वरीणां स्वामिनीसहिता

प्राप्तान्तराहान्नाहिषानाव्यान् क्रूरशल्पकान् तेभ्यान्नन्यांश्च विविधान्निनिघ्नन् श्रममभ्यगात्
१० ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान् कृतस्नानोचिताहारः संविवेशगतक्लमः ११
आत्मानमर्हयांचक्रे धूपालेपस्रगादिभिः साध्वलंकृतसर्वांगो महिष्यामादधे मनः १२ तृप्तो हृ
ष्टः सुदृप्तश्च कंदर्पाकृष्टमानसः नव्यचष्टवरारोहां गृहिणीं गृहमेधिनीं १३ अन्तःपुरस्त्रि
योऽपृच्छद्विमना इव वेदिषत् अपि वः कुशलं रामाः सेश्वरीणां यथापुरा १४ नतथैतर्हि रोचंते गृ
हेषु गृहसंपदः १४ यदि न स्याद्गृहे माता पत्नी वा पतिदेवता व्यंगे रथ इव प्राज्ञः को नामासी
त दीनवत् १५ क्ववर्तते सा ललना मज्जंतं व्यसनार्णवे या मामुद्धरते प्रज्ञां दीपयंती पदे प
दे १६ रामा ऊचुः नरनाथ न जानीमः त्वत्प्रिया यद्व्यवस्यति भूतले निरवस्तारे शयानां प
श्य शत्रुहन् १७ पुरंजनः स्वमहिषीं निरीक्ष्यावधुतां भुवि तत्संगोन्मथितज्ञानो वैक्लव्यं पर
मं ययौ १८ सांत्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता प्रेयस्याः प्रेमसंरंभलिंगमात्मनि ना
भ्यगात् १९ ॥

नायथापुरा इत्यादि प्रश्नवाक्यं १४ व्यंगे चक्रादिरहिते १५ निरवस्तारे आस्तरे आस्तरणरहिते
१७ वैक्लव्यं नाम कन्दे हान्दरं तत्संगेनोन्मथितं व्याकुलं ज्ञानं यस्य १८ प्रेमसंरंभः
प्रणयकोपस्तल्लिंगं कुटिलदृष्ट्यादि स्वस्मिन्न लब्धवान् १९

श्री॰ भा॰ द॰ टी॰ १९

उत्संगमारोप्यलालितो २० कृतनमार्गिश्रयपथोयैः नैष्काल्म्यसात्कृत्वायुग्मस्य दधीनोयमितिसह्यापिंडार्थरंदृढ्न
कुर्वंति नेप्सत्पामंदभाग्याः २१ यतः परमोनुग्रहोदंडोयस्त्वदंडितोविषीदतिसोत्तदृप्याह बालइति वेभ्य
कृतंपिंडाकरणेअमर्षणः क्रोधीः २२ हेसदंतिहेसभ्रु हेमनस्विनि साम्प्रमस्माकंस्वामिनीस्तनः स्वानां
स्वाद्यत्रदर्शयकीदृशी ग्रन्तगाभारेणक्रीडयावयोविलिविः मेघरनानेविलसत्र हसितावलोकायस्मिन्
नीलाग्रलकाएबालकैः यः नेरुपस्कृतंशुषिते उन्नतनासिकेवल्गुवाक्यंयस्मिस्तत् २३ हेवीरपत्नि वीरस्पम
मभार्येयसत्कृताः परायः तस्मिन्नहं ब्रह्मलाकेलादताव ग्रन्यास्मिन्नपरिश्रदासादितरन्नदमेदयेदेरुवामि

प्रवातिने यशनकेवीरोत्रनयकोविदः यस्पाशपादयुगलंग्राहचोत्संगलालितो २० नूनंत्व
कृतनऽएणात्मिभृत्यायेधीश्वरः स्वभे कृतागस्त्वग्रात्मसात्कृत्वापिंडादेदेनयुज्यते २१ परमो
नुग्रहोदंडोभृत्येषु प्रभुणार्पितः बालोनवेदतान्नत्वं विधृकृत्यममर्षणः २२ सात्वंमुखं
सुदति सभ्रु प्रत्रागाभारक्रीडावलोकविलसद्धसितावलोकं नीलालकालिभिरुपस्कृत
मुन्नसंनः स्वानांप्रदर्शयमनस्विनिवल्गुवाक्यं २३ तस्मिंदधे दमम हेतववीरपत्नियोन्यत्र
भूसुरकुलात्कृतकिल्बिषस्त पश्येनवीतभयमुन्मुदितंत्रिलोकोमन्यत्रवैभ्रुरवियोरितरत्र
दासात् २४ वक्त्रंनतेवितिलकंमलिनेविहर्षसंरंभभीममविमृष्टमपेतरागं पश्येस्तनावपि
शुचोपहतौसुजातौबिंबाधरंविगतकुंकुमपंकरागं २५

किंतनं वितततमयमुद्वेपुदितंत्रिलोकामन्यत्रलोकत्रयाद्धहेरपिनपश्यामिमहत्त्यादेवासैमरिष्यतीत्यर्थः
२४ तेवक्त्रमितः पूर्वंकदापिदपि वितिलकेनपश्यामि संरंभेणकोपावेशेन भीमंभयंकरमविमृष्टमन
मलं अपेतरागंस्नेहशून्यंतथातसुजातौशोभनौस्तनौविपशोकाश्रुभिरुपहतौनपश्यामितथाविंबफ
लाकारमधरंच विगतः कुंकुमपंकतत्वासंबूलरागोयस्मात्तादृशंनपश्यामीदानींतुनपश्यजात मितिशे
षः पाठांतरएवंसुखस्तनावोवपुषुपन् शोविद्रामीत्यन्वयः विगतः कुंकुमपंचक
रागोयाभ्यामितिस्तनयोर्विशेषणे २५ ॥

रामः १९

नत्वस्मात्कृतं किल्बिषमपराध्येयेन तस्य किल्बिषमेवाह स्वैरं स्वातंत्र्येण त्वामसहन्नाश्रुगयोगात्तस्य देवो देव नेक्रीडारतिं तदानीं नि देवरः कोन्तः वामवेगेन विस्वस्तं गतेयोस्तेयोरुषं यैयैयैयस्यते उशतीकामयमा नाहत्यैक तेयोगे गूर्थेकान भजेन २८ इति श्रीभावार्थचन्द्रिषड्विंशः २६ सम्यविंशेश्रियाभुत्वास त्वागाविस्मृतात्मनः कालकन्याद्युपाख्यानैर्जरारोगाद्युदीर्यते तद्वैजीवस्यात्तनयादिकथासोहर्येणाय स्येन उपाधिवृत्त्यन्तभूतया तत्रिमिताः संसारपरंपरां निरूपयितुमाह इत्यमिति ग्रन्थशनि पदेकर्थविद्या त्मपदेविवयोजयितं शाक्यमेव श्रीनारदेन तु जीवस्य स्त्रीपुरुषवासनादार्व्येण विविक्तासंसक्तनिर्भवनीति

तत्वपशीदसत्वदः कृतकिल्बिषस्य स्वैरं गतस्य भृगयोवासनातुरस्य कादेवत्वं वशगतेत्र स्ममा स्वैवेगविस्वस्तयोस्तु रुपाणीनभजेनहृत्से २८ इति श्रीभागवतेवन्नर्थषड्विंशः २६ ना रद उवाच इत्थं पुरंजनं सध्यग्वशमानीयविभ्रमैः पुरंजनी महाराजरेमेरमयती पतिं १ सराज्ञा महिषीराजन्सुस्नाता रुचिराननो कृतस्वस्त्ययनोतृप्तामभ्यनंदृदुपागतो २ तयोपगूढः परिरब्धकंधरो रहाऽनुमंत्रैः रपकृष्टचेतनः नकालरंहो बुबुधेदुरत्ययं दिवानिशेतिप्रमदापरि ग्रहः ३

ना
इत्येवं वैदेवकथानां तात्पर्यं तिरदर्शितं क्वचिन्मैत्रं क्वचित्स्त्रीक्वचित्तोभयपर्मीथी देवोमनुष्यास्तिर्यग्वा यथा कर्मगुणं भवतीति वदेन्नानत्वादौ उक्तत्वेन संसृतिरध्याय त्रयेणोक्ता ततस्त्रैके माथाध्यायेन स्त्रीत्वेन संसृतिप्र दर्शयतुमपसादलब्धज्ञानेनमोदाद्दर्शनं तत्र तदेवपद्योपयोगमेव व्याख्यास्यामः स्थाबु सम्यक् विभ्र मैर्विलासैः कृतस्वस्त्ययनेमंगलेन रुजमसिदृराद्विभिर्यस्या सो २ उपगूढः परिरब्धः परिरब्धा कंधरा स्यायेन रहस्यकालेनमंत्रैः अनुकूलगुह्यभाषणैः अपकृष्टा चेतना विवेको यस्य कालरंहः प्रमदेवपरिग्र

श्री० भा० च० टी० २१

महार्हतल्पे उत्कृष्टशय्यायां शयानः महिष्याभुजउपधिः उपधानमुच्छीर्षकं यस्य अविसर्गपाठे शयनक्रि
याविशेषणं तां महिषीमेव परं श्रेष्ठं पुरुषार्थममन्यत नतु यन्निजं रूपं ब्रह्म तत् तमसाज्ञानेनाभिभूतो यतः
५ पुत्रानिंद्रियपरिणामान् दुहितॄः तदनेन बुद्धिवृत्तीः पुत्रसंख्या च बाह्यमात्राविवक्षया दुहितॄः
संख्या च पूर्वेभ्यो न्यूनत्वेन गार्हस्थ्यसौंदर्यार्थं विराडिति सम्राडायुषोर्धमित्याद्यपि कथासौंदर्यार्थमेव ६

शयानउन्नद्धमदोमहामनामहार्हतल्पेमहिषीभुजोपधिः तामेववीरोमनुतेपरंयतः तमोभि
भूतोननिजंपरंचयत् ४ तयैवंरममाणस्यकामकश्मलचेतसः क्षणार्धमिवराजेंद्रव्यतिक्रांतं
नवंवयः ५ तस्यामजनयत्पुत्रान्पुरंजन्यांपुरंजनः शतान्येकादशविराडायुषोर्धमथात्य
गात् ६ दुहितॄर्दशोत्तरशतंपितृमातृयशस्करीः शीलौदार्यगुणोपेताः पौरंजन्यःप्रजापते
७ सपंचालपतिःपुत्रान्पितृवंशविवर्धनान् दारैःसंयोजयामासदुहितॄःसदृशैर्वरैः ८ पुत्रा
णांचाभवन्पुत्राएकैकस्यशतंशतं यैर्वैपौरंजनोवंशःपंचालेषुसमेधितः ९ तेषुतद्रिक्थहारेषु
गृहकोशानुजीविषु निरूढेनममत्वेनविषयेष्वन्वबध्यत १० ईजेचक्रतुभिर्घोरैर्दीक्षितःपशु
मारकैः देवान्पितॄन्भूतपतीन्नानाकामोयथाभवान् ११ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः
आससादसवैकालोयोप्रियःप्रिययोषिताम् १२ ॥

पुरंजनकन्यात्वात्पौरंजन्यः हे प्रजापते ७ दारैः परिणामनेन संहिता हितचिंताभिः वरैः सूचितविषयभो
गैः ८ पुत्राणां पुत्राः कर्माणि पांचालेषु शब्दादिविषयेषु ९ तेषु पुत्रादिषु तेषामपि ये परिग्रहाः स्मृताः
पुत्रास्तेषु च १० ११ युक्तेषु आत्महितेषु कर्मसु अवहितः सः स वै कालः
जरासमयः १२ ॥

राम

चंडवेगः संवत्सरेण वर्त्तमानेनोपपादितः गंधर्वा दिवसाः १३ गंधर्व्यो रात्रयः नाड्यमैथुन्यो दिवसैर्मि
थुनीभूय स्थिताः सिताश्चासिताश्च शुक्लाः कृष्णपक्षीयाः परिभ्रमणेन सर्वैः कामैः सह विनिर्मितां पुरी
मपहरंति १४ प्रजागरः प्राणः १५ सप्तभिः शतैर्विंशत्याधिकैः सह १६ स्वसंबंधे स्वसंबंधि निशा
तो १७ स एव मधुभुक् [illegible] स्वपार्षदैरिंद्रियैर्नाविंदत् नालोचितवान् १८ कालस्य

चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् १३ गंधर्व्य
स्तादृशीस्तस्य मैथुन्यश्चासितासिताः परिहृत्या विलुंपंति सर्वकामविनिर्मिताम् १४ ते चंडवे
गानुचराः पुरंजनपुरीं यदा हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः १५ स सप्तभिः शतैरेको विंश
त्या च शतेन समाः पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली १६ क्षीयमाणे स्वसंबंधे एकस्मिन्बहु
भिर्युधि चिंतां परां जगामार्तः सराष्ट्रपुरबांधवः १७ स एव पुर्यां मधुभुक् पंचालेषु स्वपार्षदैः
उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भयं १८ कालस्य दुहिता काचित् त्रिलोकीं वरमिच्छ
ती पर्यटंती न बर्हिष्मन् प्रत्यनंदत केचन १९ दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा या
तुष्टा राजर्षये पूरवे [illegible] वृत्ता वरम् २० कदाचिदटमाना सा ब्रह्मलोकान्महीं गतम् वव्रे बृ
हद्व्रतं मां तु जानती काममोहिता २१ मयि संरभ्य विपुलं मदाच्छापं सुदुःसह स्थातुमर्हसि
नैकत्र मया याच्ञाविशंसिते २२

दुहिता जराभिधा न प्रत्यनंदत नैच्छत बर्हिष्मन् हे प्राचीनबर्हिः १९ पूरवे ययातिपुत्राय तेन
वृत्ता सती वरमदात् ययातिः शुक्रशापाज्जरां प्राप्य पुत्रानुवाच इमां गृह्णीतेति तान्ज्येष्ठाः चत्वारो न
जगृहुः पूरुः पुत्रस्तां जगृहे पूरुस्तां जगृहे ततो ययातिस्तस्मै राज्यं ददाविति जरैवादादित्युक्तं २० २१
ब्रह्मा ख्यातव्रतिम यि संरभ्य क्रोधं कृत्वा नैकत्र स्थातुमर्हसीति शापमदात् २२ ॥

ग्राम्यधर्मोवाधयस्सुखयवनाः तेषामीश्वरं भयनामानंवव्रे २३ हेवीरत्वामीप्सितंपतिंवृणोमि नरिष्यति नन
श्यति २४ लोकतोवेदतश्चयदुपनतंतेनग्राह्यतेनचउपनतंग्राम्यंतयाच्यमानेयोनददाति यश्चदीयमा
नंनेच्छतितंनशृण्वंतिइमौद्वौकर्मभ्रष्टौबालौअवग्रहावेतिसंतः २५ पुरुषाणांकर्तव्योधर्मः पौरुषः २६ वे
दगुह्यंमृत्युं तद्धिप्राणिनांवैराग्यायदयापरदैवंगोप्यते २७ तस्मैतवसमानोधिकारज्ञानदृष्ट्यायाच्य
मानोपिलोकः त्वांनेच्छति २८ अतोव्यक्तगतिः कुतः ग्राम्यत्वलक्षितगतिः सतीलोकमाक्रम्यभुंक्ष्व

ततोविहतसंकल्पाकन्यकायवनेश्वरं मयोपदिष्टमासाद्यवव्रेनाम्नाभयंपतिं २३ ऋषभंय
वनानांत्वांवृणेवीरेप्सितंपतिं संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति २४ द्वाविमावनु
शोचंतिबालावसदवग्रहौ यल्लोकशास्त्रोपनतंनरातिनतदिच्छति २५ अथोभजस्वमां
भद्रभजंतींमेदयांकुरु एतावान्पौरुषोधर्मोयदार्तानन्नुकंपते २६ कालकन्योदितवचोनि
शम्ययवनेश्वरः चिकीर्षुर्देवगुह्यंससस्मितंतामभाषत २७ मयानिरूपितस्तुभ्यंपतिरात्मस
माधिना नाभिनंदतिलोकोयंत्वामभद्रामसंमतां २८ त्वमव्यक्तगतिर्भुंक्ष्वलोकंकर्मविनि
र्मितं याहिमेपृतनायुक्ताप्रजानाशंप्रणेष्यसि २९ प्रज्वरोयंममभ्रातात्वंचमेभगिनीभ
वचराम्युभाभ्यांलोकेस्मिन्नव्यक्तोभीमसैनिकः ३० इतिश्रीभागवतेचतुर्थस्कंधेसप्तविंशो
ध्यायः २७ ॥

राम ॥

एवंसर्वोपिलोकस्तवपतिःस्यादित्यर्थः नचैवंत्वयाशोकनीयंमांप्रतिकृतो लोकेकृतमिथ्यातिइतिय
स्मात् त्वमेवप्रजानांशोककरिष्यसीत्याह याहीतियामदीयायवनसूतनानतयायुक्ता। २९ किंचप्रज्व
रइति मारकोवेलवीज्वरः प्रज्वरः महेश्वरस्याघातः पातित्वात् भीमाघोरा सैनिकायस्य ३०
इतिश्रीभावार्थदीपिकायांचतुर्थस्कंधेसप्तविंशोध्यायः २७ ॥ ॥

अष्टाविंशेतु वैराग्याख्यानेन स्त्रीविचिंतया । स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते इदानीं पुरंजन
स्य स्वदेहे हत्याग्रहप्रकारपूर्वकं स्त्रीत्वप्रकारमाह सैनिका इत्यादि राजसिंहस्य वेगमनीर्यनेन दिष्टं दैवं
तद्वेतीनि तथा प्रज्वारः प्रज्वराकारिणो इति वा १ जरत्पन्नगेन जीर्णप्राणेन पालितां २ ३ द्वार्भिः द्वारा
दिभिः रोगद्वारेण प्रविश्य ४ ५ कन्यया जरयोपगूढः सन् तत्प्रतिक्रियां न लेभे इति तृतीयेनान्वयः

नारद उवाच सैनिका भयनाम्नो ये बार्हिष्मन् दिष्टकारिणः प्रज्वारः कालकन्या च विचेरुर
वनीमिमां १ त एकदा तु रभसा पुरंजनपुरीं नृप रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालितां २
कालकन्यापि बुभुजे पुरंजनपुरं बलात् ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ३ त
योपभुज्यमानां वै यवनाः सर्वतोदिशं द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीं ४ तस्यां
प्रपीड्यमानायामभिमानी पुरंजनः अवापोरुविधांस्तापान् कुटुंबी ममताकुलः ५ कन्योप
गूढो नष्टश्रीः कृपणो विषयात्मकः नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ६ विशीर्णां
स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् पुत्रान् पौत्रानुगामात्यान् जायां च गतसौहृदां ७ आत्मानं
कन्यया ग्रस्तं पंचालानरिदूषितान् दुरंतचिंतामापन्नो न लेभे तत्प्रतिक्रियां ८ कामानभि
लषन्दीनो यातयामांश्च कन्यया विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ९ ॥ ॥

हृतैश्वर्यः उत्थानादिसामर्थ्यः ६ प्रतिकूलान् अपेक्षितविषयाप्रापणात् अनादृतान् आदरमकुर्वाणान्
न् स्वाधीनत्वाभावात् अनुगा इंद्रियाणि अमात्या इंद्रियदेवाः गतसौहृदां अश्रद्धां वसायाभा
वात् ७ अरिभिर्विघ्नादिभिर्दूषितान् ८ कालेकन्यया हेतुभूतया यातयामा
न् निःसारान् पि कामान् विगताध्यात्मनो गतिः पारलौकिकी ये
हिकः पुत्रादिस्नेहो यस्य स्नेहाधिनिवापाठः ९ ॥

श्री॰ भा॰ त्र॰ टी॰ १२९

सराजपुरंजनोहातुंप्रचक्रमेउपक्रांतवानितिद्वयोरन्वयः अनिकामतः अनिच्छयापि ११ सपरिच्छदःभृत्यवर्गसहितः कुटुंबवदीव्यतीतिकौटुंबिकः कुटुंबिन्याःसंधिःनेविवक्षितःसान्वयःपुत्रादिसहितः १२ यवनैरुपरुद्धान्यायतनानियस्यसप्रपालःप्राणः १३ पुरुबहुकृच्छ्रंदुःखंतेनउरुर्वेपथुर्यस्यसानलात् वृक्षकोटरादिवसर्पः १४ कंठेउपरुद्धः रुरोदउच्चध्वनिंचकार १५ दुहित्रादीन्दध्याविति त्रयेणान्वयः

गंधर्वयवनाक्रांतांकालकन्योपमर्दितां हातुंप्रचक्रमेराजातांपुरीमनकामतः १० भयनाम्नोग्रजोभ्राताप्रज्वारःप्रत्युपस्थितः ददाहतांपुरींकृत्स्नांभ्रातुःप्रियचिकीर्षया ११ तस्यांसंदह्यमानायांसपौरःसपरिच्छदः कौटुंबिकःकुटुंबिन्याउपातप्यतसान्वयः १२ यवनोपरुद्धायतनोग्रस्तायांकालकन्यया पुर्यांप्रज्वारसंसृष्टःपुरपालोन्वतप्यत १३ नशेकेसोवितुंतत्रपुरुकृच्छ्रोरुवेपथुः गंतुमैच्छत्ततोवृक्षकोटरादिवसानलात् १४ शिथिलावयवोयर्हिगंधर्वैर्हृतपौरुषः यवनैररिभीराजन्नुपरुद्धोरुरोदह १५ दुहितॄःपुत्रपौत्रांश्च जामिजामातृपार्षदान् स्वत्वावशिष्टंयत्किंचिद्गृहकोशपरिच्छदम् १६ अहंममेतिस्वीकृत्यगृहेषुकुमतिर्गृही दध्यौप्रमदयादीनोविप्रयोगउपस्थिते १७ लोकांतरंगतवतिमय्यनाथाकुटुंबिनी वर्तिष्यतेकथंत्वेषाबालकाननुशोचती १८ नमय्यनाशितेभुंक्तेनास्नातेस्नातिमत्परा मयिरुष्टेसुसंत्रस्ताभर्त्सितेयतवाग्भयात् १९ प्रबोधयतिमाविज्ञं

जामयोत्रस्त्रियः स्वत्वमात्रेणावशिष्टंभोगस्तुप्रागेवक्षीणः १८ ध्यानमेवाह अयनाशितेऽभोजिते भर्त्सितेभर्त्सनेकृतेयतवाग्भवति १९ अविवेकिनंअविज्ञंमोषितेदेशांतरस्थाने गृहमेधीयंवर्त्म गृहस्थधर्मंअपि किंनेष्यति प्रवर्तयिष्यतिप्रक्रमेतत् यतोवीरसूः प्रजवतीकिंवामद्विरहममसा मानसमभिनमिष्यतीवेत्यर्थः २० ॥ ॥

पुरं॰ १२९

नविघ्नेपरमयनमाश्रयोयेषांतेश्रवणपरायणाः पुत्राः कन्याश्चयद्वापराश्रयाःकन्याःभिन्नानीर्येषां २१ अत
दृह्णेनवत्तनन्तस्यब्रह्मत्वात् २२ पथयदावयेस्यानेनीयमानः नदाग्रतपथाः प्राणाइंद्रियाणिच न
याचन्त्याःनिः नमन्उत्क्रामेतेप्राणोनुत्क्रामतिप्राणामनुत्क्रामेतेसर्वेप्राणाश्चउत्क्रामेति २३ शहानिमहाभूतं
त्मतो २४ नाविद्ब्रसस्मारः सर्वेसत्वायसंतमीश्वरं २५ अदयात्वनाकाम्यकर्मस्वयसंज्ञमाः हताः अमी
वेपापंक्रोर्येवो २६ प्राप्तवतीःसर्महात्वबहूनुसंवत्सरान् प्रातिमनुभूय २७ अनकालेनाभार्यामेवमनसान्
गृह्णान् स्मरन् अनंतरेविदर्भस्यवेश्मनिश्रमदोन्नमावभूवअतः परस्मिन्प्रकरणेपनावदेवशहानोपि

कथंजरत्कारकादीनांदारिकाश्चापरायणाः वर्तिष्यंतेमयिमृतेभिन्नानावरुवाश्च्यौ २१ एवंह्य
पणायात्रुड्याशोवेनमनद्रहणे गृहीतेहरुनधीरेतेभयानामाभ्यपयुन २२ पशुवद्यवनैर्देव
नीयमानःस्वकंदयं अनुइवन्नगपथ्याःशोचतेनोभ्रमामात्ययः २३ उर्वीविहायोपयातउपरुद्धोप
जेगमः यदानमेवानपुरीविशीर्णोप्रह्वानिंगता २४ विहृष्यमाणःप्रसभंयवनीनबलीयसा
नाविद्ब्रमसाविष्टुःसत्वायेसत्ह्रुदंत्वरा २५ तेयत्त्वंपशवोनेनसंज्ञमायेदयात्वना कुकारैः
विकिरैः क्रुद्धैः स्मरंतोमीवमत्स्यनन् २६ अनंतपारेनमसिमग्नोनष्टस्मृतिःसमाः प्राप्तवतीर
नुभूयार्तिश्रमदासंगदूषितः २७ तामेवमनसागृह्णानवभूवश्रमदोत्तमा अनंतरंविदर्भस्या
जसिंहस्यवेश्मनि २८

विवक्षितं स्त्रीध्यानेनसीलंप्राप्नोवपिपतिव्रताध्यानेनपूर्वोक्तहेतुनचयार्मिकाविदर्भाजन्माभूत् यार्मि
कसंगेनविशुद्धस्वभागवतेनमलयध्वजेनसंयोगोभून्नमोविलः भक्तिः ततोवैराग्येणततस्त्वमेवभर्तृरूपेणरूपा
निवत्यधर्मेणभजतोभगवत्प्रसादलब्धज्ञानेनमोक्षइति अन्यत्तुकथालंकारमात्रंतथापिकिंचिद्विहृतिस्प
मानेनेहयोजयिष्यामाः विदर्भस्यविशिष्टदर्भोपलक्षितस्यकर्मठस्यराजसिंहस्यधर्मेणाहितप्रजापाल
नेनयज्ञादिनावदाचियाराजतेनेनगृहेस्यवेश्मनि २८ ॥

श्री॰
भा॰ वं॰
टी॰
८॰

मलयोपलक्षितेदक्षिणदेशध्वजइवदर्शनीयः सहिश्रीविष्णुभक्त्यातथातद्देशस्तत्रस्थः महाभा
गवतइत्यर्थः पंचापत्यान्यनिश्चयबुद्धिः नामर्हतीतिपाण्ड्यः स उपयेमेवीर्यजनोभगवतस्सेवाश्रमइत्यर्थः
२९ आत्मजाश्रीकृष्णसेवार्थविनतयोगेनभगवद्धर्मरुचिरभूदित्यर्थः अस्मिनस्यश्रीकृष्णसेवाद्दृणायया
तौ यवीयसः सप्तसुतानश्रवणकीर्तनविष्णोःस्मरणपादसेवनं अर्चनंवंदनंदास्यमितिभक्तिप्रकार
न् सख्यात्मनिवेदनयोस्तुपदार्थज्ञानोत्तरकालत्वात्तत्स्वभवनेवोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमन
न्तरैः सप्तैस्तैर्भगवद्धर्मैरुत्पन्नैःकेवलकीर्तनादिज्ञातमित्यर्थः द्रविडभूमिपालकान् द्रविडभू
मिर्हिश्रवणादिभक्तिभिःरेवसर्वाविताऽऽस्तीति प्रसिद्धेः ३॰ अर्बुदमितिश्रवणादीनांप्रत्येकमनेकप्र
कारप्रभवन्तीत्यर्थः तदुक्तंभक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यतइति येषांवंशधरैःप्रवृत्तैःस

उपयेमेवीर्यपणांवैदर्भीमलयध्वजः युधिनिर्जित्यराजन्यान्पाण्ड्यःपरपुरंजयः २९ तस्यांस
जनयांचक्रेआत्मजामसितेक्षणा यवीयसःसप्तसुतान्सप्तद्रविडभूभृतः ३॰ एकैकस्याभ
वत्तेषांराजन्नर्बुदमर्बुदं भोक्ष्यतेयद्वंशधरैर्महीमन्वंतरंपरं ३१ अगस्त्यःप्राग्दुहितरमुप
येमेधृतव्रतां यस्यांदृढच्युतोजातइध्मवाहात्मजोमुनिः ३२

प्रवाहभेदैः कृत्स्नामहीमन्वंतरंततःपरंचभोक्ष्यते अविद्याकामकर्मभ्योऽरक्षिष्यते ३१ अगस्त्यःश्रो
तानिनिष्क्रियाणिगात्राणिस्त्यापयतिसंघातयतीत्यगस्त्योमुनिः प्राक्प्रथमजातांदुहितरंकृष्णसेवार
विमुपयेमे तस्यामनः कृत्स्नेदृढंच्युतिस्तर्पयेत्यर्थः धृतानिशमदमादीनिव्रतानिययातैरतिदृढेभ्यः
सत्वलोकादिभोगेभ्योपिच्युतस्तदुक्तंहितोहिंकृष्णसेवनाविहायत्रपालभोगविरागोजातइत्यर्थः सा
एवोपशमात्मकोमुनिः कथंभूतः इध्मवाह आत्मजोयस्यसः तद्विज्ञानार्थंसगुरुमेवाभिगच्छे
त्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठमित्यादिश्रुतिप्रसिद्धासमिद्वहनोपलक्षितागुरूपसत्तिर्विरागा
दभूदित्यर्थः नह्यविरक्तस्यगुरूपसत्तिःसंभवतितथापत्ययाश्रुतमेव १२ १४८।
८॰

त्यां विभज्य तत्र श्रवणादिभक्तिभेदव्यवस्थाय ३३ इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सर्वतो विरक्तस्य
पतिरेव गुरुः स्त्रीणामिति वचनात्पतिसेवा तत्र शुश्रूषाप्रकारं दर्शयितुमाह हित्वेत्यादिना मनोरथे
इत्यनेन ग्रन्थेन मदयतीति मदिरं ईक्षणं यस्याः ३४ तत्र चन्द्रवसाद्या नद्यः तासां पुण्यैः सलिलैरुभयतो
न्तर्बहिः स्वात्मनो मलं क्षालयन् तप आस्थित इत्युत्तरेणान्वयः ३५ प्रसूनैः पुष्पैः पिप्पलैरष्टिभिर्बीजैः
३६ विद्यया उपासनया पक्वः कषायः रागादिः कामादिवासना यस्य युयुजे आत्मानं ब्रह्मतो भावयामास अक्षा
णीन्द्रियाण्यनिलः प्राणः आशयः चित्तं विजितानि प्रत्याहारयोगेन ३८ आस्ते स्म वर्षशतमिति स्था

विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः आरिराधयिषुः कृष्णं स जगाम कुलाचलं ३३ हि
त्वा गृहान्सुतान्भोगान्वैदर्भी मदिरेक्षणा अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरं ३४ तत्र
चन्द्रवसा नाम ताम्रपर्णी वटोदका तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ३५ कन्दा
ष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः वर्तमानः शनैर्गात्रकर्शनं तप आस्थितः ३६ शी
तोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये सुखदुःखे इति द्वन्द्वान्यजयत्समदर्शनः ३७ तप
सा विद्यया पक्वकषायो नियमैर्यमैः युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ३८
आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः वासुदेवे भगवति नान्यद्वेदोद्वहन् रतिं ३९
स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि विद्वान्स्वप्न इवामर्शसाक्षिणं विरराम ह ४०॥

नस्य तु साधनतां दर्शयति अत एवं भक्तिं कृतवानित्याह वासुदेवे रतिमुद्वहन् अन्यद्देहादिकं न वेद
४० स एवं वर्तमानः आत्मन्यात्मानं विद्वान् अन्यस्मात् उपरराम कथं विद्वान् व्यतिरिक्ततया देहादिव्यति
रिक्तत्वेन अतः व्यापकतया देहादिप्रकाशकत्वेन ननु देहाद्याकारो विमर्शः पुनः प्रकाशयति न तु निराका
रं आत्मानं तत्राह आमर्शस्यापि साक्षिणं अयं भावः विमर्शो नाम मनःकरणवृत्तिः सा च जडत्वात् आत्मप्रका ॥
श्यैवेति यथा स्वप्ने ममेदं शिरः किं त्विदमित्यादि प्रतीतेन तथापि विकारामात्मानमेवेक्षितवान् ४०॥

श्री॰
भा॰ व॰
टी॰
८९

केनविद्वान् तत्राह साक्षाद्धरिणैवगुरुणा तेनोक्तेन सर्वतोमुखं यथा तथा स्फुरताज्ञानविक्षिप्तेन ज्ञाने
न ४१ तदेवाह परे इति ब्रह्मण्येवाहं नसंसारीति ब्रह्मण्यात्मनः ईक्षणं शोकादिनिवृत्तिः अहमेव ब्रह्मेत्या
त्मनि ब्रह्मण ईक्षणं परोक्षत्वनिवृत्तिः अनेनाभ्यासातिहारेण अस्मात्संसारादुपरराम ननु एवमपि जीवस्य
ऊनोब्रह्मत्वापत्तिः ईक्षणस्यैव व्यवधायकत्वादित्याशंक्याह ईक्षाविहायदग्धेंधनानलवत्स्वस्थः
स्वयमेवोपशान्तेरिति भावः ४२ ४३ उपपतिं पत्युः समीपे यदा पत्युः किंचिन्मात्रेऽनूष्मता तत्समा

साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखं ४१ परे
ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि ईक्षमाणो विहायेक्षामस्मादुपरराम ह ४२ पतिं पर
मधर्मज्ञं वैदर्भी मलयध्वजं प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता ४३ चीरवासा व्रतक्षा
मा वेणीभूतशिरोरुहा बभावुपपतिं शान्ता शिखा शान्तमिवानलं ४४ अजानती प्रिय
तमं यदोपरतमंगना सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ४५ यदा नोपलभेतांघ्रा
वूष्माणं पत्युरर्चती आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ४६ आत्मानं शोचती दी
नमबन्धुं विक्लवाश्रुभिः स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ४७ उत्तिष्ठोत्तिष्ठ राजर्षे इ
मामुदधिमेखलां दस्युभ्यः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि ४८ एवं विलपन्ती बाला वि
पिनेऽनुगता पतिं पतिता पादयोर्भर्तू रुदत्यश्रूण्यवर्तयत् ४९

नास्ति समानासनीव भावित्वर्थः उपाधिकेवेति च कर्मप्रवचनीयः तद्योगे च द्वितीया शांतनमोगा स्वयमन
लस्यापशांतो शुद्धाब्न्याप यथा भवति तद्वत् ४४ तदानीमपि सुस्थिरमासनं यस्य अतएव अजानती यदात
दापूर्वं ससेव तदपस्त्वसंघ्रिमर्चयन्ती यदा तस्मिन्नंघ्रावूष्माणं नाप तदा संविग्नहृदयाभवच्चकिता ४६ अ
बंधुं पतिरहितं नमस्त्वाभिरासिच्य ४७ दस्युभ्यः अधार्मिकत्वात् बिभ्येभ्योपि ४८ अवर्तयत प्रवर्तयामा

४
स्कं
८९

नस्यांनिधायअग्निसानेनादीप्येव ५० पूर्वतरः अनादिरीश्वरः सखा ब्राह्मणः परोक्षविविक्तज्ञानैः साम्ना प्रियवाक्ये
नसंबोधयन् ५१ यस्यत्वंशोचसिएषकिंविचचर्थ मयिस्थितत्वेनसख्येनसख्यमनुभूतवानसि ५२ ननुभगवन्न
हमावयोः सख्यंसहचरत्वंचजानामीतिचेत्तत्राह अपीति हे सखे मां परमात्मानं स्वरूपं हित्वा भौमभोगरतः
स्थानमन्वेषयन् शरीरंभोगस्थानप्राप्तोगतइति विक्ष्यकथनेनतत्स्मारयति यद्यपिमांनजानासि तथाप्यात्मानंत्वाम
विज्ञातः कश्चिन्मेसखाआसीदित्येवंकिंस्मरसिसखेइति उभयत्रनिर्देशः पूर्वतनपूर्वसरणायसख्यंस्मारयन्
स्वावियोगकृतमनर्थमाह हित्वेति सार्धैःषड्भिः पदंस्थानं ५३ हंसौशुद्धौ पदितौमानसस्यहृदयस्यसरस्यअयने

चितिंदारुमयींचित्वातस्यांपत्युःकलेवरं आदीप्यचानुमरणेविलपंतीमनोदधे ५० तत्रपूर्व
तरःकश्चित्सखाब्राह्मणआत्मवान् सांत्वयन्वल्गुनासाम्नातामाहरुदतींप्रभो ५१ कात्वंकस्या
सिकोवायंशयानोयस्यशोचसि जानासिकिंसखायंमांयेनाग्रेविचचर्थह ५२ अपिस्मरसिचात्मा
नमविज्ञातसखंसखे हित्वामांपदमन्विच्छन्भौमभोगरतोगतः ५३ हंसावहंचत्वंचार्य
सखायौमानसायनौ अभूतामंतरावौकः सहस्रपरिवत्सरान् ५४ सत्वंविहायमांबंधोगतोग्रा
म्यमतिर्महीम् विचरन्पुरमद्राक्षीःकयाचिन्निर्मितंस्त्रिया ५५ पंचारामंनवद्वारमेकपालंत्रि
कोष्ठकं षट्कुलंपंचविपणंपंचप्रकृतिस्त्रीधवं ५६ पंचेंद्रियार्थाआरामाद्वारःप्राणानवप्र
भो तेजोबन्नानिकोष्ठानिकुलमिंद्रियसंग्रहः ५७ ॥

ययोः कयापहेदे मानससरसिस्थितौ पक्षिणाभूतौ जातौ ओकोगृहं अंतराविनाएव वासाश्रयएवार्थे
सहस्रपरिवत्सराम् महाप्रलयपर्यंतं हेबंधोग्राम्येसुखेमतिर्यस्यास्त्रियामायया ५५ पंचेंद्रियाण्येव
रामाउपवनानि प्रकारायस्मिन् षट् ज्ञानेंद्रियमनांसि कुलानि अभीष्टविषयसमर्पकावणिजोया
स्मिन् पंचविपणाहट्टाः कर्मेंद्रियाणि यस्मिन् पंचभूतानिप्रकृतिरूपदानकारणंयस्यस्त्रीबुद्धिरे
वनवद्वारः स्वामीयस्मिन् ५६ स्वयमेवमेवमस्त्रीवकावाबहे पंचेंद्रियार्थइति षट्कुलान्यतिषट्त्वंच एका

श्री॰
भा॰ च॰
टी॰
८२

भूतान्येव अवयवाश्चहितान्निरूपादानं यस्य स्त्रीपुंवमित्यस्य व्याख्यानं शक्तिरधीशा यस्य तद्वशाः सनित्यर्थः
५८ स्पष्टः अभिभूतः अतो न विद्यते स्मृतिर्नैव स्मात्वे स्मृतिर्यस्य ५९ ततस्तमुपदिशति नत्वमेवेति द्वा
भ्यां नवभिः स्वरूपाणि नवद्वारे यया रुद्धोसि तस्याः ६० उभयं संपूर्वजन्मनि यदमन्यथा इदानीं च सतीं स्त्रियं
स्त्रियं यन्मन्यसे यथा माया यत्तदुभयमपि वस्तुतो नास्ति यस्मादावां हंसौ शुद्धौ नौ आवयोर्वस्तुमार्गां
गतिं स्वरूपं पश्य ६१ तत्त्वंपदार्थयोरैक्यमाह अहमेव भवान् उपचारयति न चान्य इति व्यतिरेके

विद्याश्च क्रियाशक्तिर्भूतप्रकृतिरात्मना शक्त्याधीशोप्रमानन्दविशेषेणावबुध्यते ५८ न
स्मिंस्त्वं रामया स्पृष्टो रममाणोश्रुतस्मृतिः तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं विभो ५९
न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया ६० माया
ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिं ६१ अहं भवा
न्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भो न नौ पश्यंति कवयः छिद्रं जातु मनागपि ६२ यथा पुरुष आत्मान
मेकमादर्शचक्षुषोः द्विधाभूतमवेक्षेत तथैवांतरमावयोः ६३ एवं स मानसो हंसो हंसेन प्रतिबो
धितः स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिं ६४ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितं
यत्परोक्षप्रियो देवो भगवान्विश्वभावनः ६५ इति भागवते चतुर्थस्कंधे अष्टाविंशोध्यायः २८

वोपदेशः उक्ताभिप्रायः छिद्रं भेदं ६२ तर्हि कथमावयोरस्तु सर्वज्ञत्वादिधर्मभेदस्तत्राह यथेति आत्मानं
देहमादर्शे निर्मले महति स्थिरे चावेक्षेत परस्य चक्षुषि च तद्विपरीते विद्याविद्योपाधिकृतो धर्मभेद इत्यर्थः ६३
तद्व्यभिचारेण ईश्वरवियोगेन ६४ कथामात्रमिति बुद्धिं वारयति बर्हिष्मन्निति पारोक्ष्येण राजकथाभिधानेन तत्र
हेतुः यद्यस्मात् ६५ इति भावार्थदीपिकायां चतुर्थस्कंधे
अष्टाविंशोध्यायः २८

उनविशेषपरोद्वार्थव्याख्यानेनोपसंहृतं स्त्रीसंगेनोभवस्त्वांशसंगान्मुक्तिरितिसारं कवयः सूक्ष्मात्मविदः
१ व्यनक्ति लिंगनिचेतनीकरोतीत्यर्थः यद्वा व्यनक्ति प्रकटयति ततस्सुस्वकर्मणा पुरं जनयतीति पुरंजनः
इंद्रियव्याख्यानेभवतिएकद्व्यादयः पदायस्य २ अविज्ञातशब्देनाहृतः व्याहृतः उक्तोयः सईश्वरः अविज्ञात
नामनिरुक्तिः यद्यस्मात् पुम्भिर्नामादियोगेवननविज्ञायते ३ नवनेत्रपुरेषुमध्ये ४ अक्षिभिरिंद्रियैः

प्राचीनबर्हिरुवाच भगवंस्तेवचोस्माभिर्नसम्यगवगम्यते कवयस्तद्विजानंतिनवयंकर्ममोहि
ताः १ नारदउवाच पुरुषंपुरंजनंविद्याद्यद्व्यनक्त्यात्मनःपुरं एकद्वित्रिचतुष्पादंबहुपादम
पादकं २ योविज्ञाताहृतस्तस्यपुरुषस्यसखेश्वरः यन्नविज्ञायतेपुंभिर्नामभिर्वाक्रियागुणैः
३ यदाजिघृक्षन्पुरुषःकार्त्स्न्येनप्रकृतेर्गुणान् नवद्वारंद्विहस्तांघ्रितत्रामनुतसाध्विति ४
बुद्धिंतुप्रमदांविद्यान्ममाहमितियत्कृतं यामधिष्ठायदेहेस्मिंपुमान्भुंक्तेक्षभिर्गुणान् ५ सखा
यइंद्रियगणाज्ञानंकर्मचयत्कृतं सख्यस्तद्वृत्तयःप्राणःपंचवृत्तिर्यथोरगः ६ बृहद्बलंमनो
विद्यादुभयेंद्रियनायकं पंचालाःपंचविषयायन्मध्येनवखंपुरं ७ अक्षिणीनासिकेकर्णौ
मुखंशिश्नगुदाविति द्वेद्वेद्वारौबहिर्यातियस्तदिंद्रियसंयुतः ८ अक्षिणीनासिकेआस्यमि
तिपंचपुरःकृताः दक्षिणादक्षिणःकर्णउत्तराचोत्तरःस्मृतः ९ पश्चिमेइत्यधोद्वारौगुदं
शिश्नमिहोच्यते ९

५ पंचवृत्तिर्यथापंचशिरः सर्पइवप्राणः ६ एकादशमहाभटाइत्यनेनैकादशोमहाभटोनायकइत्यु
क्तंसंदर्शयतिबृहद्बलेयुस्यतन्मनः नवखानिद्वाराणियस्य ७ अक्षमत्स्यवइत्यादेरर्थंसंक्षेपेणाह यस्ता
दिंद्रियसंयुतः सत्यात्मनाभिद्वाभिर्वैबहिर्यातीति ८ पु
रोभागेकृताः ९ ॥

श्री॰
भा॰च॰
टी॰
८३

नेत्रे इति रूपमिति च द्वयोरेव द्वयोर्नलादीनां व्याख्यानं शेषोऽनुवादः ईश्वरः पुरंजनः १० नासे इति व्याख्यात्र वधूतो नलिनीत्यवधूतो वात्र स्तब्धात्मकेनोच्छासेन सहैकस्थानत्वात् घ्राणोऽवधूतः आस्यमिति व्याख्या रसज्ञवि पणो लिंगत्रयं रसज्ञशब्दो लिंगं दृश्यं रसविद्वदनुवादः रस इति व्याख्या रसनेंद्रियमित्यर्थः विपणो वाग्रसवि द् रस इत्येव पाठः आर्षत्वान्न दोषः ११ अर्थः अत्र १२ १३ ग्रामवत्मित्यस्यानुवादः ग्रामिणां रतिः तस्य व्याख्यानमवाय इति १४ विषूचीनपदार्थोऽनुवादो विषूचेरिति तद्गुणैर्मनोगुणैः तमः सत्त्वरजोभिः १६ महि

खद्योताविर्मुखी चाग्रे नेत्रे एकत्र निर्मिते रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः १० नलि
नी नालिनी नासे गंधः सौरभ उच्यते घ्राणोऽवधूतोऽपि मुखमास्यं विपणो वाग्रसविद्रसः ११ आपणो
व्यवहारोऽत्र चित्रमंधो बहूदनं पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः १२ प्रवृत्तं च निवृत्तं
च शास्त्रं पंचालसंज्ञितं पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् १३ आसुरी मेढ्रमर्वाक्
द्वार्व्यवायो ग्रामिणां रतिः उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते १४ वैशसं नरकं पायुर्लु
ब्धकोऽन्धौ तु मे शृणु हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च १५ अंतःपुरं च हृदयं वि
षूचिर्मन उच्यते तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः १६ यथा यथा विक्रियते गुणाक्तो विक
रोति वा तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते १७ देहो रथस्त्विंद्रियाश्वः संवत्सररयोऽगतिः
द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः १८

षी यद्यपि रहितेनास्यादेरर्थसंगृह्याह यथा बुद्धिः स्वयं विक्रियते जाग्रति विकरोति वा इंद्रियाणि परिणमयति तत्र
साक्षी तद्गुणैरनुकारितः आत्मा तथा तस्याहंवृत्तीः दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सन् बलादनुकार्यते १७
आत्मा पुनामित्येतद्व्याचष्टे संवत्सरस्याप्रतिहतो रयो वेगः प्रतीतोऽस्य संवत्सररयः वस्तुतस्त्वगतिः स्वमही
रादेवरूपाद्वैवविहंकृतेन देशांतरगमनाभावात् पाठांतरे संवत्सररयस्तत्त्वतः तेन वचनाभोगतिर्यस्येति दीर्घसि
त्स्य व्याख्यानांतरेण नहेत्वादिचक्रमित्यस्य व्याख्या द्विकर्मचक्र इति त्रिगुणध्वज इति चिन्तयेन्दस्य व्याख्या १८

गुम॰
चै

पंचप्रहरणामित्येतद्व्याचष्टे पंचेंद्रियार्थप्रक्षेप इति १९ पंचेंद्रियैः सूनाविनोदमित्यायेन विषयसेवां करो
तीति पंचसूनाविनोदकृत् अनेन च चारमृगयेति चेत्यादि व्याख्यातं २० परिक्रांत्या परिभ्रमणेन २१ भगि
नीत्वेन जगृहे लोकानां क्षयाय २२ चराः सेवाविशेषाः भूतानामुपसर्गे पीडया आशु शीघ्रं रंहो रयो वे
गो यस्य प्रज्वरस्येति यश्चाह व्याख्या पाठांतरे हेतुन हृताशयः अनेन च अरिभिरुपरुद्धस्यापि पदं व्याख्यातं द्वि

मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूवरः पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः १९ आकूति
र्विक्रमो बाह्यो मृगतृष्णां प्रधावति एकादशेंद्रियचमूः पंचसूनाविनोदकृत् २० संवत्सरश्चं
डवेगः कालो येनोपलक्षितः तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः स्मृताः २१ हरंत्यायुः परिक्रां
त्या षष्ट्युत्तरशतत्रयं २१ कालकन्या जरा साक्षाल्लोकस्तां नाभिनंदति स्वसारं जगृहे मृत्युः क्ष
याय यवनेश्वरः २२ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः भूतोपसर्गाशुरयः प्रज्वारो द्वि
विधो ज्वरः २३ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः
२४ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः शेते कामलवान्ध्यायन्ममाहमिति कर्मकृ
त् २५ यदात्मानमविज्ञाय भगवंतं परं गुरुं पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् २६

द्विविधः शीतोष्णरूपेणावेशभेदात् २३ एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वकथायास्तात्पर्यमाह एव
मित्यादि विरसक्रमेणोक्तेनेन आधिदैवः स्वादिभिः क्लिश्यमानो ममाहमिति देहे शतं वर्षाणि शेते वर्षा
णीशेते वर्तत इति द्वयोरन्वयः २४ अशनपिपासादीन्प्राणधर्मान् अंधत्वादीन् इंद्रियधर्मान् कामादी
न्मनोधर्मांश्च निर्गुणोप्यात्मन्यध्यस्य कामलवान्विषयलेशान्ध्यायन्कर्मकृत् २५ ततः किमत ॥
आह यदेति द्वाभ्यां स्वदृक् स्वप्रकाशस्वभावोपि २६ ॥

श्री॰
भा॰ ए॰
टी॰
८४

शुक्लं सात्त्विकं कृष्णं तामसं लोहितं राजसं यथाकर्म तथा जायते २७ तदेवाह शुक्लादिति द्वाभ्यां प्रकाशो भूयिष्ठो
येषु दुःखमुदर्क उत्तरे फले येषु क्रियया आयासो येषु तान् लोहितान् तमः शोकोऽनुत्कटो येषु तान् कृष्णा
दिति शेषः २८ नोभयं न पुंस्त्वं स्त्रीत्वं यथाकर्म गुणं कर्मगुणानतिक्रम्य २९ तेषु दैववशेन स्वं दुःखं प्राप्नो
तीति सदृष्टान्तमाह द्वाभ्यां क्षुत्परीतो व्याप्तः सारमेयः श्वा दण्डं दण्डेन ताडनं ३० कामं वा मय आशयो यस्य
३१ ननु तर्हि स्वदुःखस्य संभवान् दुःखस्य च प्रतीकारसंभवान्नैकान्ततो हेयत्वं तत्राह दुःखेष्विति दुःखस्य प्रती

गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते २७ शु
क्लात्प्रकाशभूयिष्ठांल्लोकानाप्नोति कर्हिचित् दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्
क्वचित् २८ क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भ
वः २९ क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहं चरन्विन्दति यद्दिष्टं दण्डमोदनमेव वा ३० त
था कामाशयो जीव उच्चावचपथा भ्रमन् उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ३१ दुःखे
ष्वेकतरेणापि दैवभूतात्महेतुषु जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ३२ यथा हि पुरुषो
भारं शिरसा गुरुमुद्वहन् तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रिया ३३ नैकान्ततः प्रतीकारः क
र्मणां कर्म केवलं द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ३४ ॥ ॥

कारः तावन्नास्ति स्याच्चेत्तस्य प्रतिक्रिया तथापि विविधदुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियो
गो नास्ति ३२ प्रतिक्रियाणामपि दुःखरूपत्वादिति सदृष्टान्तमाह यथाहीति ३३ दुःखस्य मूलभूतानि
तु कर्माणि प्रतिक्रियादिकर्मभिर्नैव निवर्तन्त इत्याह नैकान्ततः ग्रथनं स्वात्मनि केवले ज्ञानरहिते अविद्ययाउ
पसृतं प्राप्तं स्वप्ने सुप्तो विरोधाभिर्व्यानिवर्तकत्वमिति भावः अत्र दृष्टान्तः स्वप्नोऽर्थं विना यथा तेन स्वप्नम
न्तरेण प्रतिकरोतीत्यर्थः ३४ ॥ राम ॥ राम ॥

राम
८४

नतुतर्हि अज्ञानविलसितत्वेन संसृतिहेतोर्देहादेरप्यसत्वात्किं तन्निवर्तनप्रयासेनेत्यत्राह अर्थे ही
ति लिंगरूपेण उपाधिभूतेन ३५ तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह अथेति तस्मादात्मनोर्थ
भूतस्यात्मनः यतोज्ञानात्मनसोनर्थपरंपरारूपा संसृतिर्भवति तस्य व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यै
व ३६ ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकात् ज्ञानादेव न तु भक्त्या तरति शोकमात्मविदित्यादिश्रुतेस्तत्रा
ह वासुदेव इति सध्रीचीनेन समीचीनेन प्रकारेण ३७ नन्वसौ महाफलो भक्तियोगः कथं स्यात्तत्राह
सततप्रयत्नस्य कथायामासक्तस्य वर्तमानो चिरात् कस्य स्यात्तदाह शृण्वतः अधीयानस्य च ३८ ॐ

अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते मनसा लिंगरूपेण स्वप्ने विचरतो यथा ३५ अथा
त्मनोर्थभूतस्य यतोनर्थपरंपरा संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ३६ वासुदेवे भग
वति भक्तियोगः समाहितः सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ३७ सोचिरादेव राजर्षे स्या
दच्युतकथाश्रयः शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ३८ यत्र भागवता राजन्सा
धवो विशदाशयः भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ३९ तस्मिन्महन्मुखरिता म
धुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशं
त्यशनतृड्भयशोकमोहाः ४० ॥

स्यात्तदाह यत्रेति भगवतो गुणानुकथने श्रवणे च व्यग्रं सत्वरं चेतो येषां ते ३९ ननु साधुसंगं विना स्वय
मेव हरिचिंतनादिना भक्तिर्भवेदित्याशंक्याह द्वाभ्यां तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिता मधुभिच्च
रित्रमेव पीयूषं तद्देवाशिष्यत इति शेषो यासां ता असारांशरहिताः शुद्धाशुद्धवाहिन्य इत्यर्थः अवितृषः
अलं बुद्धिशून्याः संतः गाढैः कर्णैः ये ताः सरितः पिबंति सेवंते अशनशब्देन तदलाभजे अशनायाः
नात्र स्पृशंति भक्तिरसिकान्न बाधंत इत्यर्थः ४० ॥ ॥

श्री॰
भा॰ व॰
टी॰
८५

सत्संगमंतरेण स्वयमेव कथावितननादावालस्यादिना रसावेशाभावात् यद्वा निर्वाणसाधनभूतं तत्स्वभावं
नेसंभवतीत्याह एतैरिति ४१ भगवदनुग्रहमंतरेण न कस्यापि ज्ञानं संभवइति किमुतान्ये येनाहवक्त्
भिः प्रजापतिपतिर्ब्रह्मा मदंतोअहं नारदो न ते येषां ते ४३ वाचांपतयोपि तपोविद्यासमाधिभिरुपायैः
पश्यंतो विचिन्वंतोपि पश्यंतं सर्वसाक्षिणं न पश्यंति ४४ कुत इत्यत आह शब्दब्रह्मणि वेदे उरुवि
स्तीर्यस्य गच्छंतोपि पारशून्ये तस्मिन् वर्तमानः मंत्राणां लिंगैर्वज्रहस्तत्वादिरूपेण प्रकाशितदेवता

एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः न करोति हरेर्नूनं कथामृतनिधौ रतिं ४१ प्रजा
पतिपतिः साक्षाद्भगवान् गिरिशो मनुः दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ४२ मरी
चिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः ४३ अद्या
पि वाचस्पतयः तपोविद्यासमाधिभिः पश्यंतोपि न पश्यंति पश्यंतं परमेश्वरं ४४ शब्दब्र
ह्मणि दुष्पारे चरंत उरुविस्तरे मंत्रलिंगैर्व्यवच्छिन्नं भजंतो न विदुः परं ४५ यदा यमनु
गृह्णाति भगवानात्मभावितः स जहाति मतिं लोके वेदे च परिनिष्ठितां ४६ तस्मात्कर्म
सु बर्हिष्मन्नज्ञानादर्थकाशिषु मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४७ ॥ ॥

भिधानसामर्थ्यैः परिच्छिन्नमेवेंद्रादिरूपेण तत्तत्कर्मग्रहेण भजंतः परमेश्वरं न विदुः ४५ ततस्तु कोना
मतकर्माद्याग्रहं हित्वा परमेश्वरमेव भजेदत आह यदा यमनुगृह्णातीति अनुग्रहे हेतुः आत्मनि भावि
तः सन् स तदा लोके लोकव्यवहारे वेदे च कर्ममार्गे परिनिष्ठितां मतिं त्यजति ४६ अर्थकाशिषु प
रमार्थत्वेन प्रकाशमानेषु रूपार्थदृष्टिं मा कृथाः श्रोत्रस्पर्शिषु केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु यैः राम॰

ननुवेदेनस्वर्गादिसाधनत्वेनोक्तानिकर्माणीतिवेदवादिनोवदंतीतिव.यमस्यह्नवस्तस्थानमुच्यमेनेत्याह येषु
धूम्रधियोमलिनबुद्धयः सकर्मकंकर्मपरंवेदमाहुः तेअतद्विदः अवेदज्ञाः यतःतेस्वंस्वरूपंस्वंलोकमात्म
तत्वंवेदतात्पर्यगोचरंनविदुः यत्रदेवोस्ति ४८ तेनत्वमप्यहमित्याह आस्तीर्येति बृहद्वधात् बहुप
शुवधात् मानीमहायज्वाहमितिअहंकारी अतःस्तब्धः अविनीतः सन् कर्मनावैषिपरंविद्यास्तत्स्वरूपेणत्वंन
वेत्सि ४९ नारद स्वयंतत्प्रयोगवैशिष्ट्यमाह यदिति हरितोषयतीतिहरितोषं यत् तदेवकर्म ययातस्मिन् ह
रौमतिर्भवति सैवविद्या महाफलत्वात् ४९ उक्तंतत्प्रपेद्यत्वाय हरेः परमफलत्वंदर्शयन्नाह द्वाभ्यांह

स्वलोकंनविदुस्तेवैयत्रदेवोजनार्दन आहुर्धूम्रधियोवेदंसकर्मकमतद्विदः ४८ आस्तीर्यद
र्भैःप्रागग्रैःकार्त्स्न्येनक्षितिमंडलं स्तब्धोबृहद्वधान्मानीकर्मनावैषियत्परं ४९ तत्कर्महरितो
षंयत्साविद्यातन्मतिर्यया हरिर्देहभृतामात्मास्वयंप्रकृतिरीश्वरः ५० तत्पादमूलंशरणंय
तःक्षेमोनृणामिह सवैप्रियतमश्चात्मायतोनभयमण्वपि ५१ इतिवेदसवैविद्वान्योविद्वा
न्सगुरुर्हरिः प्रश्नएवंहिसंछिन्नोभवतःपुरुषर्षभ अत्रमेवदतोगुह्यंनिशामयसुनिश्चितं ५२

रिर्देहभृतामात्माईश्वरश्च नचहेतुःस्वयंस्वातंत्र्येणप्रकृतिः कारणमतस्तेषांतत्पादमूलमेवशरणम्
आश्रयः यतःयस्मिन् ५० नचतद्भजनेदुःखंभयंचेत्याह सइति इतियोवेदसएवविद्वान् सगुरुरेवहरि
स्व ५१ उक्तमुपसंहरति एवंभवतःप्रश्नःसंछिन्नःपरिहृतः तदेवमात्मनोबंधमोक्षप्रकारेणकथाद्वये
णवद्धितेपिनातिनिर्विसम्यचित्तेपुत्रानामनेप्रतीक्षमाणेसंतं तल्लक्षणमेवमाह अथप्रकंपितसकल
गार्जगृहान्निर्वासयितुंहरिणाकपमाह अत्रेतिवदतोमेवचःशृणु ५२ ॥ ॥

श्री॰
भा॰च॰
टी॰
८९

त्वङ्गमन्यंवरत्नीतितनयैमयानं अभुक्ताःसमनसाउद्यानांशरणेआश्रेयेवाहिकायांमिथितत्वामिथः
परस्परंस्त्रियासहमिलित्वानवैवरक्तमासक्तंषडंत्रयोभ्रमराः नेषांसामस्त्यानेषुलब्धोकर्णोयस्यतं परेषा
मस्माभिर्हतैः स्त्रीयानसंस्पर्शयंतीत्यस्तनुपः नानविगणायान्प्रगणापित्वालब्धकस्वबाणोनभिन्नेशृंगेशृ
यस्मिन्नेषय श्लोकंश्रव्यतेयाजयनव्याचष्टेसमनोभिः समानोधर्मःपरिणामविरमत्वेयासांस्त्रीणांमिथि
तेतसख्याख्यामिथुनीभूयस्त्रीभिः सहेतिशेषः रक्तमित्यस्यव्याख्यानास्वभिनिवेशितमनोयेन अस्म

त्वङ्वंवंसमनसांशरणेमिथित्वारक्तेषडंत्रिगणासामस्तलब्धकर्णे अग्रेहकानस्तनुपो
विगणायायोतंपृष्ठेश्रृंगेशृगयलब्धकबाणोमिन्ने ५३ समनःसमथमीणोस्त्रीणांशरणाश्र
श्रयं पुण्यमक्षरंपथवान्दृक्ष्यमेकाम्यकर्मविपाकजेकामसुखलवेजेह्योपस्यादिविवित्वते
मिथुनीभूयतदभिनिवेशितमसेषडंत्रिगणासामगीतवदतिमनोहरवनितादिजनालापो
पुष्पतितरांप्रतिपल्लोमितकर्णामग्रेहकपृष्ठवदात्मनयात्पुरंहितैर्भवतोहोराज्ञोतान्‌ कालवि
शेषानविगणयायाग्रहेषुविहरंतेहुषाः पत्रोदमकअपहृतोलब्धकतात्तीनः शरेणायमि
हपराविध्यातिनमिममात्मानमहोराजन्‌ भिन्नहृदयंद्रष्टुमर्हसीति ५४ सत्वेविपक्षस्यमृग
वेष्टितमात्मनोंनः चित्रंनियकुटुंबिकर्णीघुनीचविने जयेगनाभ्रममसक्तमष्टयगायंय
पीणाहिहेमथारणोविरमक्रमेण ५४ ॥

तुपइत्यस्यव्याख्याआपुर्हरतइति यांतमित्यस्यव्याख्याविरहेतमितिप्रतः नालिकनयाग्रहेनशरेणपरा
विध्यातिहृदादेवनाइयाति ५४ उपदेशसारमाह सइतिविचद्याविचार्य ग्रंतहेदिवित्तंकर्णायोधुनीनदी
मिववहिर्हरितिविनेनिपकंड पतत्त्वसर्वेंद्रियोपलक्षणार्थंगृहाश्रयंगृ
हाश्रमंवजहिकीदृशंआश्रसतमानात्प्रतिकानोयानिगूढ़ानितेषांगा
यावात्तेवेस्मिन्‌ जीवानांशरणामीश्वरे पवक्रमेणसर्वतोविरम ५५ ॥

राम॰

प्रश्नानंतरंप्रष्टुंपूर्वोक्तमर्थमनुवदति श्रुतमन्वीक्षितमिति अन्वीक्षितंविचारितं ब्रह्मन् हेनारद एतज्जडकर्मात्मतत्त्वंउपाध्यायामेकर्मोप
देष्टारः आचार्यास्तेनजानंति ५६ अतस्तत्कृतउपाध्यायकृतः तद्वाक्यविरोधेनात्मतत्त्वेसंभावनात् योमहान्संश
यःसंछिन्नःसंशयास्पदत्वेनकश्चित्संशयोवर्तते यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति ५७ संशयमाहद्वाभ्यां कर्माणियेन
नकरोतितमेवविहायअमुत्रलोकांतरेकर्मोपस्थापितेनान्येनदेहेनजुष्टानिउपभुक्तानिजीवोभुंक्तेअश्नोति ५८ इ
तिवादःश्रूयतेपाप्मपुण्यकृतांलोकानितिशरीरैःकर्मदोषैर्यातिस्थावरतांनरइतिमनुनाचोक्तं वेदेषुस्मृतीष्वनुभूया
निमित्तमेतच्चकर्तृभोक्तृदेहभेदे कृतनाशाकृताभ्यागमप्रसंगादसंगतमितिभावः संशयांतरमाह प्रोक्तंवेदे

राजोवाच श्रुतमन्वीक्षितंब्रह्मन्भगवान्यदभाषत नैतज्जानंत्युपाध्यायाःकिंनब्रूयुर्विदुर्यदि ५६ सं
शयोऽत्रतुमेविप्रसंछिन्नस्तत्कृतोमहान् ऋषयोपिहिमुह्यंतियत्रनेंद्रियवृत्तयः ५७ कर्माण्यारभ
तेयेनपुमानिहविहायतं अमुत्रान्येनदेहेनजुष्टानियदश्नुते ५८ इतिवेदविदांवादःश्रूयतेतत्रतत्र
ह कर्मयत्क्रियतेप्रोक्तंपरोक्षंनप्रकाशते ५९ नारदउवाच येनैवारभतेकर्मतेनैवामुत्रतत्पुमान् भुं
क्तेह्यव्यवधानेनलिंगेनमनसास्वयं ६० शयानमिममुत्सृज्यश्वसंतंपुरुषोयथा कर्मात्मन्याहि
तंभुंक्तेतादृशेनेतरेणवा ६१

क्तंकर्मक्रियतेतेनतैः तद्वानंतरदेहेऽपवर्गेतत्परोक्षंसन्नप्रकाशते अतःकर्मणोनष्टत्वात्तद्भोगेविरुद्धमितिभावः
५९ प्रथमस्यसंशयस्योत्तरंयेनैवेति अव्यवधानेनकर्तृभोक्तृदेहविच्छेदंविनास्थूलदेहनाशेपिमनःप्रधानस्यलिंगदेह
स्याविनाशान्नदोषप्रसंगइत्यर्थः ६० लिंगदेहविशिष्टस्यभोक्तृत्वंस्वप्नदृष्टांतेनस्पष्टयति शयानमिमंस्थू
लदेहंश्वसंतंजीवंतंउत्सृज्यतदभिमानंत्यक्त्वाआत्मनिमनसिसंस्काररूपेणाहितंकर्मयथाभुंक्तेतादृशेनशयान
देहसदृशेनकर्मोपस्थापितेनदेहेनवापाश्वादिदेहेनतथालोकांतरेपीतिभावः ६१

ननु भवतु नाम लिंगविशिष्टस्यानेन दृष्टांतेन भोक्तृत्वे कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते न त्वाह ममैते पुत्रादयः अहमेवैषां इति ब्रुवन् मनसा यद्यद्देहं गृह्णीयात्तत्तदेह --- सिद्धं कर्म प्रमात्र गृह्णीयात् येन कर्मणा एवमहंकारगृहीतेन पुनर्भवो भवति अन्यथा जन्मानुपपत्तेः अतो भिमेतत्कर्मनो विशिष्टस्यैव कर्तृत्वं अभिमानविषयस्य तु देहस्य पुत्रादिदेहवत् द्वारमात्रत्वमिति भावः ६२ यदुक्तं कर्मणो न दृष्टत्वाद्वामुत्र भोगः इति तत्राह यथेति उभयैर्ज्ञानकर्मेंद्रियैरिंद्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभिश्चित्तमनुमीयते सत्यपि सर्वेंद्रियविषयसंबंधे युगपज्ज्ञानानुत्पत्तेः तदुक्तमन्नपादेन युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमि

ममेति मनसा यद्यदसावहमिति ब्रुवन् । गृह्णीयात्तत्पुमान्राद्धं कर्म येन पुनर्भवः ६२ यथानुमीयते चित्तमुभयैरिंद्रियेहितैः । एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ६३ नानुभूतं क्व चानेन देहेनादृष्टमश्रुतम् । कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ६४ तेनास्य तादृशं राजंल्लिंगिनो देहसंभवं । श्रद्धत्स्वाननुभूतोर्थो न मनः स्प्रष्टुमर्हति ६५ मन एव मनुष्यस्य पूर्वरूपाणि शंसति । भविष्यतश्च भद्रं ते तथैव न भविष्यतः ६६ ॥ ॥ ॥

ति एवं चित्तवृत्तिभिः पूर्वदेहजं कर्म लक्ष्यते तासामपि युगपदनुपपत्तेः ६३ इतोपि कर्म लक्ष्यत इत्याह नानुभूतमिति द्वाभ्यां अनेन वर्तमानेन देहेन क्व वा कुत्र वा तत् अपि यत्रानुभूतं अननुभूतमनुपभुक्तं अदृष्टं वाश्रुतं च यद्रूपं यदात्मकं यादृक् च यत्प्रकारं च तत् कदाचित्स्वप्ने मनोरथादिषु आत्मनि मनसि उपलभ्यते ६४ तेन हेतुनास्य लिंगिनो वासनामयस्य जीवस्य तादृशं तदनुभवादिषूक्तं पूर्वदेहसंभवं श्रद्धत्स्वेति श्रुयेन अन्यथा तु नह्यननुभूतोर्थो मनः स्प्रष्टुं मनसि स्फुरितुमर्हति ६५ किं च मनो दृष्टमेव सर्वपराणि शुभाशुभनिमित्तानि शरीराणि ज्ञायेत इत्याह मन एवेति भद्रं ते इति सम्यग्वधानार्थमाशिषाभिनंदति भविष्यत उच्चत्वं प्राप्स्यतः न भविष्यतः नीचत्वं प्राप्स्यतो विभावीति रूपाणि शंसति मन एवौदार्यकार्पण्यादिवृत्तिभिः पूर्वमेवमेवासीत् पश्चादप्येवं भविष्यतीति ज्ञापयतीत्यर्थः ६६ ॥

ननु कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः दिवा नक्षत्राणि स्वशिरःच्छेदश्चेत्यादि तत्रा-
ह अदृष्टमिति अन्यदेशाश्रये समुद्रादिके पर्वताग्रे निशाश्रये नक्षत्रादिके दिवा अन्यांगादिक्रियाश्रये
स्वशिरःच्छेदनाश्रये निद्रादिदोषेणाहि प्रतीयते इत्यनेन बोधस्यापि निदूषणं सत्वादि निभावः
स्वप्नस्यानुभवस्य पूर्वकर्मजन्यत्वेऽसंगीकृतेऽपि विपरीतस्वप्नज्ञाने पहिकर्मणोऽज्ञानकत्वेन निद्रादो-
षावल्यमेव तेनाप्याश्रयणीयमिति भावः ९० ननु द्रष्टुरिदं कचिदात्मानमहं राजेत्यपश्यति राजा वा रा-
ष्ट्रं वा आत्मानं पश्यतीति तत्कथमसंभावितसंगच्छेत तत्राह सर्वं इति आयान्ति मात्रत्वेन सर्वसंभवेतिनयो-
त्तिचभोक्तानेतरं यदि कश्चित् अश्रमणो भवेत् तर्हि नैवं स्यात् न त्वेतदस्तीत्याह सर्वे समनसः इति
अतः सर्वेषां समनस्कत्वात् मनसि च सर्वार्थानां क्रमेण श्रवणात् नादृष्टचरः कस्यापि कश्चिदर्थो-

दृष्टमश्रुतं चात्र कचिन्मनस्युपदृश्यते यथा तथानुमेतव्यं देशकालक्रियाश्रयं ९०
सर्वं क्रमानुरोधेन मनसीन्द्रियगोचराः आयान्ति वर्गशो यान्ति सर्वे समनसो जनाः ९१
सर्वं वा निखिलं मनसि भगवत्पार्श्ववर्तिनि न मस्तुदम सीदेदयुपरज्यावभासते ९२ नाहं ममे-
तिभावोऽयं पुरुषे व्यवधीयते यावद्बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान् ९३

स्तीत्यर्थः ९१ ननु एवं सर्वेऽपि सर्वे अर्थाः क्रमेणानुदृश्यन्त इत्युक्तं इदानीं युगपदपि सर्वदर्शनं कदाचि-
द्भवतीत्याह सर्वं वा निखिलं भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसि इदं विश्वं उपरज्य योगाभिव्यक्त्या-
वभासते प्रतीयते न हि अस्यापि कदाचित् प्रतीतौ दृष्टान्तः चेद्रमसि उपरज्य नमः राहुः यदि शुद्धे मनसि
सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धं ९२ ननु एवं स्थूलदेहनाशेऽपि लिंगदेहस्यानाशात् अहं मम
कर्तापि भोक्तेति अतिदेशनास्तीत्युक्तं नन्वेवं श्रवणे ननु लिंगदेहस्य स्थूलदेहारोपेणकर्तृत्वभो-
क्तृत्वे न तु केवलस्य तत्र कदाचित् स्थूलदेहाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावात् मुक्तिः प्रसज्येत तत्रा-
ह अहं ममेति भावः स्थूलदेहसंबंधः प्रलये जीवे व्यवधीयते न त्वच्छिन्नो भवति किं पर्यन्तं तत्रा-

सापास्याहंकाराद्यभावान्नहिच्छेदमात्रेश्चाभासस्मादिध्रुपतापस्य विपर्ययोगादिदःखंतेष्वहमिति
सोऽयमहंकारः तेहतेनप्रकाशतेप्राणायन्तोनामितिशेषः प्रतस्तस्यास्यवदेकादशविधेपकारशोदि
ये: सूक्ष्मदेहलिंगमहंकरणेनत्रस्यतेगर्भादितिशेषः सतोप्यनभिव्यक्तोदृष्टांतः कुह्वामसा वास्यायां
इमसोलिंगरूपमिव ।१२ तत्तस्मादहंकारास्यदृश्यस्थूलदेहस्याविच्छेदाद्दृश्यभूतार्थभावेपिसंस
तिनिवृत्तिर्नास्तीत्याह अर्थेहीति १३ यावल्लिंगस्थूलदेहाविच्छेदात्संसाराणिच्छिन्निरितेतत्प्रपंचय
ति एवमिति सार्द्धैस्त्रिभिः १४ पंचविधंपंचतन्मात्रात्मकंत्रिवृत् त्रिगुणं षोडशाविकारात्मनाविस्तृ
ते १५ १४ ननुनैवंदेहं विस्मरन्देहांतरप्रवेशात्पूर्वमदेहत्तास्यादेवमतआह यथेतिनापयातिन्नृणा

गर्भेबालेप्यपौष्कल्यादेकादशविधंतदा लिंगंनदृश्यतेयूनःकुह्वांचंद्रमसोयथा ॥१२
अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा ॥१३ एवंपं
चविधंलिंगंत्रिवृत्षोडशविस्तृतं एषचेतनयायुक्तोजीवइत्यभिधीयते ॥१४ अनेनपुरु
षोदेहानुपादत्तेविमुंचति हर्षंशोकंभयंदुःखंसुखंचानेनविंदति ॥१५ यथातृणजलौ
केयंनापयात्यपयातिच नत्यजेन्म्रियमाणोपिप्राग्देहाभिमतिंजनः ॥१६ यावदन्येनविं
देतव्यवधानेनकर्मणां मनएवमनुष्येंद्रभूतानांभवभावनं ॥१७ यदाक्षैश्चरितान्ध्यायन्
कर्माण्याचिनुतेसकृत् सतिकर्मण्यविद्यायांबंधःकर्मण्यनात्मनः ॥१८ अतस्तदपवादा
र्थंभजसर्वात्मनाहरिं पश्यंस्तदात्मकंविश्वंस्थित्युत्पत्त्यप्ययायतः ॥१९

स्यास्यागादपयातिचतृणांतरप्राप्त्याऽऽरणात् तथात्रापिजनेन ५।१६ अन्यदेहंकर्मणाप्राप्यदेहारंभकाणां(
व्यवधानेनविच्छेदेनसमाप्नोत्यात्रकरणार्थमुपसंहरतिमनएवेतिभवभावनेसंसारहेतुः १७ कथंसतिन
दाहयदेतिचरितान् उपभुक्तान् यतः कर्मणिसतितत्संगस्यक्तनःकर्मतत्राह अविद्यायांसत्यांअना
त्मदेहादेःकर्मणिबंधोभवति १८ विश्वस्थित्यादयोयतोहरेर्भवति १९ ॥

हंसयोर्जीवेश्वरयोः ८० पुरंजनादिरूपपुरंजनमादेशं मे विज्ञापयत्रैकयायिवा ८१ ८२ आत्मशौचं मनःशोधकं पारमेष्ठ्यं
सर्वोत्कृष्टफलदं ८४ जीवबुद्धिस्तत्सहितस्याप्यमोहंकारः छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशयः छि॰
न्नः ८५ इति भावार्थे चतुर्थस्कंधे एकोनत्रिंशः २९ प्रसंगात्पंचभिः श्लोकैः वृत्तं प्राचीनबर्हिषः वर्ण्यते वसुनन्दाभ्यो महत्त्व
तेव प्रचेतसां ततस्त्रिंशो नपस्त्वष्टादीपाल्लब्धवरास्ततः आगत्य वाल्मीकदारात्य राज्यं चक्रुरितीर्यते २ हविर्धानोथकां॰

मैत्रेय उवाच भागवतमुख्यो भगवान्नारदो हंसयोर्गतिं प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोऽगमत् ८०
प्राचीनबर्हिराजर्षिः प्रजासर्गाभिरक्षणे आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ८१ तत्रैकाग्रमना वीरो
गोविंदचरणांबुजं विमुक्तसंगोऽनुभजन्भक्त्या तत्साम्यतामगात् ८२ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणा
नघ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ८३ एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुख॰
निःसृतमात्मशौचं यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः ८४ अध्या
त्मपारोक्ष्यमिदं मयाधिगतमद्भुतं एवं स्त्रियाश्रयः पुंसः छिन्नोऽमुत्र च संशयः ८५ इति चतुर्थे एकोनत्रिंशः
२९ विदुर उवाच ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य कां १
किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनम॰
थ प्रचेतसः २ ॥

सिद्धिमापुः १ हे बार्हस्पत्य नेकस्या विद्विद्या यो बृहस्पतेर्मैत्रेयः शिष्य इति ज्ञातव्यं २ ते यदृच्छया गिरिशं प्राप्य तस्यैव
कैवल्यनाथप्रियस्य स्वामिनः पार्श्ववर्तिनः न दस्तन्मृहीनाः संतो नूनं परं मोक्षं प्रा
पुरेव ततः सर्वे तदेव अथवा परत्र किं प्रापुः
॥ २ ॥

श्री॰ भा॰ व॰ टी॰ ८५

रुद्रगीतं जपयज्ञेपेणायज्ञेनतपसाचपुरंजनंहरिं २ कृच्छ्रंतेषांतपःक्लेशंरुचाकान्त्याशमयन्
शान्तेनसम्यक्तेनवपुषाआविर्भूतः ३ सुपर्णस्कंधमारूढइत्यादिनाबर्हिष्मतःसुतानाहइतिद्वा-
त्रिंशेनान्वयः ४ कनकमयेनवर्णेनविभूषणेनभ्राजमाने कपोलेवदनेयस्य अष्टभिरायु-
धैःसहअनुचरैःकिन्नरैः गेनपदश्चस्वर्गेगीताकीर्तिर्यस्य ५ पीनास्तुते आयता अष्टौभुजास्तेषांमंड-

श्रीमैत्रेयउवाच प्रचेतसोन्तरुदधौपितुरादेशकारिणः जपयज्ञेनतपसापुरंजनमतो-
षयन् २ दशवर्षसहस्रान्तेपुरुषस्तुसनातनः तेषामाविरभूत्कृच्छ्रंशान्तेनशमयन्रु-
चा ३ सुपर्णस्कंधमारूढोमेरुशृंगमिवाम्बुदः पीतवासामणिग्रीवःकुर्वन्वितिमिरादि-
शः ४ काशिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपोलवदनोविलसत्किरीटः अष्टा-
युधैरनुचरैर्मुनिभिःसुरेन्द्रैरासेवितोगरुडकिन्नरगीतकीर्तिः ५ पीनायताष्टभुजमंड-
लमध्यलक्ष्म्यास्पर्धच्छ्रियापरिवृतोवनमालयाद्यः बर्हिष्मतःपुरुषआहसुतान्प्र-
पन्नान्पर्जन्यनादरुतयासघृणावलोकः ६ ॥ **श्रीभगवानुवाच** वरंवृणीध्वंभद्रंवोयू-
यंमेनृपनंदनाः सौहार्देनापृथग्धर्मास्तुष्टोहंसौहृदेनवः ७ योनुस्मरतिसं-
ध्यायांयुष्माननुदिनंनरः तस्यभ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदं ८

लक्ष्म्याः तन्मध्येस्थितयालक्ष्म्यास्पर्धमानाश्रीः शोभायस्याः तयावनमालयापरिवृतआद्यः पु-
रुषआह पर्जन्यस्यनादइवरुतंनादोयस्याः तयावाचसघृणोवलोकोयस्य ६ यूयंमन्नोहात्तीर्थंसौ-
हार्देनहेतुना अपृथक्धर्मोयेषांतेव्यापनेवः परस्परंसौहृदेनतुष्टोहं भूतेषुसौहृदंचभविष्य-
ति ८ राम ॥ राम

राम
८५

नभ्योदास्येकिंपुनर्युष्मभ्यमितिभावः १० अगृहीत्वगृहीतवेतनः अपोउ इति हेतोः लोकाननुलोकेषु भविष्यतियद्वालोका
ननुभविष्यतिरक्षयतिव्याप्स्यतीत्यर्थः ११ आत्मनोवीर्येणसंतानेन १२ पुत्रार्थमादौभार्यांसंपादयति कंडोरिति त्रिभिः
तपोनाशार्थमिंद्रप्रेषितयाप्सरसाप्रम्लोचयाकंडुनाममहर्षिर्बहुकालंरेमेसाचततःस्वर्गंगच्छंतीकंडोर्जातगर्भंवृक्षेषुन्यस्ताज।
गानदेनडकं १३ सप्रसिद्धोवनस्पतीनांराजासोमः अमृतस्त्राविभिःकरैस्तस्याःपुत्रवेनिदधे अनेनाप्सरसोगर्भसंभवेना

येनमांरुरुगीतिनसायःप्रातःसमाहिताः त्वत्वंत्वहंकामवरान्दास्येप्रज्ञांचशोभनां १० यद्यप्ययंपित्रादे
शेअगृहीत्वगुदाविनाः अतोवदुष्मानीकीर्तिलोकाननुभविष्यति ११ भविताविश्रुतःपुत्रोनवमोब्रह्मणो
गुणैः यथात्मानात्मवीर्येणत्रिलोकींरक्षयिष्यति १२ भविताविश्रुतःपुत्रो कंडोःप्रज्ञांचयाकन्यालब्धा
कमललोचना तांचापविद्धांजगृहुःभूरुहानृपनंदना १३ त्वत्तामायस्वविरानासोमःपीयूषवर्षिभि।
तांहिन्वीरोदमानायानिदधेसदयान्वितः १४ प्रजाविसर्गआदिष्टापित्रामामनुवर्तता तत्रकन्यांव
रावोढांतामुदवहन्तमारिषां १५ अपृथक्धर्मचारिणांसर्वेषांवःसमध्यमा अपृथक्धर्मशीलेयंभूया
त्पत्न्याप्रीताशया १६

मृताहारेणावनस्पाल्लावण्यंपद्मसविदर्दौर्गंध्यादिराहित्यंचोक्तं १४ ममानुवर्तमानेनपित्रानियुक्ताःसंतःतत्रप्रजासर्गेनि
मित्तेनामुदवहत १५ ननुबहूनांकथमेकाभार्यास्यात्तत्राह अपृथक्ध
र्मःशीलंचयेषांतेषांचपत्नीभूयात् अर्पितोभवत्स्वाशयोययाधर्म
शीलयोरैक्यात्महाकाव्येष्वनत्यहष्टविरोधइतिभावः १६ ॥ १४

अहतौजसः अहतेंद्रियबलाः संतः १७ पक्वगुणो दग्धकामादिमल आशयो येषां अतः लोकत्रय
भोगान्निर्विद्य मत्स्थाने अपवर्गः १८ ननु गृहेषु प्रविष्टानामस्माकं तदासक्त्या बंधः स्यात् अत
स्तद्धानिः निर्वेदो वा तत्राह गृहेष्विति कुशलानि मत्क्रियार्पितानि कर्माणि येषां मद्वार्तया यातो यामः कालो येषां
१९ तद्वार्ताश्रोतॄणां गृहे नैव बंध इति कुतस्तत्राह नव्यवत् प्रति यद्यस्मात्कथाश्रवणात् हृदि स
र्वेषामहमीश्वरः ब्रह्मवादिभिः निमित्तभूतैः श्रोतॄणां अव्यवत् प्रति परं तु नवत् अयेश्वरोपि वा
ब्रह्मसाक्षात्कारो भवतीत्यर्थः नन्वेतत्कथाश्रवणे कथं ब्रह्मसाक्षात्कारस्तत्राह यो हि एतद्ब्रह्म

दिव्यवर्षसहस्राणि सहस्रमहतौजसः भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम
१७ अथमामनपायिन्याभक्त्यापक्वगुणाशयाः उपयास्यथमद्धामनिर्विद्यनिरयादतः
१८ गृहेष्वाविशतांचापिपुंसांकुशलकर्मणां मद्वार्तायातयामानांनबंधायगृहामताः
१९ नव्यवद्धृदयेयज्ज्ञोब्रह्मैतद्ब्रह्मवादिभिः नमुह्यंतिनशोचंतिनहृष्यंतियतोगताः
२० मैत्रेयउवाच एवंब्रुवाणंपुरुषार्थभाजनंजनार्दनंप्रांजलयःप्रचेतसः तद्दर्शनध्व
स्ततमोरजोमलागिरागृणन्गद्गदयासुहृत्तमम् २१ प्रचेतसऊचुः नमोनमःक्लेशविना
शनायनिरूपितोदारगुणाह्वयाय मनोवचोवेगपुरोजवायसर्वाक्षमार्गैरगताध्वनेनमः

स्तत्ववेदिनः यं मां प्राप्ताः संतो मोहशोकहर्षान्न प्राप्नुवंति अतो मत्कथाश्रवणेन नव्यत्वेन मम हृ
द्याविर्भावे ब्रह्मसाक्षात्कारत्वात् गृहेषु वसतामपि न बंध इत्यर्थः २० पुरुषार्थं भाजयति प्रा
पयतीति तथा तं २१ वेदैः सकलश्रेयःसाधनत्वेन निरूपिता उदारा गुणाः आह्वयानि नामानि यस्य
वचसोर्वेगादपि पुरो जवो वेगो यस्य मनोवचसोरगोचरायेत्यर्थः अतएव सर्वेषां अक्षाणां मार्गैः
अगतः अनवगतो अध्वा यस्य तस्मै ते नमः २२ ॥

स्वनिष्ठया स्वरूपस्थित्या शुद्धाय अतः शांताय मनसि निमित्ते मतिश्च पार्श्वं यथार्थमेव विलसत् विस्फुरितं द्वयं रूपं य
स्मिन् गृहीता मायागुणैर्विग्रहाः ब्रह्मादिमूर्तयो येन २३ स्वतस्तु विशुद्धसत्वरूपाय मे संसारं हरति मेधा ज्ञानं यस्य त
स्मै २४ २५ अयुंक्ष्महि कृतवंतो वयं २६ यदुक्तं वरं वृणीध्वमिति तन्मनसि निधायाहुः रूपमिति समस्तानां क्लेशानां

शुद्धाय शांताय नमः स्वनिष्ठया मनसा पार्श्वं विलसद्द्वयाय नमो जगत्स्थानलयोदयेषु गृहीतमायागुण
विग्रहाय २३ नमो विशुद्धसत्वाय हरये हरिमेधसे वासुदेवाय कृष्णाय प्रभवे सर्वसात्वतां २४ नमः कम
लनाभाय नमः कमलमालिने नमः कमलपादाय नमस्ते कमलेक्षण २५ नमः कमलकिंजल्कपिशंगा
मलवाससे सर्वभूतनिवासाय नमो युंक्ष्महि साक्षिणे २६ रूपं भगवता त्वेतदशेषक्लेशसंक्षयं आविः
वि कृतं नः क्लिष्टानां किमन्यदनुकंपितं २७ एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः यदनुस्मर्यते काले स्वबुद्ध्या
भद्ररंधन २८ येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां अंतर्हितोंतर्हृदये कामान्नो वेदनाशिषः २९

संक्षयो यस्मान्नः आविष्कृतं प्रकटितं अतोन्यत् किमनुकंपितं अनुकंपाद्वयं एवास्माकं परमानुकंपेत्यर्थः २७
कृतं तत्र तत्राह हे भद्ररंधन अमंगलनाशन त्वं प्रत्ययोऽपि न विवादितः एतावदेव दीनेषु वत्सलैः प्रभुभिर्भाव्यं कार्यं
किं तत्राह यदिति अस्मदीयाः पत्नयश्च स्वबुद्ध्या स्वचिंतने काले अनुस्मर्यंत इति यत् त्वया तु रूपं दर्शितमिति भावाः २८ ये
नानुस्मरणेन क्षुल्लकानां तेषामुपशांतिः सुखं भवति किं वक्तव्यं क्षुल्लकानामपि भूतानां अंतर्हृदये अंतर्हितः अंतर्यामित्वे
नास्थितो भवानीहतामिच्छतां नः क्षुल्लकानां नोऽस्माकं आशी
षः कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः २९

श्री° भा° स्कं° टी° ४

तथापि वरं वृणुतेत्यत्राह येषामस्माकं भगवान्प्रसन्नः असावेव वरः भगवत्प्रसाद एवास्माकमीप्सितो
वर इत्यर्थः अपवर्गगुरुः मोक्षमार्गप्रदर्शकः गतिः स्वतः पुरुषार्थभूतः ३१ यद्यप्येवं तथा
पि हे नाथ त्वत्तः वरमेकं वृणीमहि कथंभूतात्परात् कारणादपि परात् अक्षरात्परतः पर इ
तिश्रुतेः अतो यद्यपि त्वं दाने समर्थः न च देयानां त्वद्विभूतीनामन्तोऽस्ति यतोऽनन्तविभूतित्वादनन्त इ
ति गीयसे ३२ तथापि यथा सारंगो भ्रमरः पारिजाते स्वत एव लब्धे सति स्वलभमपत्यन्यद्वृक्षान्तरं न
सेवते तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्यर्थः किमप्यन्यत्तुच्छं

असावेव वरोऽस्माकमीप्सितो जगतः पते प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ३० वरं वृणी
महे थापि नाथ त्वत्परतः परात् न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे ३१ पारिजातेऽञ्ज
सा लब्धे सारंगोऽन्यन्न सेवते त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ३२ यावत्ते मा
यया स्पृष्टा भ्रमाम इह कर्मभिः तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे ३३ तुलयाम
लवेनापि न स्वर्गं नापुनर्भवम् भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ३४ यत्रेड्यन्ते
कथा मृष्टास्तृष्णायाः प्रशमो यतः निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ३५ यत्र नाराय
णः साक्षाद्भगवान्न्यासिनां गतिः संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ३६ तेषां वि
चरतां पद्भ्यां तीर्थानां पावनेच्छया भीतस्य किं न रोचेत तावकानां समागमः ३७ ॥ ॥

किमर्थं वृणीमहि न हि किं वृणीमहि अनेन त्वेन मनोरथानामनवस्थानादित्यर्थः ३३ अत एव
तावदेव प्रार्थयाम इत्याह यावदिति स्पृष्टाः भ्रमामः सन्तः भगवति प्रसक्ताः संगो येषां तेषां संगोऽस्माकं
स्यात् ३३ ननु राज्यभोगादि स्वर्गापवर्गौ च विहाय किमिदं प्रार्थ्यते तत्राह ३४ सत्संगस्य श्रेष्ठत्वं प्रप
ञ्चयति यत्रेति त्रिभिः यत्र येषु यतः याभ्यः कथाभ्यः निर्वैरं वैराभावः ३६ पद्भ्यां पावनेच्छया संसारभीत

२८ ४ नाम° ५१

तत्संगफलमस्माभिरेवानुभूतमित्याहुः वयंत्विति त्वत्प्रियः सखा तस्य भवस्य अत्यंतमचिकित्स्यस्य तन्मनोमृत्योर्भि
षक्तमस्तं देवं त्वां गतिं प्राप्ताः ३८ वयोतरं तुष्टये तेयन्न इति आम्यो नताः नमस्कृताः ३९ निरंधसो निरन्नाः अदभ्रं बहुकालं
तदेव परितोषणाय भवतीति वृणीमहे ४० अस्त्तानामप्यस्माकं तव स्तुतिर्नियुक्तेत्याहुः मनुरिति यस्य तव महिम्नः न दृष्टः पारो यैः
तेपि त्वां आत्मसमं स्वशक्त्यानुरूपं यथा स्तुवन्ति अथो अतः वयमपि गृणीमः ४१ सत्त्वमूर्तये वासुदेवाय ४२ यानेस्व

वयंतु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं
गताः स्म ३८ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या आर्या नताः सुहृदो भ्रातरश्च सर्वा
णि भूतान्यनसूययैव ३९ यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु सर्वं तदेतत्पुरुषस्य भूम्नो
वृणीमहे ते परितोषणाय ४० मनुः स्वयंभूर्भगवान्भवश्च येन्ये तपो ज्ञान विशुद्धसत्त्वाः अदृष्टपारा अपि
यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः ४१ नमः समाय शुद्धाय पुरुषाय पराय च वासुदेवाय सत्त्वाय
तुभ्यं भगवते नमः ४२ मैत्रेय उवाच इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः अनि
च्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ४३ अथ निर्याय सलिलात्प्रचेतस उदन्वतः वीक्ष्या
कुप्यन्द्रुमैः छन्नां गां गां रोद्धुमिवोच्छ्रितैः ४४ ततो
ग्निमारुतौ राजन्नमुंचन्मुखतो रुषा महीं निर्वी
रुधं कर्तुं संवर्तक इवात्यये ४५ ।।४५

प्रयाणे अनिच्छतामपि सतां स्वधाम ययौ अनपवर्गवीर्यः अकुंठितप्रभावः ४३ उदन्वतः सिंधोः सलिलान्निर्यायति
गत्य गां स्वर्गं रोद्धुमिव उच्छ्रितैर्द्रुमैर्गां महीं छन्नां वीक्ष्य द्रुमेभ्यो अकुप्यन् तदा हि प्राचीनबर्हिषः प्रव्रजितत्वाद्राजके क
क्षणाद्यभावात् द्रुमैर्भूमिः छन्ना भूत् ४४ निर्वीरुधां वीरुधोपि यस्यास्तथाभूतां कर्तुं संवर्तकः कालाग्निरुद्रः ४५
ॐ नमो सच्चिदानंदाय

श्री। भा। ४। टी। ५५

नैर्यैर्दुग्धाभिः ४९ उत्पन्नः समर्पयामासुः ५० मारिषां वा दीग्र जननयो निवसाय तस्याम्नातो दर
न्ताः महतः श्रीमहादेवस्यावज्ञानात्पूर्वमजनयानि जातो ब्रह्मपुत्रोऽपि सन् द्विजियज्ञानोऽयस्याम
जनिमानः ४८ प्राक्सर्गे पूर्वदेहे कालेन विद्रुतेन गतेदेवे मेश्वरेणाचोदितः सदक्षः प्रजाः ससर्जदक्षः
सहितिप्रसिद्धः ४९ स्वयारुचाप्रभयानेजउयदक्ष्माशाश्चकादिवान् यंचकर्मदाक्ष्यदक्षमब्रुवन्
५० तमभिषिच्य ब्रह्मनोदिव्रह्मापजासंगेसरक्षायांयुयोज सचदक्षोन्यान्मरीच्यादीन् तत्रस्थापारेष

भस्मस्यात्क्रियमाणोसत्तानडुमान्नीदापितामहः आगतः शमयामासपुत्रो बर्हिष्मतोन
वैः ४६ तत्रावशिष्टय्येहत्ताभीनाडुहितरंतदा उत्पन्नः तेप्रचेतोभ्यउपदिष्टाः स्वयंभुवा
४७ तेवब्रह्मणआदेशान्मारिषामुपयेमिरे यस्यांमहदविज्ञानादजन्यजननयोनिजः
४८ चाक्षुषेत्वन्तरेप्राप्तेप्राक्सर्गकालविद्रुते यः ससर्जप्रजाः सर्वासदक्षोदैवचोदितः
४९ योजायमानः सर्वेषांतेजस्तेजस्विनोरुचा स्वयोपादत्तयाद्क्षाद्दक्षंकर्मणादक्षम
५० तंप्रजासर्गरक्षायामनादिरभिषिच्यच युयोजयुयुजेन्यांश्च सवैसर्वप्रजापतीन्
५१ ॥ इतिश्रीभागवतेचतुर्थस्कंधेत्रिंशोऽध्यायः ॥ ३० ॥ मैत्रेयउवाच ततउत्पन्नविज्ञाना
आश्रित्याधोक्षजभाषितं स्मरंतआत्मजेभार्यांविसृज्यप्राव्रजन्गृहात् १ दीक्षितानाब्रह्मसत्रेणासर
तीन् ५९ ॥ इतिश्रीभाग ॥ वैश्यानात्ममथसा पतीच्यांदिशिवेलायांसिद्धोभूयत्रजाजलिः २

तिष्ठन्तवान् ५१ ॥ इतिश्रीभावार्थदीपिकायांचतुर्थस्कंधेत्रिंशः ॥ ३० ॥ एकत्रिंशेसतेदक्षेधुरंन्यस्यवनेसतां नारदोप
देशेनमार्गेणाप्रचेतसः ततः दिव्यवर्षसहस्राणांसहस्रस्यांतेउत्पन्नविवेकज्ञाना १ ब्रह्मसत्रेणाप्राप्तविमर्शो
यास्यपमड्रामसिद्धनिरयाटन्यो हजभाषितेस्मरंतप्राप्तपाव्रजन् १ नेनब्रह्मवेलायांसमुद्रतीजाजलिनाम
नदीदिताः कृतसंकल्पाः तेषुसर्वेषामात्मनिमिथ्याज्ञानेयस्मिन्

४

श्रीः

राम

निर्जिताः प्राणमनोवचोदृशो यैः जितासनाः शांता उपरताः समानाः तुल्या यथा तथा आरंभकत्वेन वो विग्रहा येषां ब्रह्मणि
योजित आत्मा यैः सुरासुरैरीड्यो ददृश्वान् उत्थायतं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा यित्वा च
५ यदादिष्टं पदादिष्टं यदात्मनस्तत्क्षपितं विस्मृतं प्रचेतोभिः पृष्टः ८ गृहेषु गृहस्थप्रसक्तानां हरिसेवां विनास
वै जन्मकर्मादिकं व्यर्थं कृतमिति तान् शौनकाह तज्जन्मेति चतुर्भिः यतो यस्मात् हरिसेवैव फलेष्वन्नस्त
द्विहीने सर्वे व्यर्थमित्यर्थः शुक्लं सेवेधि जन्म विशुद्धमातापितृभ्याम् सावित्रं उपनयनेन याज्ञिकं दी

नान्निर्जितप्राणवचोमनोदृशो जितासनाः शांतसमानविग्रहान् परेमले ब्रह्मणि योजितात्म
नः सुरासुरेड्यो ददृशे स्म नारदः ३ तमागतं तउत्थाय प्रणिपत्याभिनंद्य च पूजयित्वा यथा
देशं सुखासीनमथाब्रुवन् ४ प्रचेतस ऊचुः स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः तव चं
क्रमणं ब्रह्मन्नभयाय यथा रवेः ५ यदादिष्टं भगवता शिवेनाधोक्षजेन च तद्गृहेषु प्रसक्तानां
प्रायशः क्षपितं प्रभो ६ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनं येनांजसा तरिष्यामो दुस्त
रं भवसागरं शुक उवाच इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः भगवत्युत्तमश्लोक आविष्टा
त्माब्रवीन्नृपान् ८ श्रीनारद उवाच तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः नृणां येनेह
विश्वात्मा सेव्यते हरिरीश्वरः ९ किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः कर्मभिर्वा
त्रयीप्रोक्तैः पुंसोपि विबुधायुषा १० श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः बुद्ध्या वा
किं निपुणया बलेनेन्द्रियराधसा ११ ॥

र्वायुषापि १० वचोभिः वाग्विलासैः चित्तवृत्तिभिः नानावधानसामर्थ्यैः इंद्रियाणां राधसा पाटवेन
११ राम राम ॥

श्री॰ भा॰ च॰ टी॰ ४४

योगेन प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण संन्यासवेदाध्ययनाभ्यामपि श्रेयोभिर्व्रतवैराग्यादिभिः श्रेयःसाधनैः १२ नन्वेषां नानाफलसाधनानां हरिसेवाभावमात्रेण कुतो वैयर्थ्यं तत्राह श्रेयसां फलानामात्मैवावधिः पराकाष्ठा अर्थतः परमार्थतः आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः भवत्वात्मावधिः हरेः किमायातं तत्राह सर्वेषामपीति आत्मदः स्वाविद्यानिरसनेन स्वरूपाभिव्यंजकः ऐश्वर्येणापि रूपेण बलिप्रभृतिभ्योप्यात्मप्रदः प्रियश्च परमानन्दरूपत्वात् १३ किं च नानाकर्मभिरिन्द्रदेवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवन्ति केवलेन्द्रदेवताराधनेन नेति सदृष्टान्तमाह यथेति. मूलान्मुख्याः भागाः स्कन्धास्ततो विभागा भुजाः तेषामपि शाखाः उपशाखाः उपलक्षणं

किं वा योगेन सांख्येन न्याससाध्याययोरपि किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः १२ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः १३ यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या १४ यथैव सूर्यात्प्रभवन्ति वारः पुनश्च तस्मिन्प्रविशन्ति काले भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः १५ ॥

पत्रपुष्पादयोपि तृप्यन्ति न तु मूलमेकं विना स्वस्वनिषेचनेन प्राणस्योपहारो भोजनं तस्मादेवेन्द्रियाणां तृप्तिः न तु तत्तदिन्द्रिये पृथक् पृथक् गात्रानुलेपनेन तथाच्युताराधनमेव सर्वदेवताराधनं न पृथक् इत्यर्थः १४ कुतः सर्वमूलत्वादिति सदृष्टान्तमाह यथैवेति वारः जलानि वर्षाकाले सूर्यात्प्रभवन्ति ग्रीष्मे तस्मिन्नेव प्रविशन्ति अस्याः शक्तिरूपत्वेन दृष्टान्तान्तरमाह यथा भूतानि भूमाविति तथा हरावेव गुणप्रवाहः इन्द्रादिगुणप्रवाहः अथ ... सोपाधिकत्वे हरेः स्यादित्याशंक्याह नदितिनदेन [illegible] परेनस्याङ्कन

१२ ननुप्रसंगेहरेरेकथंप्रपंचोत्पत्तिलयौतत्राह यथेति अभ्रतमःप्रकाशाआगमापायिनोरजस्तमःसत्वस्थानी-
याःहेतुभूयाःप्रचेतसःअशक्तयःनभवंतिलीयंतेइतिएवमयंजगत्प्रवाहः १७ तेनसर्वकारणत्वेनहेतुनाकालोनिमि-
त्तंप्रधानंपुरुषःकर्ता एतत्त्रितयात्मकत्वात्सर्वकारणंपरमेश्वरमद्धासाक्षाद्भजध्वं कथमात्मनाएकभावेनअभिन्नत्वेन

यतत्पदंतज्जगदात्मनःपरंसकृद्विभातंसवितुर्यथाप्रभा यथासवोजाग्रतिसुप्तशक्तयोद्रव्यक्रियाज्ञान-
विदाभ्रमात्ययः १६ यथानभस्यभ्रतमःप्रकाशाभवंतिभूपानभवंत्यनुक्रमात् एवंपरेब्रह्मणिशक्त-
यस्त्वमूरजस्तमःसत्वमितिप्रवाहः १७ तेनैकमात्मानमशेषदेहिनांकालंप्रधानंपुरुषंपरेशं स्वतेजसा
ध्वस्तगुणप्रवाहमात्मैकभावेनभजध्वमद्धा १८ दययासर्वभूतेषुसंतुष्ट्यायेनकेनवा सर्वेंद्रियोपशांत्याच गतं
तुष्यत्याशुजनार्दनः १९ अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः निजजनवशात्मा
त्मनोयन्नसरतिच्छिद्रवदक्षरःसतांहि २० नभजतिकुमनीषिणांसइज्यांहरिरधनात्मधनप्रियोरसज्ञः
श्रुतधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु २१ श्रियमनुचरतींतदर्थिनश्चद्विपदपतीन्वि
बुधांश्चयःस्वपूर्णः नभजतिनिजभृत्यवर्गतंत्रःकथममुमुद्विसृजेत्पुमान्कृतज्ञः २२ मैत्रेयउवाच॥इति
प्रचेतसोराजन्नन्याश्चभगवत्कथाः श्रावयित्वाब्रह्मलोकंययौस्वायंभुवोमुनिः २३

१८ साधनमाहदययादिभिःप्रीतोभवति १९ ततोनकदाचित्त्यजतीत्याहअपहतेति निरस्तासकलाएषणाःकामाय
स्मात्सहसावमलआत्मामनःतस्मिन्सतांमनसिनिरंतरमेधितयाभावनयोपहूतःसन्नंतरोंतरिःछिद्रवत्...आका
ज्ञावत्ततोनसरतिनापयातिहिकिंकुर्वन्आत्मनोनिजजनवशात्वंभक्त्याधीनत्वमयन्प्रवगच्छन् २० सतामेवेत्यर्थःयोसौ
अमसतीत्वज्जामपिनष्टहृतातीत्याहनेतिकुमनीषिणांकुत्सितमतीनांअधनाश्चतेआत्मधनाश्चभगवद्भक्ताःतेप्रियायस्यरस
ज्ञः भक्तिरसज्ञःकेकुमनीषिणःतानाहश्रुतादिनिमित्तैर्मदैर्येसत्सुपापंतिरस्कारंकुर्वंति २१ भक्त्याधीनत्वंप्रपंचयन्ना
ह अनुवर्तेमामामपिश्रियंतदर्थिनःसकामान्द्विपदपतीन्नरेशान्विबुधान्देवानपियोनानुवर्तते यतःस्वेनैवपूर्णःअतःस्वभृ

त्वचगीतिरक्तमेवंप्रवेश्नतमसुमीषदपिकथंपरित्यजेत २२ प्रचेतसःकर्मभूतान्यन्यान्स्वनुनेष्यनीनेरित्यादिध्रुवचरिता
ध्याः सर्वेगायन् प्रचेतसामभिमुक्तत्वात् २३ २४ प्रचेतसांनारदस्यचसंवादद्वयमेतदाख्यानंतेभिहितंहरेःकीर्तनंयस्मिन्

तेपितन्मुखनिर्यातंयशोलोकमलापहं हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः २४ एवंतेभिहितंक्षत्तर्य
न्मांत्वंपरिपृष्टवान् प्रचेतसांनारदस्यसंवादंहरिकीर्तनं २५ शुकउवाच ॥ यएषउत्तानपादस्यमानवस्यानुवर्णि
तः वंशः प्रियव्रतस्यापिनिबोधनृपसत्तम २६ योनारदादात्मविद्यामधिगम्यपुनर्महीं भुक्त्वाविभज्य
पुत्रेभ्यऐश्वरंसमगात्पदं २७ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्कथां प्रवृद्धभा
वोश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः २८ विदुरउवाच ॥ सोयमद्यमहायोगिन्भवताकरु
णात्मना दर्शितस्तमसःपारोयत्राकिंचनगोहरिः २९ इत्यानम्यतमामंत्र्यविदुरोगजसाह्वयं स्वा
नांदिदृक्षुःप्रययौज्ञातीनांनिर्वृताशयः ३० एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मनां आयुर्धनंय
शःस्वस्तिगतिमैश्वर्यमाप्नुयात् ३१ इतिश्रीभागवतेचतुर्थस्कंधेप्रचेतोपाख्यानेनामैकत्रिंशोध्यायः
॥ ३१ ॥

तत्र २५ यएषवंशःसोनुवर्णितः २६ यःप्रियव्रतः २७ स्वानांज्ञातीन्दिदृक्षुः ३० राज्ञोचरितमितिशेषः
३१ इतिश्रीभावार्थदीपिकायांचतुर्थस्कंधे एकत्रिंशोध्यायः ३१ ॥ समाप्तोयंचतुर्थस्कंधः ॥ शुभं
शुभं शुभं शुभं

44

४

4

९४ चतुर्थस्कंधपत्राणि